कृपानंद सुदुर्लभः

उदीप्तः मनः स्नेहादिभिः प्रतिगूढभावे । नियतिस्वरुप रुचिरं विलसत् सोमयज्ञे ॥
मूर्धन्य प्रेमकलशैः प्रमत्त उरुभृंगैः । जुष्टं विलोक्य प्रेमला मम स्नेहधामे ॥

अमूल्य

VIBRANT PUSHTI
* VADODARA *

॥ श्री वल्लभ ॥

वल्लभः प्रमेय -- वाक् प्रसवः

निबंध शास्त्रार्थ प्रकरण

१. गायत्रि अर्थे हि प्रसवमात्रम् उक्तं न स्थिति प्रलयौ ॥

२. एतेन परस्पर वरणम् उक्तम्, वरणत्व उक्त्या यथा कन्या स्व अभिमतम् एव स्व पतित्वेन वृणुते वरो वा, तादृशीम् एव कन्या स्व स्त्रीत्वेन तथा च भगवान् स्व दासत्वेन आत्मीयत्वेन अङ्गी करोति इति उच्यते, तथा च यथा तद् अनन्तरम् न अन्यत्र विनियोगः तस्याः तथा एव ऐतस्य अपि इति ज्ञापितं भवति ॥

३. वरणीयं सुन्दरम् इति स्वतः दोष अभाव उक्तः, भजनीयगुणान् वदन् सेवक उद्धारम् आह ॥

४. स्वरुपस्फूर्ति एव सर्वेषां सर्व अविद्या नाशक इति अर्थः, स्वरुपम् एव अविद्यानाशकम्, प्रमेयबलम् एतत् ॥

५. धियः बुद्धीः प्रच उदायात् इति, तेन सर्व प्रेरकत्वम् आयाति, प्रकृष्टत्वेन मूलपुरुषोत्तम स्वरुप पर्यन्तम्,

१. न जातु यमयातना भवति ते पयः पानतः ॥

२. ममास्तु तत्र सन्निधौ तनु नवत्वम् एतावता ॥

३. अलौकिकाः तु वेदः उक्ताः साध्य साधन संयुताः ॥

४. स्वरुपस्थः यदा जीवः कृतार्थः स निगद्यते ।

५. नियत अर्थप्रदानेन तदीयत्वं तद् आश्रयः ॥

६. जीवाः स्वभावतः दुष्टा दोष अभावाय सर्वदा ॥
श्रवण आदि ततः प्रेम्णा सर्वम् कार्यम् हि सिध्यति ॥

७. समर्पणेन आत्मनः हि तदियत्वं भवेद् ध्रुवम् ॥

८. आत्म आनन्द समुद्रस्थं कृष्णम् एव विचिन्तयेत् ॥

९. लोकार्थी चेद् भजेत् कृष्णं क्लिष्टो भवति सर्वथा ॥
क्लिष्टोपि चेद् भजेत् कृष्णं लोको नश्यति सर्वथा ॥

च उदयात् इति प्रेरयति फलसंबन्धं करोति इति अर्थः ॥

६. वास्तव वस्तुषु पिबत भागवतम् रसम् आलयम् इति, रसम् आलयम् ॥

७. मोक्षाधिकरसः तु " ब्रह्मानन्दात् समुद्धृत्य भजन आनन्द योजने ' स रसस्तु रस समुहः रास इति " रासलीलैकतात्पर्यम् इति अर्थः, अत एव रास एव सर्वे इन्द्रिय आस्वाद्य साक्षाद् स्वरूप सम्बन्धः मनोरथान्तरुपः ॥

८. भक्तिमार्गीय संन्यासः तु साक्षात् पुष्टि पुष्टि श्रुतिरूपाणां रासमण्डल मण्डनानाम् स्वयम् एव उक्तम् ॥

९. विप्रयोगे असौ उभयत्र एक आत्मकः भवति इति ॥

१०. सर्व अज्ञात स्वरुपम् हि ब्रह्म पूर्वम् रिरंसया, ततः अखिल जगद्रुपम् भूत्वा तत्र अपि दुस्तराः ॥

११. लीला सम्बन्धिनः तत्र सर्वम् भगवद् आत्मकम्, प्रवर्तक तु अतः वेणुनादः वेद आत्मकः अत्र हि ॥ (गा. भा.)

१. अग्निः चकार तत्र अर्थ दीपम् भागवते महत् ॥

२. भगवति जीवैः नमनम् एव कर्तव्यम् न अधिकं शक्यम् इति सिद्धांतः । परम काष्ठापन्नं वस्तु

१०. ज्ञान अभावे पुष्टिमार्गी तिष्ठेत् पूजा उत्सव आदिषु ॥

११. अनुग्रहः पुष्टिमार्गे नियामक इति स्थितिः ॥

१२. इच्छामात्रेण मनसा प्रवाहं सृष्टवान् हरिः ॥ वचसा वेदमार्गम् हि पुष्टिम् कायेन् निश्चयः ॥

१३. मूले इच्छातः फलम् लोके वेद उक्तम् वैदिकेपि च ॥ कायेन तु फलम् पुष्टौ भिन्न इच्छातः अपि न ऐकता ॥

१४. भगवान एव हि फलम् स यथा आविर्भवेद् भुवि ॥ गुणस्वरुप भेदेन तथा तेषाम् फलम् भवेत् ॥

१५. ब्रह्म सम्बन्ध करणात् सर्वेषाम् देह जीवयोः ॥

१६. निवेदिभिः समर्प्यैव सर्वम् कुर्याद् इति स्थितिः ॥

१७. तस्माद् आदौ सर्वकार्ये सर्व वस्तु समर्पणम् ॥

१८. तथा कार्यम् समर्प्यैव सर्वेषां ब्रह्मता ततः ॥

१९. भगवान् अपि पुष्टिस्थः न करिष्यति लौकिकीम् च गतिम् ॥

२०. अज्ञानाद् अथवा ज्ञानात् कृतम् आत्म निवेदनम् ॥

नमस्यत्वेन निर्दिशति । रूपनाम विभेदेन यः क्रीडति, रूपनाम विभेदेन यः जगत्, रूपनाम विभेदेन यतः जगत् इति ॥

(नि. शा-१)

३. स्वभाव प्रकृति अपेक्षया अधिकम् विहितम् अलौकिकं ये कुर्वंति ते सात्त्विकाः ॥ तत्र अपि भगवत् सेवकाः सेवा पराः ॥ तत्र अपि ये निष्कामाः त एव मुक्तौ अधिकारिणः ॥ तत्र अपि ईश्वर इच्छया अंतिम् जन्मनि जाताः शरीरं गृहीतवंतः ॥ (नि. शा. २)

४. देवकी पुत्रेण गीतम् गीता ॥ गीतायां भगवद् वाक्यानि एव शास्त्रम् इति अर्थः ॥

(नि. शा. ४)

५. निर्गलित वस्तु ज्ञापकम् लिंगम् ब्रह्म इति आदि पदम् तत्र सिद्धं मया अपि परमकाष्ठापन्न वस्तु बोधार्थम् तत् तत् प्रकरणे वक्तव्यम् इति अर्थः ॥ (नि. शा. ६)

६. व्यासस्य समाधिभाषा भागवतम् ॥ यावत् समाधौ स्वयम् अनुभूय निरुपितं सा समाधिभाषा ॥

(नि. शा. ७)

७. वाङ्मात्रम् एव प्रमाणम् ॥ अर्थस्य भगवद् रूपत्वात् । भगवत्

२१. लोके स्वास्थ्यम् तथा वेदे हरिः तु न करिष्यति ॥

२२. तथा एव तस्य लीला इति मत्वा चिन्ताम् द्रुतम् त्यजेत् ॥

२३. कृष्णात् परम् न अस्ति दैवम् वस्तुनः दोषवर्जितम् ॥

२४. कदाचिद् अपमानेपि मूलतः का क्षतिः भवेत् ॥

२५. सत्य संकल्पतः विष्णुः न अन्यथा तु करिष्यति ॥

२६. लौकिक प्रभुवत् कृष्णः न दृष्टव्यः कदाचन ॥

२७. मौढा अपि दुहिता यद्वत् स्नेहात् न प्रेष्यते वरे ॥ तथा देहे न कर्तव्यम् वरः तुष्यति न अन्यथा ॥

२८. त्रिदुःख सहनं धैर्यम् अमृतेः सर्वतः सदा ॥

२९. अशक्ये हरिः एव अस्ति सर्वम् आश्रयतः भवेत् ॥

३०. अविश्वासः न कर्तव्यः सर्वथा बाधकः तु सः ॥

३१. कलौ भक्ति आदिमार्गा हि दुःसाध्या इति मे मतिः ॥

३२. शरणस्थ समुद्धारम् कृष्णम् विज्ञापयामि अहम् ॥

३३. कृष्ण आश्रयम् इदम् स्तोत्रम् यः

सामर्थ्येन अलौकिक प्रकारेण भगवतः सर्व रूपत्वेन वा ॥

(नि. शा. ९)

८. तनु शब्दः साकार ब्रह्म प्रतिपादनाय ॥ (नि. शा. ११)

९. फलदानद्वारा महात्म्य प्रतिपादनेन भक्तिः द्वार इति सिद्धांतः । साधन-रूपः फलरूपः च स्वयम् एव इति एक वाक्यता ॥ (नि. शा. १२)

१०. विभूतिरूपेषु साधनानि फलानि च व्यवस्थया कृतानि, पूर्णफलदानम् च स्वस्मिन् । अतः भजनम् मूल-रूप एव कर्तव्यम् । कृष्णपदेन च बहिः भजनम् एव मुख्यम् इति निरुपितम् ॥ नि. शा. ॥१३॥

११. भगवद् व्यतिरिक्ताः सर्व एव कालपर्यंतम् सगुणाः । मन्निष्ठम् निर्गुणम् स्मृतम् इति तं भजन् निर्गुणो भवेत् इति वाक्यात् । कृष्णसायुज्यम एव निर्गुणा मुक्तिः ॥ यद्यपि ज्ञानमार्गे अपि विषयः निगुणः तथापि मार्गः सगुण इति भक्तिमार्गस्य उत्कर्षः ॥

॥ नि. शा. १४ ॥

१२. कलिकाल स्वभावतः सर्व उत्कृष्टः, स्वल्पः साधनेन अपि महाफलप्रदः

॥ नि शा. १५ ॥

पठेत् कृष्ण सन्निधौ ॥ तस्य आश्रयः भवेत् कृष्ण इति श्री-षाड्भः ब्रवीत् ॥

३४. एवम् सदा स्म कर्तव्यम् स्वयम् एव करिष्यति ॥ प्रभुः सर्व समर्थः हि ततः निश्चिन्ततां व्रजेत् ॥

३५. यदि श्रीगोकुल अधीशः धृतः सर्व आत्मना हृदि ॥ ततः किम् परम् ब्रूहि लौकिकैः वैदिकैः अपि ॥

३६. व्यावृत्तः अपि हरौ चित्तम् श्रवण आदौ यतेत् सदा । ततः प्रेम तथा आसक्तिः व्यसनं च यदा भवेत् ॥

३७. यदा स्याद् व्यसनं कृष्णे कृतार्थः स्यात् तदैव हि ॥

३८. सेवायां वा कथायां वा यस्य आसक्तिः दृढा भवेत् ॥

३९. तादृशानां क्वचिद् वाक्यम् दूतानाम् इव वर्णितम् । अजामिलाकर्णनवद् बिन्दुपानम् प्रकीर्तितम् ॥

४०. उक्त अतिरिक्त वाक्यानि फलं च अपि तथा ततः ॥

४१. निः सन्दिग्धं कृष्ण तत्वम् सर्वभावेन ये विदुः । ते तु आवेशात् तु विकला निरोधाद् वा न च अन्यथा ॥

१३. महामोहः तु अयम् एव, यत क्रिया ज्ञान शक्ति सद्भावे अपि कृष्णं न भजेत् ॥ पर प्रतारणम् च एतद् एव ॥ यतः तं महांतं मन्वाना अभजन्तम् दृष्ट्वा स्वयम् अपि न भजंते ॥१६॥

१४. अतः भगवद् अर्थम् भगवान् न सेव्यत इति न कृष्णः तुष्यति, यदि सा भक्तिः भवेत् कृष्णः तुष्येत् ॥१७॥

१५. कालवशाद् एव अधिकारा निवृत्ता न साधनैः कर्तुं शक्यंते ॥ अवतीर्णो हि भगवान् सर्व मुक्ति अर्थम् इति प्रमेय बलेन एव फलिष्यति इति, स्व अधिकार अभावे अपि ततः फलम् भविष्यति इति अर्थः ॥ अतः अधिकारेण अनधिकारेण वा कृष्ण भजनम् कर्तव्यम् इति सिद्धम् ॥१९॥

१६. मतं सिद्धांतः ॥२२॥

१७. भगवत् कार्यः परमकाष्ठापन्न वस्तु कृति साध्यः ॥ तादृशः अपि भगवद् रूपः ॥ यथा पुरुषस्य कर्म करण आदौ सामर्थ्यम् तेन स्व सामर्थ्येन अन्य अनुपजीवनेन स्व आत्मप्रपंचं कृतवान् इति फलितम् ॥ यथा घट आदिषु आमदशायाम् श्यामरूपेण आवि-

४२. विरह अनुभवार्थम् तु परित्यागः प्रशस्यते ॥ स्वीयबन्ध निवृत्ति अर्थम् वेषः सः अत्र न च अन्यथा ॥

४३. भावना साधनं यत्र फलम् च अपि तथा भवेत् ॥

४४. बहिः चेत् प्रकटः स्व आत्मा वह्निवत् प्रविशेद् यदि ॥ तदा एव सकलः बन्धः नाशम् इति न च अन्यथा ॥

४५. भगवान् फलरूपत्वान् न अत्र बाधक इष्यते ॥

४६. आत्मप्रदः प्रियः च अपि किम् अर्थम् मोहयिष्यति ॥

४७. क्लिश्यमानान् जनान् दृष्ट्वा कृपा-युक्तः यदा भवेत् । तदा सर्वम् सदानन्दं हृदिस्थं निर्गतं बहिः ॥

४९. सर्व आनन्दमयस्य अपि कृपा आनन्दः सुदुर्लभः ॥

४९. हरिणा ये विनिर्मुक्ताः ते मग्ना भवसागरे ॥

५०. संसार आवेश दुष्टानाम् इन्द्रियाणां हिताय वै ॥ कृष्णस्य सर्व वस्तुनि भूम्न ईशस्य योजयेत् ॥

५१. फलम् वा हि अधिकारः वा न कालः अत्र नियामकः ॥

५२. तदीयैः अपि तत् कार्यम् पुष्टौ नैव विलम्बयेत् ॥

-: षोडश ग्रन्था :-

भावे तथा व्यवहारः, पक्वे रक्तत्व व्यवहारः तद् रूपेण आविर्भावात् तथा इति ॥२३॥

१८. यदा स्व रति इच्छा तदा प्रपंच-रूपं स्वस्मिन् विलाप्य रमते ॥२४॥

१९. आत्मनः स्वरूपलाभः विद्यया, देहलाभः अविद्ययेति ॥ ३१ ॥

२०. निद्रावत् अविद्या अपगमे न जीवस्य जन्म मरणे ॥३३॥

२१. तदा तस्मिन् जन्मनि गृहीतानां देहादीनां विलय अभावम् आह ॥३४॥

२२. हरेः सेवया सर्वम् इति, भगवद् शास्त्रम् भगवतः मुखम् अग्निः, स्वस्य वाक्इन्द्रियम् अग्निः चेद्, भगवन् मुखत्वम् आपद्यते ॥३५॥

२३. तिरोहितस्य आविर्भावः ब्रह्मभावः ॥ सायुज्य ब्रह्मभावौ हरि सेवयैव भवतः, न आत्मन्य सेवया ॥३६॥

२४. अस्मिन् पक्षे न आनंद अंश आदेः तिरोभावः ॥३७॥

२५. तदा ज्ञानादय इति संति, ज्ञानादयः परम् वार्ता मात्रम्, न तु फलसाधकाः ॥३८॥

२६. पूर्वकल्पेषु जीव अंतर्यामिणः प्रवेशः, अस्मिन् कल्पे प्रविष्टस्य जीव अंतर्यामि भाव इति ॥३९॥

२७. साक्षात्कारः तु ब्रह्म आधीनः ॥ प्रसन्नं तद् आविर्भवति इति लोकरीति अवगम्यते ॥ आविर्भा-वार्थम् प्रेम सेवाम् निरूपयंति ॥ ४२ ॥

२८. स्वामित्व अर्थम् अक्षि स्थितः, फलार्थम् सर्व देहस्थित, आनंद-मयः वैश्वानरः शिरसि प्रतिष्ठितः सर्व अर्थ इति ॥४३॥

२९. आनंदः ब्रह्मवादे आकार समर्पकः ॥४४॥

३०. शुद्धानां ब्रह्म उपदेश इति अलौकिक उपदेश साधकत्वं न व्यभिचरति तद् आह ॥४७॥

३१. सेवकम् एव पूर्वम् तथा भृतम् तत्र अपि कृपयैव तत्र अपि कृष्ण एव कर्ता साधनम् व्यापारः च उक्तः ॥४८॥

३२. अतः केवल तीर्थ आदि आश्रयम् परित्यज्य यथा भगवति स्नेहो भवति तथा यत्नम् कुर्याद् इति आह ॥४९॥

३३. साधनं भक्तिः मोक्षः साध्यः ॥ तत्र हेतुः यः विमुच्यते स संघातं परित्यज्य ब्रह्मणि लीयते, ब्रह्म-भावम् वा प्राप्नोति ॥ तस्य स्वरूप आनंदः स्वरूपेण वा

आनंद अनुभवः ॥ स्वतंत्र भक्तानाम् तु गोपिका आदि तुल्यानां सर्वै इन्द्रियैः तथा अन्तःकरणैः स्वरूपेण च आनंद अनुभवः ॥ अतः भक्तानां जीवन्मुक्त अपेक्षया, भगवद् कृपा सहित गृह आश्रम एव विशिष्यते ॥५०॥

३४. भगवद् शास्त्र व्यतिरिक्तानि मोह अर्थानि ॥ भगवद् कृपया तदैव भागवते शास्त्रे विश्वासः ॥ ततः तद् अनुसारेण प्रवृत्तः सत्यं फलम् प्राप्नोति इति अर्थः ॥५२॥

३५. अणु अपि ब्रह्म व्यापकम् भवति ॥ अलौकिकेषु धर्मेषु प्रमाणम् एव अनुसर्तव्यम्, न लौकिकी युक्तिः ॥५४॥

३६. अलौकिकम् तत् प्रमेयम् इति ॥ ६२ ॥

३७. स्वार्थम् सर्वज्ञत्वम् लिंगम् परार्थम अलौकिकम् तेज इति ॥ तस्मात् स्वतंत्र भक्तिः अर्थम् सायुज्यादि अर्थम् च सर्वथा भजनं मतम् ॥६४॥

३८. ब्रह्म इति धर्मि निर्देशः परब्रह्म वाचकः ॥६५॥

३९. यदा स्वस्मिन् रमते तदा प्रपंचम् उपसंहरति ॥ यदा प्रपंचे रमते तदा प्रपंचं विस्तारयति ॥६८॥

४०. चक्षुः न स्व सामर्थ्येन भगवंतं विषयो करोति ॥ किं तु भगवद् इच्छयैव मां सर्वे पश्यंन्ति इति, एतद् रूपया तद् दृश्यम् ॥७२॥

४१. परम् चक्षुः न स्पृशति अन्यथा परत्वम् एव न स्याद् इति ॥ इच्छा तत्र गुरुस्थानीया ज्ञेया ॥ दर्शने हेतुम् आह ॥ अन्यथा उक्त वैपरीत्येन तद् अनुग्रह तद् इच्छाभ्याम् दृक् परम् हरिम् स्पृशेद् इति अर्थः ॥७५॥

४२. भगवांस्तु सर्व आत्मा सर्वनियंता मूलकर्ता इति न सगुणः ॥७७॥

४३. आत्मानं बहिर्मुखः संसारिणं मन्यते ॥ तस्य च मोक्षः तेनैव विद्यावत्त्वेन कल्पित गुरुः उपदेश वाक्याद् इति ॥७९॥

४४. फलम् वैमुख्यत इति । भगवद् वैमुख्यात् तमः भावि ॥८०॥

४५. तत्र च तादृशं प्रदर्शन सामर्थ्य रूपम् मंत्र आदीना कर्तृत्वम् नटे वर्तत एव इति आह ॥८६॥

४६. वाचम् अग्नौ स वक्तव्याम् इति आदिना प्रापणेन तद् अंशमात्रस्य लयः भिन्नः भवति इति ॥ अयं लयः रूपांतरापादकः कार्य-

रूपः । उत्पत्तिः एव न लय इति भावः ।।९७।

४७. प्रेम्णा श्रवण आदि प्रकारेण यः भजते स भक्तिमार्ग उत्तमः ।।१०१।।

४८. शास्त्र अर्थ ज्ञान अभावे अपि प्रेम्णा भजने मध्यमः ।। प्रेम अभावे मध्यम इति वा ।। उभय अभावे श्रवणादीनां पापनाशकत्वं धर्मत्वं वा ।।१०२।।

४९. मार्ग अंग अभावे केवल श्रवणादीनां यत् परम् पुरुषार्थ साधकत्वम् निरूप्यते तद् भगवतः स्तोत्र निरूपणं धन्यः अहम् इति आदिवत ।। प्रमेय बलेन तेषाम् सिद्धिः भवति चेत् भवतु न अन्यथा इति अर्थः ।।१०३।।

५०. तत्वसूत्राणि चतुः लक्षणी मीमांसा तैः सर्वैः अपि ज्ञानं प्रेमसहितं कर्तव्यम् इति निर्णयते ।। अन्यथा चतुःदशविद्यानां सरस्वतीरूपत्वाद् एकनिष्ठता न स्यात् ।। अयम् अर्थः सरस्वती भर्त्रैव ज्ञायत इति हरिणेति उक्तम् ।। १०४ ।।

५१. इश्वर इच्छया अन्तिम् जन्मनि जाता : शरीरम् गृहीतवंतः। २

५२. कलिकाल स्वभावतः सर्वोत्कृष्टः स्व अल्प साधनेन अपि महाफलप्रदः। १५

५३. हरेः सेवया सर्वम् इति भगवद् शास्त्रम् । ३५

५४. स्वस्य वाक् इन्द्रियम् अग्निश्चेद भगवद् मुखत्वम् आपद्यते ।३५

५५. सायुज्य ब्रह्मभावौ हरिः सेवयैव भवतो न अन्य सेवया। ३६

५६. स्वतंत्र भक्तानां तु गोपिकादि तुल्यानां सर्व इन्द्रियैः तथा अन्तः करणेः स्वरूपेण च आनंद अनुभवः । ५०

५७. चक्षुः न सामर्थ्येन भगवन्तं विषयी करोति । किन्तु भगवद इच्छयैव, मां सर्वे पश्यन्ति इति एतद् रूपया तद्र क्ष्यम् । ७२

५८. चक्षुः न स्वसामर्थ्येन भगवन्तं विषयी करोति । किन्तु भगवद्र इच्छयैवमां सर्वे पश्यन्ति इति एतद रूपया तद् दश्यम् । ७२

५९. यथा भगवान जगद कृतवान् तथा स्वार्थम् भक्तिमार्गमपि पृथक कृतवान् विभूति रूपेषु साधनानि फलानि च व्यवस्थया कृतानि पूर्णफलदानं च स्वस्मिन्। १३

६०. भगवद व्यतिरिक्ताः सर्व एव कालपर्यन्तम् सगुणाः । १४

६१. ते हि अलौकिक द्रष्टार एवं मायावाद अनुसारेण शास्त्रेकृते लोका भगवद् वहिर्मुखा भविष्यन्तीति । १९

६२. पूर्व कल्पेषु जीव अन्तर्यामिणे प्रवेशः । अस्मिन् कल्पे प्रविष्टस्य जीव अन्तर्यामि भाव ' इति ।१९

६३. आनन्दो ब्रह्मवादे आकार समर्पकः । अत एव एरूपेषु अपि सर्वान्तर आनन्दमयो निरूपितः । ४४

६४. ये सात्विका देव्यां सम्पदि जाता विद्युपजीविनः सर्वदा तेषां भुक्ति भविष्यति न अन्येपटमिति ज्ञापितम् । ४६

६५. हरि भजनेअपि कदाचिद् मोक्षो न भवेद् इति आशकां परित्यज्य दृढविश्वासं कृत्वा श्रवणादिभ्यो हेतुभ्येः श्रवणादिभिः भजेतु । ४९

६६. अतो भक्तानां जीवन्मुक्त्यपेक्षया भगवद कृपासहित गृहाश्रम् एव विशिष्यते । ५१

६७. भगवद आवेशे भगवद धर्मा व्यापकत्वादयस्तम श्रूयन्ते । न तु जीवो व्यापकः। ५३

६८. दष्टिस्तु या भगवन्तम् पश्यति, दिव्या ज्ञान दष्टिश्रया तथा न अन्यथा तदर्शनम् इति अर्थ : । ५९

६९. तस्मात् स्वतंत्र भक्तयर्थम् सायुज्यार्थम् च सर्वथा भजनं मत्रम् । ६४

७०. वाक्यानां सरस्वती रूप त्वात् कथंन एकवाक्यता इति आशंक्याह ना नावाद अनुरोधि तदिति । ७०

७१. आविर्भावो अवतारोमतस्यादिरूपेण प्राकरयम् तिरोभावो अवतार समाप्ति । ७२

७२. ब्रह्माणि स्फुरितो ब्रह्मत्वं सम्पादयती त्यर्थः। ७४

७३. तद् अनुग्रहतदिच्छा तभ्यां दक परं हरिम् स्पृहोद इति अर्थः । ७९

७४. तस्माद वाचारम्भणवाक्याति जगतो मिथ्यो मिथ्योत्वाप न कल्पन्ते । ८३

७५. दर्शन न्याय श्रुतिभिर्न जगतो मिथ्यात्वमिति भावः । ८६

निबंध सर्वनिर्णय भागवतार्थ



१. धर्म स्वरूपेणैव फलदानं भविष्यति इति आशंक्य इश्वर रूपेणैव फल-दानम् इति आह ॥स० नि० १॥

२. प्रमेयं द्विविधम् प्रमाण अनुरोधि स्वतंत्रम् च इति ॥ स० नि० २ ॥

३. साध्यरूपः स एव हरिः साधन-रूपोपि ॥ यदि यावत उक्तम् कर्तव्यम् नियत फलम् तत् नित्यं न तु फल रहितम् ॥ कामनायाम् एव फलदम् विकृतत्वात् स्वभावतः न नित्यफलम् प्रयच्छति ॥ स० नि० ३ ॥

४. भगवद् आनंद रूपम् फलम् ब्रह्म-ज्ञानयुक्तस्य यथा उक्त कर्म कर्तुः एव ॥ मर्यादायाम् क्रममोक्ष एव फलम्, सद्यो मुक्तिः तु अति कृपया ॥ स० नि० ४ ॥

५. ज्ञान अभावेन केवल कर्मकरणम् प्रवृत्तिमार्गः ॥ स० नि० ६ ॥

६. अत एव स्वर्गशब्दः स्वसाधने भग-वता प्रयुक्त इति आह ॥ तत् सत्त्वतः भवेत् ॥ स्वर्गः सत्त्वगुण उदय इति ॥ सत्त्वगुणात् वा उदयः यस्येति ॥ स० नि० ७ ॥

७. तैः स्वभावत एव शुद्धिः संपाद्यत इति भोजने तृप्तिवत् न कामनाम् अपेक्षते ॥ स० नि० ८ ॥

८. परोक्ष कथनस्य अपि प्रयोजनं, बाल अनुशासनम् ॥ तेषाम् अज्ञ-

शासनम् रुचिः उत्पादनम् एव ॥ स० नि० ९ ॥

९. रूपं तद् एव विकृतेः किंचित् साधनम् अन्यथा ॥ विकृताद् हि हरेः किंचिद् विकृतम् फलम् ईर्यते ॥ स० नि० १२ ॥

१०. नहि एकस्य कर्मणः फलद्वयम् संभवति ॥ नित्यस्य अविकृतस्य भगवतः रूपस्य सिद्धिः निष्पत्तिः वेदेन बोध्यते ॥ स० नि० १४ ॥

११. ज्ञान साध्यत्वम् धर्मयोग एव इति गतम् ॥ स० नि० १६ ॥

१२. अंतःकरण प्रसादाय जीव अंतर्यामिणौ पूर्वम् एव हृदये प्रविष्टौ भोग भोजनार्थम् तद् अनुभोगेन मालिन्यं चित्ते जातम् न अंतः-स्थितेन दूरीकर्तुम् शक्यम् अतः बहिः स्थितेन प्रवेश समर्थेन तद् दूरीकर्तव्यम् इति श्रुति निर्माणम् इति अर्थः ॥ स० नि० १८ ॥

१३. यथार्थम् श्रुत्वापि ते यदा व्याचक्षते तदा स्वरुच्या वेद अर्थम् वर्णयंति स्वभाव गुणानां भेदात् ॥ श्रुति अर्थः बहुधा उदित इति ॥ स० नि० २० ॥

१४. उपक्रम आदि प्रकरण अर्थस्य भावस्य अज्ञानात् केवलम् वाक्य अर्थम् एव अनुभूय क्रियामात्रं वेदार्थ इति केचिद् आहुः ॥ अतः कर्ममार्ग वक्तॄन् अनुसरति ॥ स० नि० २१ ॥

१५. आधुनिकानाम् तथा सामर्थ्य अभावात् शाखा प्रणयनम् । तत्र अपि एका मूर्तिः यावता वेदभागेन निरुक्ता भवति तावतः अपि अध्ययनं दुर्लभम् इति प्रथमतः चतुर्धा मूर्त्तेः चतुर्धाः अंशो यावता प्रतिपाद्यते तावंतं व्यासः पृथक् कृतवान ॥ स० नि० २६ ॥

१६. ब्रह्मादीनाम् ऐच्छिक एव आधुनिकानां व्यवस्थित इति अर्थः ॥ स० नि० २७ ॥

१७. वेदवत् न स्मृतिनिर्णयः ॥ अत्र वेदः अपि मूलम् व्यवहाराः अपि इति तद् आह । स्मरणं स्मृतिः ॥ स० नि० ३३ ॥

१८. तस्य स्मरणस्य अनुभव एव मूलम् ॥ स तु अनुभवो बहुधा जायत इति आह ॥ व्यासादिभिः अपि सर्ववेदद्रष्टृभिः अपि अनुमानत्वेन निरूपणात् ॥ अतः स्मृतिः अनुमेय एव वेदः भवति इति नित्य अनुमेय एव वेदः मूलम् ॥ अन्यथा वेदव्यासः

" स्मृतिः च " इति न वदेत् ॥ विद्यमाने प्रत्यक्षे वेदे किम् इति हि अंतरिताम् उदाहरेत् ॥ स० नि० ३४ ॥

१९. तस्माद् आहिताग्निः न अनृतम् वदेत् इति । न हि आहिताग्नेः अनृत निषेधकम् सर्वेषाम् भवति ॥ देहस्थानीयः वैदिकः धर्मः ॥ गृहस्थानीयः स्मार्तः ॥ स० नि० ३५ ॥

२०. नित्य अनुमेय वेद मूलिकायाः स्मृतेः अर्थम् आह ॥ आदि शब्देन वैश्वदेवादिकम् अपि गृह्यः उक्तम् अखिलम् इति यावत् ॥ स० नि० ३६ ॥

२१. संस्कार पक्षे वेदः मूलम्, पृथक् पक्षे आचारं इति ॥ स० नि० ४० ॥

२२. अग्निः आदि सर्वम् श्रौत स्मार्तयोः भिन्नम् विजातीयं च ॥ मुख्ये काल बलिष्ठत्वात् श्रौतम् एव कर्तव्यम्, अतः कालस्य निमित्तस्य अभावात् स्मार्तम् न कर्तव्यम् ॥ स० नि० ४४ ॥

२३. श्रौतः धर्मः देह स्थानीयः ॥ स्मार्तः गृहस्थानीयः ॥ उपकरणस्थानीयः पौराणिक इति ॥ स० नि० ४८ ॥

२४. श्रुति स्मृति उभे नेत्रे पुराणं हृदयं स्मृतम् ॥ भावस्य ज्ञानं पुराणात् ॥ स० नि० ४९ ॥

२५. तामसकल्पेषु शिवात् सृष्टिः ॥ राजसेषु ब्रह्मणः ॥ सात्त्विकेषु विष्णोः ॥ स० नि० ५२ ॥

२६. तत् कल्प अनुसारि पुराणः उक्त धर्म आचरणात् मुक्तिम् आप्नोति, तादृशः अधिकारी न तु पाषंड आदि धर्मैः इति अर्थः । अन्येषु तामसेषु जन्म दुःखम् च भवति, न सुखम् न अपि मोक्षः ॥ राजसेषु तु सुखम् न दुःखम् न अपि मोक्षः यथा उक्त धर्म कर्तृणाम् ॥ स० नि० ५३ ॥

२७. सर्वेषु कल्पेषु कल्पांतरः उक्ताः धर्माः पुरुषार्थां वा परिग्राह्याः ॥ यदि तत् कल्प अनुसारिणः जीवा भविष्यंति यथा तीर्थे नानादेश वासिनाम् ॥ राजसादीनां प्रकारांतरेण पुराणं न हृदयारूढं भवति ॥ अतः तेषां केवल लौकिकत्वे कल्पांतरे तेषां तामसत्वात् राजसः उच्छेदः स्यात् । राजसधर्म अनुष्ठाने च उत्तरत्र सात्त्विकत्वं संपद्यते ॥ अति तामसत्व निवृत्त्यर्थम् उतरपार्थम् च तामसानि पुराणानि इति अर्थः ॥ स० नि० ५४ ॥

" स्मृतिः च " इति न वदेत् ॥ विद्यमाने प्रत्यक्षे वेदे किम् इति हि अंतरिताम् उदाहरेत् ॥ स० नि० ३४ ॥

१९. तस्माद् आहिताग्निः न अनृतम् वदेत् इति । न हि आहिताग्नेः अनृत निषेधकम् सर्वेषाम् भवति ॥ देहस्थानीयः वैदिकः धर्मः ॥ गृहस्थानीयः स्मार्तः ॥ स० नि० ३५ ॥

२०. नित्य अनुमेय वेद मूलिकायाः स्मृतेः अर्थम् आह ॥ आदि शब्देन वैश्वदेवादिकम् अपि गृह्यः उक्तम् अखिलम् इति यावत् ॥ स० नि० ३६ ॥

२१. संस्कार पक्षे वेदः मूलम्, पृथक् पक्षे आचारः इति ॥ स० नि० ४० ॥

२२. अग्निः आदि सर्वम् श्रौत स्मार्तयोः भिन्नम् विजातीयं च ॥ मुख्ये काल बलिष्ठत्वात् श्रौतम् एव कर्त्तव्यम्, अतः कालस्य निमित्तस्य अभावात् स्मार्तम् न कर्तव्यम् ॥ स० नि० ४४ ॥

२३. श्रौतः धर्मः देह स्थानीयः ॥ स्मार्तः गृहस्थानीयः ॥ उपकरणस्थानीयः पौराणिकः इति ॥ स० नि० ४८ ॥

२४. श्रुति स्मृति उभे नेत्रे पुराणं हृदयं स्मृतम् ॥ भावस्य ज्ञानं पुराणात् ॥ स० नि० ४९ ॥

२५. तामसकल्पेषु शिवात् सृष्टिः ॥ राजसेषु ब्रह्मणः ॥ सात्त्विकेषु विष्णोः ॥ स० नि० ५२ ॥

२६. तत् कल्प अनुसारि पुराणः उक्त धर्मं आचरणात् मुक्तिम् आप्नोति, तादृशः अधिकारी न तु पाषंड आदि धर्मैः इति अर्थः । अन्येषु तामसेषु जन्म दुःखम् च भवति, न सुखम् न अपि मोक्षः ॥ राजसेषु तु सुखम् न दुःखम् न अपि मोक्षः यथा उक्त धर्म कर्तॄणाम् ॥ स० नि० ५३ ॥

२७. सर्वेषु कल्पेषु कल्पांतरः उक्ताः धर्माः पुरुषार्थाः वा परिग्राह्याः ॥ यदि तत् कल्प अनुसारिणः जीवा भविष्यंति यथा तीर्थे नानादेश वासिनाम् ॥ राजसादीनां प्रकारांतरेण पुराणं न हृदयारूढं भवति ॥ अतः तेषां केवल लौकिकत्वे कल्पांतरे तेषां तामसत्वात् राजसः उच्छेदः स्यात् । राजसधर्म अनुष्ठाने च उत्तरत्र सात्त्विकत्वं संपद्यते ॥ अति तामसत्व निवृत्त्यर्थम् उत्कर्षार्थम् च तामसानि पुराणानि इति अर्थः ॥ स० नि० ५४ ॥

२८. सात्त्विकानां नैर्गुण्यं तेन च मोक्षः ॥ तत्र साधनता सर्वथा भगवत् संबंधेन एव अवच्छिद्यते न तु ज्ञानित्वेन भक्तत्वेन वा ॥ स० नि० ५५ ।

२९. एकस्मिन् कल्पे सहस्रं व्यासा भवंति तेषाम् द्वापरांते अधिकारः । ततः पुनः कुतौ सर्वविद्यानां पूर्णता ॥ पुनः अन्यस्य व्यासार्थम् द्वापरांते निवेशनम् इति । अतः ते स्व चतुर्युग वार्ताम् एव कथयंति इति न दोषः ॥ स० नि० ५६ ॥

३०. अनेन भजन व्यतिरेकेण भागवत अर्थः न अवगम्यत इति सूचितम् ॥ स० नि० ६० ॥

३१. भगवद् इच्छया तद् अर्थम् अंश अवतारणात् प्रयोजनम् आह ॥ ततः परम् रूपलीला तिरोभाव अनंतरम् नामलीलया क्रीडाम् कर्तुम् व्यास अवतार इति अर्थ ॥ स० नि० ६१ ॥

३२. वेद पुराणयोः विद्यमानत्वे जीवैः अपि कर्तुम् शक्यत इति किम् व्यास अवतारेण इति आशंक्य आह ॥ यत्र व्यासस्य अपि अज्ञानम् तत्र जीवानाम् का वार्ता, इति निरूपयितुम् अनिर्वृति भारत निर्मागम् च उक्तम् ॥ ततः भगवद् इच्छया व्यवधायके अपगते भागवतम् कृतम् इति अर्थः ॥ स० नि० ६२ ॥

३३. भगवति वेदार्थ एव परम् गुप्तः ॥ भगवद् इच्छया यदा पुनः सर्व उद्धार अर्थम् प्रयत्नम् कृतवान्, तदा परंपरया अभावात्, न अन्यैः व्यासैः वक्तुम् शक्यत इति व्यास अवतारः ॥स० नि० ६३॥

३४. वेद अर्थ अनुष्ठाने सिद्धे वेदः सफलः भवति, न तु स्वार्थ अनुष्ठानं संपादयितुम् शक्तः ॥ अतः स्व निर्वाहे कुंठितः । अभ्यासमात्रेण एव तद् अर्थ अनुष्ठान अभावेपि लोको मुच्यते ॥ परम् अत्र एकः दोषः तद् उपजीवनम् इति ॥ वृत्तिः ॥ अर्थम् उपायः न कर्तव्यम् ॥ स० नि० ६७ ॥

३५. एतेषां सामान्य फलम् वेद रक्षा सा च त्रिविधा ॥ वैदिक शब्दा विसदृशा इति भद्रम् कर्णेभिः इति आदौ पंडितैः अन्यथा करणम् संभवति, तत् निराकृत्य स्वरूपतः रक्षणीयः अर्थतः अपि रक्षणीयः ॥ स० नि० ७२ ॥

३६. क्रियारूपे धर्मे प्रविष्टो धर्मी यज्ञ एकः ॥ तथा ज्ञानरूपे धर्मे

प्रनिष्ठो धर्मी ब्रह्म द्वितीयः ॥ ज्ञान क्रिया उभययुतः कृष्णः तृतीय इति त्रयो भेदाः ॥ स० नि० ८९ ॥

३७. अस्य प्रमेय सिद्ध्यर्थम् प्रमेय बल विचारेण प्रमाणम् आह ॥ विशिष्टे वाचकम् इति ॥ स० नि० ९० ॥

३८. भक्ति शब्दस्य प्रत्यय अर्थः प्रेम ॥ धातु अर्थः सेवा ॥ स० नि० ९२ ॥

३९. भगवान् यदा येन रूपेण कार्यम् कर्तुम् इच्छति, तद् रूपम् एव व्यापारयति, तत्र ज्ञानेन मोक्षः देय इति यदा विचारयति तदा अक्षरम् एव ब्रह्म स्वरूपम् पुरुषोत्तमस्य आधार भागः चरण स्थानीयः तम आदौ चतुर्मूर्तिम् करोति । अक्षर रूपम् ब्रह्मरूपम् कालरूपम् स्वभावरूपम् च ॥ स० नि० ९८ ॥

४०. आदि शब्देन आधिदैव आधिरूपेषु इति ॥ स० नि० १०२ ॥

४१. भक्ति मार्गे तु आरंभत एव परमानंदः । ज्ञानमार्गे तु अंततः इति विशेषः । स० नि० १०३ ॥

४२. तथापि ज्ञान मार्गे अक्षरम् एव सेव्यम् ॥ स० नि० १०४ ॥

४३. स बहिर्मुखानाम् बहिः व्यवहारे पूर्वे उक्त प्रकार एव, ज्ञानिनां तु सच्चिदानंद रूपः भगवान् अपि कदाचित् तद् रूपः भवति इति । अतः सच्चिदानंद रूपः अंतः प्रकटः ॥ स० नि० १०६ ॥

४४. मुख्यः अयम् अधिकारी तेन सर्व अपेक्षया भगवत् सेवकेषु अयम् अंतरंगः ॥ अस्य महत्त्वाय सेवकान् उपासना प्रकारम् च आह ॥ आसुरादिमते तस्माद् इति ॥ स० नि० १०८ ॥

४५. यथाकालः रूपम् अक्षरस्य तथा कर्म अपि । परम् एतावान् विशेषः कालः स्वत एव प्रकटः, अयम् तु पुरुषैः विधिनिषेध प्रकारेण प्रकटी क्रियते ॥ अयम् च क्रियारूपः धर्मिणः धर्मे प्रवेशात ॥ कालवत् न स नित्यप्रकटः किंतु फलदान पर्यंतम् एव इति आह । ११० ॥

४६. भगवद् इच्छारूपेण प्रकटः भवति न सच्चिदानंद रूपेण ॥ तस्य स्वरूपम् व्यवहारः उपयोगि आह ॥ यथा स्वभाव दुष्टानाम् ज्ञानादिकम् तिरस्कृत्य स्वरूपेण प्रकटः तद् आह ॥ एतस्य कार्यवत् स्वरूपम् मा भवतु इति आह ॥ हरेः तनुः इति ॥ स० नि० ११३ ॥

४७. विरोधि गुण प्रादुर्भावे पूर्व-स्वभावः निवर्तते अन्यः च उदेति ॥ तथा मंत्रशास्त्र दिभिः अपि ॥ स्वभावस्य परिणाम एव कार्यम् ॥ स० नि० ११४ ॥

४८. सद् अधिभूतम्, चिद्आध्यात्मकम् आनंदः अधिदैवम् इति ॥ देहः अधिभूतम, जीवः अध्यात्मा । ईशः अंतर्यामी अधिदैवः ॥ स० नि० ॥ १२० ॥

४९ यथा सारथी रथी तद् अंतः स्थितः च तथा अंतर्यामि अक्षरम् कृष्णः । स० नि० १२१ ॥

५०. महत् तत्त्वम् आधिदैविक स्थानी-यम् द्वितीयम् ब्रह्म शरीरम् ॥ तृतीयम् अस्मदादीनाम् चित्तम् ॥ स० नि० १२२ ॥

५१. अत एव जीवस्य अपि न स्वातं-त्र्यम् गुण आधीनत्वात् । स० नि० १३७ ॥

५२. नित्या भगवद् रूपा भगवद् धर्माः ॥ अनित्याः कार्य रूपा मनोधर्मा इति ॥ स० नि० १३९ ॥

५३. अतः धर्मी सदातनो वक्तव्यः । स भगवान् एव भवति न अन्य इति ॥ भक्त्यैव भगवान् आविर्भ-वति तत् च यस्य भक्तिः आवि-र्भावः ॥ सा भक्तिः यादृशी देश कालयुक्ता तत् तिरोभावे तिरोभवति न तु अवतारेषु अपि अन्यः प्रकार इति अर्थः ॥ स० नि० १४० ॥

५४. तत् तद् आकार स्वरूपेण घट पट आदि आकारेण यस्मिन् देशे येन प्रकारेण येन साधनेन यथा आविर्भावे इच्छा तथा सर्वम् संपाद्य आविर्भवति इति अर्थः ॥ स० नि० १४१ ॥

५५. तिरोभविष्याम् इति या इच्छा यथा येन तथा तत्र तिरोभवति परं तत्र रूपांतर आविर्भाव आवश्यकत्वम् ॥ स० नि० १४२ ॥

५६. व्यवहारः सन्निपात इति ॥ सर्व प्राणि साधारणो व्यवहारो लौकिक एव ॥ स० नि० १४८ ॥

५७. अस्मिन् मते तु वर्णा अपि अर्थ-वंतः " वेद अक्षराणि यावंति " इति वाक्यात् ॥ सर्वेषां वर्णानां सर्व एव वाच्यः ॥ तथा पदानाम् ॥ तत्र हेतुः, भगवद् वाचकत्वत इति ॥ भगवान् सर्वम् इति भगवान् वाच्य इति सर्वे वर्णाः पदानि च सर्व वाचकानि इति

वस्तुस्थितिः तथापि व्यवहार अर्थम् क्रियाशक्ति संकोचः कृतः ॥ अत्र देशकालविभेदेन अस्माभिः उच्चार्यमाणो अयम् शब्द इमम् एव अर्थम् बोधयतु न तु अन्यम् इति संकोचः ॥ स० नि० १५३ ॥

५८. तथा वाक्ये अपि पदम् न वाचकम् तर्हि संकेत आग्रहे अपि वाक्य अर्थं ज्ञानम् स्यात् । वाक्य अवयव भूतस्य पदस्य स्वतंत्रपद तुल्यत्वात् पदार्थ स्मारकत्वम् ॥ अन्यथा स्वार्थम् प्रतिपाद्य कृतार्थत्वे वाक्य अर्थः न तैः जन्येत ॥ अविद्यमानानाम् वा कथम् बोधकत्वम्, वाक्यार्थ समाख्याविरोधः च । अतः वाक्यम् एव वाचकम् इति आह ॥ स्व अवयवैः स्व अन्वयत्र अर्थम् इति चकार अर्थः ॥ स० नि० १५६ ॥

५९. वाक्यानाम् अनंत्यात् संकेतग्रहः दुर्लभ इति आशंक्य आह ॥ पद आंतर प्रवेशेनेति ॥ स० नि० १५९ ॥

६०. तथा महावाक्ये अवांतर वाक्यानाम् अवाचकत्वम् ॥ किंतु पूर्ववत् स्मारकत्वम् एव ॥ एवम् अवांतर भेदेन सर्वम् निरूप्य संपूर्णवेद एकम् वाक्यम् तद् अर्थो अपि एक एव इति आह ॥ वाक्यम् एक मिति ॥ वाक्यार्थ रूपधृगिति । स० नि० १५८ ॥

६१. क्वचित् काव्य आदौ वैदिकतुल्यता भासते तथापि न वेदत्वम् इति आह ॥ सादृश्येपि न वेदत्वम् इति ॥ स० नि० १६० ॥

६२. सर्वत्र वेदे भगवान् एव अर्थ इति आह ॥ प्रत्येकम् पूर्णता वाक्य इति ॥ महावाक्य अर्थरूप एव हरिः न अवांतर वाक्यार्थ रूप इति निराकरण अर्थम् पूर्णता निरूप्यते ॥ मंत्र मात्रे सिद्धार्थे अपि तत्र हेतुः ॥ तत् तत् स्वरूपेण इति ॥ स० नि० १६१ ॥

६३. बुद्ध्या रचनाम् कृत्वा उच्चारयति इति ॥ यथा न्यायमते तद् उच्चारितः शब्दः तदैव नष्टः, सादृश्यभ्रमात् एव तदीय व्यवहार इति तथा सति तदीयत्व अभावात् लोके वेदे च महत् दूषणम् ॥ न तथा अस्मन् मते नित्यत्वात् ॥ उत्पन्नानाम् च बहुकालं स्थितत्वात् च इति आह ॥ स० नि० १६३ ॥

६४. शब्द तन्मात्रा रूपः ध्वनिः । वर्णः

तु नामसृष्टौ ॥ उभय अत्र अपि शब्द पद प्रयोगः परम् ॥ स० नि० १६७ ॥

६५. लौकिक वाक्यानाम् लय प्रकारम् आह ॥ संस्कार मात्र विलयात् इति । वस्तुतः तु न विलयः॥ अयम् अपि पक्षः भगवद् वाक्येषु न अस्ति इति आह ॥ स० नि० १६९॥

६६. अस्मदादि मुखेन अपि क्रीडाअर्थम् सर्वतः हरिः ॥ शब्दभेदम् वितनु ते रूपेषु इव विनिश्चयः ॥ वस्तुतः तु सर्वम् वेद तुल्यं इति आह ॥ अस्मदादि मुखेन अपि इति ॥ सर्वम् वाक्यम् भगवत् कर्तृकम् एव ॥ स० नि० १७० ॥

६७. तस्मात सर्वम् एव वाक्यम् प्रमाणम् यतः सा सरस्वती सर्वतो मुखी ॥ स० नि० १७३ ॥

६८. वाक्रूपः पतिः भगवान् । अधुना विकारवत पदानाम् अर्थ द्वयम् निरूपयितुम् भगवति भेदान् आह ॥ स० नि० १७४ ॥

६९. एवम् सर्वत्रः हि अहम् ॥ तत्र पद भेदः शास्त्र अर्थः ॥ तादृश प्रयोगे फलम् आह ॥ स० नि० १७५ ॥

७०. तादृश धर्मि रूपेण धर्मिण एव उपचारात् ॥ धर्मस्फुरणम् तु धर्मि-ज्ञानाद् एव ॥ प्राकट्येति ॥ स० नि० १७६ ॥

७१. फलमुख प्रवृत्तिः चेत् मर्वान् एव प्रवर्तयेत् ॥ ततः च नरकादिकम् न भवेत ॥ अतः दृष्ट अदृष्ट अरिष्ट दर्शनात् न वेदः प्रवर्तकः ॥ स० नि० १८० ॥

७२. सर्वासु योनिषु सर्वेषु जीवेषु सुख दुःखयोः तुल्यता पुरुषः स्वभ्रमात् एव तारतम्यं पश्यति ॥ स० नि० १८२ ॥

७३. एकम् शास्त्रम् देवकी पुत्र गीतम् इति पूर्व प्रतिज्ञातत्वात् तत् शास्त्रम् ब्रह्मवादः ॥ स० नि० १८४ ॥

७४. ब्रह्म आनन्दः अक्षर आनन्दः ॥ स० नि० १८९ ॥

७५. ज्ञानिनः देहस्य तद् तद् आश्रम स्थितिः प्रतिपत्तिः अवश्यम् कार्या तद् अभावे पुनर्जन्म भवेत् ॥ दाह अभाववत् ॥ स० नि० १९२ ॥

७६. न केवलम् अत्र नियम एव ॥ किंतु अन्यैः अपि नियमाः संति इति आह ॥ गुरुसेवा इति ॥ स० नि० १९४ ॥

७७. तिरोधान नाशः ब्रह्मभावः ॥ भक्तेः अपि स्व आश्रम धर्मसहित ज्ञान सहिताया एव तिरोधान नाशक-

त्वम् उक्तम् भवति ।। एषा भक्तिः माहात्म्यज्ञानपूर्वक परम स्नेहरूपा । तथा भूता सती भगवत् परिचर्या युक्ता भवेत् स्वतः पुरुषार्थ सेवा चेत् सा भक्तिः स्वतंत्र इति उच्यते ॥ तदा फलरूपायां तस्याम् स्व आश्रम आचारादि करणम् फल अनुभव प्रतिबंधकम् इति, फलत्वेन अनुभवे स्व आश्रम आचाराः त्यक्तव्याः ॥ यथा ब्रह्मभावम् गतस्य ॥ दुर्लभा इति । न स उच्यत इति ॥ स० नि० १९६ ॥

७८. बहिः संवेदन युक्त एव योगेन भगवंतं पश्यन् ज्ञाननिष्ठः अपि भूत्वा परम विरक्तः संन्यासी योगज्ञाने आमरणम् अभ्यस्यन् योगेन एव त्यक्त देहः चेत् क्रम मुक्तिम् प्राप्नोति ॥ स० नि० २०० ॥

७९. ब्राह्मणः स्वस्य वा अभक्तत्वे पुनरावृत्तिः ॥ स० नि० २०४ ॥

८०. अपेय पानेन नाडी शुद्धा भवति इति विमार्ग परिपोषिणे ।। पश्चात् जन्मांतरे ॥ स० नि० २०७ ॥

८१. भगवद् वाक्यस्य गतिम् आह ॥ फलांशे तु स्तुतौ इति ॥ विकर्मणा अन्यथा भावनात् च नरकः ॥ स० नि० २०९ ॥

८२. तस्माद् वेद अतिरिक्त मार्गाः स्वतंत्रा न फल साधकाः । किंतु अंगभावम् एव प्राप्य, या दृशम् प्रमेयम् वेद उक्तम् तादृशम् एव साधयंतः फलाय भवंति इति निष्कर्षः । स० नि० २१० ॥

८३. ततः मुख्यधर्म अभावात् न फलम् भगवद् भजनात् च न पातः किन्तु कथंचित् कलिम् तरिष्यति ॥ स० नि० २१५ ॥

८३. भगवन्मार्गे स्थितश्च यदि वेदानाम् अप्रामाण्यम् वदेत् कथंचिद् अपि तथा भगवन् नाम्नो नरक विरोधित्वात् न नरके पातः ॥ किन्तु तृतीयमार्ग साधनत्वात् हीनेषु जायते शूद्रादिषु संभवति ॥ अतो दृश्यते नीचयोनिषु भगवद् भक्तानां जन्म ॥ स० नि० २१६ ॥

८४. संस्कारवशात् भगवद् भजने जायमाने तस्मिन् देहे वेदादीनां स्मरण अभावात् निदाभावे तुष्टः सन् भगवान् मोचयेत् इति अर्थः ॥ संस्कारस्य दुर्बलत्वे ज्ञान अभावात् संसारे अभिनिवेशः भवति ॥ स० नि० २१७ ॥

VIBRANT PUSTAK VADODARA

८५. अन्तर्बहिः सर्वत्यागः ॥ स्वामित्वेन कृष्ण एव सर्वदा मनोनिवेशनम् ॥ अभ्यासेन तद् भवति॥ एवम् देहपात पर्यन्तम् कृष्णैकमानसस्य सायुज्यम् शिघ्रम् एव भवति ॥ काय वाक् विनियोग अभावेपि स्वरूपेह अभावेपि मनोमात्रस्थितौ फलम् एतद् इति अर्थः ॥ स० नि० २१८ ॥

८६. प्रेमयुक्तः तु ततः अपि दुर्लभः ॥ तत्र अपि सदा प्रेमप्लुतस्य भगवत् सायुज्यम् भवति इति किम् वक्तव्यम् इति अर्थः ॥ स० नि० २१९ ॥

८७. श्रवण आदि व्यतिरेकेण संस्कारवशाद् फलकामनया वा जायमाना प्रीतिः गौणी स्यात् ॥ श्रवणादिनाम् साधनत्वे प्रमाणम् गीता ॥ "भक्त्या तु अनन्यया शक्यः" इति साधन साध्यरूपाम् एकीकृत्य आह ॥ गीतायाम् अपि प्रामाण्यम् फल वाक्यात ॥ स० नि० २२० ॥

८८. प्रमाणम् भगवद् वाक्यम् वाक्येन प्रवृत्तः साधनम् असाधयन्नपि भगवता कृतार्थी क्रियते ॥ प्रमेय परिज्ञानम् च फल अनुभवरूपं साधनं च फलाद् अपि अधिकम् फलम् च ज्ञानकर्मादि साध्येभ्यः अपि अधिकम् इति ॥ अत एव अस्मिन् मार्गे पातभयम् न अस्ति, प्रमाण प्रवृतिम् आरभ्य भगवतः रक्षकत्वात ॥ तत्र स्व वाक्य अनुगतान् कथम् न मोचयेत् ॥ स० नि० २२२ ॥

८९. यो हि गुरुः सेवाम् उपदेक्ष्यति स स्वयम् चेत् ताम् उत्तमाम् जानीयात् तदा कथम् न स्वयम् कुर्याद् इति सेवा पर एव गुरुः ॥ भजनम् सर्वभावेन तदा तद् उक्त प्रकारेण भगवत् सेवा कर्तव्या ॥ स० नि० २२७ ॥

९०. यत्तु मूर्तौ कृतम् सर्वम् भगवति कृतम् भवति । वस्तु विचारेण सर्वस्य भगवद् रूपत्वात् विशेषस्तु अयम् एनम् उद्धरिष्यामि इति तदा मृदादेः प्रादुर्भूतः ॥ स० नि० २२८ ॥

९१. अनेन अवैष्णवैः सह अस्मिन् मार्गे न स्थातव्यम् इति उक्तम् भवति ॥ स० नि० २३१ ॥

९२. अनेन अल्प बहिर्मुखतायाम् अपि भागवतम् अनुसंधेयम् इति उपायः कथितः ॥ स० नि० २३२ ॥

९३. एतद् भजनम् आंतरम् मुख्यम् ॥ तत्र यथा बहिर्भजने प्रतिकूल परित्यागः तथा आंतर भजनेपि

प्रतिकूल परित्यागम् आह ॥ कृष्ण एव अस्मान् उपदिशति बहिर्मुख-तया न स्थातव्यम् इति अर्थः ॥ उत्तम गुरु द्वय शिक्षा च अनुसंधे-येति आह वैराग्यम् इति ॥ स० नि० २३३ ॥

९४. सापेक्षम् असमर्थम भवति इति मूलम् भगवद् अर्थे स्थापयित्वा साधन अभावात् वैकल्यम् जातम् अपि निवार्य चित्तम् भगवति एव स्थिरी कृत्य यथा पुत्रः पितरि मातरि विश्वासम् करोति, तथा दृढ विश्वासः लौकिक उक्त्या यथैव पूजा सिध्यति तथैव कर्त-व्यम् इति ॥ कायवाक् मनसां स्वभावतः प्रवृत्ताम् क्रियां त्यजेत् ॥ स० नि० २३५ ॥

९५. भगवद् सेवायाम् अपि क्लिष्टम न समर्पयेत् ॥ स० नि० २३६ ॥

९६. सेवा मुख्या न पूजा इति मंत्र मात्र पूजा परः न भवेत् इति आशयेन आह । स्वयम् परिचरेद् इति ॥ स० नि० २३७ ॥

९७. भगवद् भजनस्य मोक्षः फलम् ॥ स० नि० २३९ ॥

९८. भगवतः सकाशाद् मान अपेक्षाम् च वर्जयेत् ॥ स० नि० २४१ ॥

९९. सर्वथा तद् गुण आलापम् नाम उच्चारणम् एव वा ॥ सभायाम् अपि कुर्वीत् निर्भयः निःस्पृहः ततः ॥ स० नि० २४२ ॥

१००. केवल नाम उच्चारण आदेः कदाचिद् असाधकत्वम् अपि भवेद् इति मुख्यम साधनम आह ॥ स० नि० २४३ ॥

१०१. एवम् कुर्वन् सकुटुंबः भगवत् सायुज्यम् अश्नुते ॥२४६॥

१०२. स्वतः प्रवृत्ति रहितानि इंद्रियाणि बलाद् भगवति नियोज्यमानानि विक्षेपम् जनयंति विग्रह कर्शितानि ॥२४७॥

१०३. उच्चैः नाम संकीर्तनं तत्र अंगम् ॥ अंतर्भगवत् स्मरणं च ॥ एवम् अधिकार अभावे भिन्नम् उपायं वक्ष्यति कृष्ण एव तात्पर्यम् न तु तीर्थादौ ॥२४९॥

१०४. अस्मिन् पक्षे अंतः कृष्णः सर्वदा स्फुरति इति उत्तमोत्तमम् ॥२५०॥

१०५. वृत्ति अर्थम् नैव युंजीत प्राणैः कंठगतैः अपि ॥२५४॥

१०६. पूजा प्रवाहः भगवत् सान्निध्य बोधकः ॥२५५॥

१०७. सर्वत्रैव जगति फलम वर्तंत

इति सर्वत्र फलम् साधनम् च आह ॥२५६॥

१०८. तामसः कदापि न सात्त्विकम् कर्म करोति ॥२६४॥

१०९. यदि जीवे कृपा तदा शुभरुपेण, क्रोधे तु अशुभ रुपेणेति निर्णयः ॥२६८॥

११०. अन अवसरे नमस्कारात् अधर्म् पुण्यं विनश्यति ॥२७२॥

१११. नरके गतानां पुनरावृत्तिः । पुनरावृत्तौ च शूकरादि योनिषु संभवः ॥२८५॥

११२. कर्मस्वरुपः भगवान् अंतःकरण एव प्रकटः भवति न आत्मनि ॥२९४॥

११३. ज्ञानं तु प्रमाण आधीनम् ॥ न प्रमेय आधीनम् ॥ प्रत्यक्षत्वं जातिः परोक्षत्वं च ज्ञानं तयोः अपि अनुभवात् ॥२९७॥

११४. अतः अध्यासस्य प्रतिबंधकत्वात न शब्दात् ज्ञानम् अपि उदेति इति भावः । शब्द श्रवण मात्रेणैव तत ज्ञाने जाते सर्वसाधनवैयर्थ्यम् इति ॥२९९॥

११५. मद् स्वरुपाविदः अबलाः ब्रह्म मां परमं प्रापुः इति वचनात् ॥३०६॥

११६. ये अस्माभिः ज्ञानादय उपायत्वेन उक्ताः ते लोकानां प्ररोचनार्थम् निरुपिताः ॥ भगवत् कृपा-युक्तत्वे तेषाम् अपि फलसाधकत्वात् ॥ वचनम् तु मरोचनार्थम् ॥ वस्तु तस्तु कृपाएव : साधनम् ॥३०७॥

११७. भगवतः च फलत्वम् भगवद् वाक्याद् एव अवसीयते ॥३११॥

११८. तत्र अपि प्रेम संभवे गंगा स्वयम् उद्यम्य पाययति तथा भगवान् ॥ ३१४ ॥

११९. स्नेहमार्गे हीनभावः न दोषाय ॥ यतः भगवान् प्रेम्णा गोपीभ्यः अदेयम् अपि कामं दत्तवान् ॥ नहि स्वत इच्छा हितः को अपि एवम् प्रयच्छति ॥ ३१५ ॥

१२०. सेवनम् स्वयोग्य अनुसारेण न तु अल्पम् बहु वा प्रयोजकम् ॥३१६॥

१२१. रुचि आदिना जातम् प्रेम दोष दर्शनात् निवर्तते ॥३२६॥

भागवतार्थ

१. कृष्ण शब्देन परम् वस्तु उच्यते ॥ फलरुपताम् आह॥ परमानंद इति॥ तस्य साधनम् श्रवणम् इति तद् विषयरुपताम् आह ॥ अवतार प्रयोजनम् आह ॥ भा. प्र. १ ॥

२. खंडशः अर्थ प्रतिपादने वाक्य अर्थः कृत्रिमो भवेद् इति तन् निराकरणार्थम् आह ॥ एकार्थम् इति ॥ भा० प्र० २ ॥

३. आनंदरूपस्य लीला अपि आनंद रूपा ॥ भा० प्र० ३ ॥

४. धारणम् पाठतः तस्य भगवद् रूपत्वात् तेन रूपेण भगवान् एव धृतः ॥ हृदि स्थितः भगवान् यत् कार्यम् करिष्यति तद् अनेन अपि करिष्यति ॥ भा० प्र० ९ ॥

५. समाधौ उपलभ्य यावान् अर्थः निरूपितः सा समाधिभाषा ॥ तद् विरुद्धः अर्थः यत्र सा मतांतरभाषा ॥ लोकसिद्धा तु लौकिकी ॥ भा० प्र० १० ॥

६. अधिकार अभावे स्वरूपम् अर्थज्ञानम् अभिप्रायज्ञानम् च न संभविष्यति ॥ भा० प्र० १२ ॥

७. समाधि भाषात्वेन प्रामाण्ये परंपरा उपदेशौ व्यर्थौ इति तयोः सार्थकत्वाय समाधि निरूपयन् तौ निरूपयति ॥ भा० प्र० १७. ॥

८. मूले व्यामोहकरणं स्पष्टम् न भवति इति " कृष्णः मोहम् समुत्पाद्य " इति उक्तम् ॥ अभिमानात् परंपरा दुर्बला ॥ भा० प्र० १९ ॥

९. तथा भागवतस्य फलम् साक्षाद् भगवत् प्रवेशः सर्वं संदेह राहित्यं भगवत् कृपा सर्वत्र निर्भयत्वं परम प्रेम च इति ॥ भा. प्र. २० ॥

१०. भगवत् कृपया सत्संगे जाते ॥ भा० प्र० २१ ॥

११. इदम् नामात्मकम् भगवतः रूपम् तत् स्व विक्रेतरि विक्रयसाध्य अतिरिक्तम् फलम् न प्रयच्छति ॥ भा० प्र० २४ ॥

१२. भक्तानाम् मरणे कथा एव प्रतिबंधिका ॥ भा० प्र० २६ ॥

१३. व्यासस्य वैराग्य अभावः सिद्धः ॥ भा० प्र० २८ ॥

१४. अन्यवाक्य कथने स्वस्य अनअधिकारित्वम् सिध्यति ॥ स्वयं कथने तु सिध्यति एव ॥ भा० प्र० ३१ ॥

१५. स हि भागवतम् बोधयितुम् न आगतः, स्व अपेक्षया व्यासस्य उत्तमत्वात्, किंतु यथा वदेत् स भागवतम् तथा हेतुम् आह ॥ भा० प्र० ३२ ॥

१६. तत आदरेण श्रवण आदि करणे प्रेमः उत्पत्तिः ॥ ततः हरिप्रीतिः ॥ भा० प्र० ४४ ॥

१७. अवतारात् पूर्वम् स्वरूपस्थितस्य पंचविधा लीला ॥ अवतीर्णस्य

अनेकविधाम् अग्रिम अध्याये वक्ष्यति ॥ भा० प्र० ४८

१८. स्वयम् तु स्पष्ट अर्थम् विभागं कुर्वन् अवतारे भेदकम् आह ॥ क्रियाशक्त्या बाह्य दुःख निराकरण अर्थम् अवतारः ॥ ज्ञानशक्त्या च आंतर दुःख निराकरण अर्थम् ॥ भा० प्र० ५० ॥

१९. स तु जन्मांतर एव सर्वोत्तमः, पूर्णज्ञानः यत उपनयनम् अपि न अपेक्षते तादृशस्य किं भागवतेन भविष्यति ॥ कृष्ण अनुग्रहः अपि तस्य स्वत एव जातः अस्ति ॥ भा० प्र० ६३ ॥

२०. भगवान् स्वार्थम् प्रथमत एव किंचित् करोति तत्र न साधन अपेक्षा ॥ अन्यः तु साधनेन भगवदीयः भवति । कर्मणां भगवति समर्पणम् ॥ समाधौ भगवद् अनुभवः ॥ भा० प्र० ६८ ॥

२१. अवतार मात्रेण तदीयत्वम् जातम् ॥ किंतु श्रोतुः फलम् श्रवणानंतरम् एव फलम् ॥ अवतार फलम् अपि तदैव जातम् इति अर्थः ॥ भा० प्र० ७० ॥

२२. किं च सर्वदा भगवद् स्फुरणम् अपि तस्य जायते ॥ भा० प्र० ७२ ॥

२३. यद्यपि अस्य मुक्तिः फलम् तथापि फल अपेक्षया साधनम् एव फल रूपम् तद् राग रहितस्य एव तथा अनुभवः भवति, न अन्यस्य इति ॥ भा० प्र० ७६ ॥

२४. पंचाध्यायी पंच अग्नि न्यायेन जनने शुद्धि हेतुः ॥ शुद्धिः एव मूलम् इति ज्ञापयितुम् कृष्ण कथा उद्यम् इति वचनम् ॥ तस्मात् मूल एव अयम् अर्थः सूचित इति न अस्मद् मते दूषण संभावना अपि इति अर्थः ॥ भा० प्र० ८१ ॥

२५. अधिकार सिध्यर्थम् स्तोत्रम् ॥ द्वारम् आसक्ति वारणम् ॥ आधिदैविकस्य प्रेरणस्य भगवता निवृत्तिः क्रियत इति ॥ भा० प्र० ८९ ॥

२६. आसक्तः हि भजते ॥ भगवद् आसक्त्या स्वत एव प्रतिभा उत्पन्ना तेन स्तुतिः ॥ ॥ भा० प्र० १०२ ॥

२७. साधनम् च फलम् च प्रत्यक्षतः प्रदर्शयति इति अर्थः ॥ भा० प्र० १०४ ॥

२८. कलिः न अत्यंतं दुष्टः ॥ अंतकाले रोगवद् भगवद् स्मरणे स्वत एव शुद्धत्वात ॥ भा० प्र० ११७ ॥

२९. शुकः शिव इति ॥ भगवान् सर्व मुक्तिः अर्थम् अवतीर्णः, स्वयं

गच्छन् स्वस्थाने शिवम् स्थापितवान् ॥ अतः भागवत प्रवर्तन अर्थम् एव शिव अवतारः ॥ भा० प्र० १२३ ॥

३०. अन्य सेवा बहिर्मुखत्वेन श्रद्धायाः श्रवण अंगत्वम् ॥ यथा दशविध-लीलायुक्त अतिरिक्तस्य न श्रवणम् ॥ भा० द्वि० ६ ॥

३१. यदा पुनः मनः रजः तमोभ्याम् अन्यथा भवति तदा साधनपर एव भवेत् ॥ भा० द्वि० १३ ॥

३२. इदानीं ध्येय भेदेन फलभेदम् आह ॥ भा० द्वि० १५ ॥

३३. श्रवणादिना तु स्वाभाविकः भगवान् आविर्भवति इति महान् एव विशेषः ॥ भा० द्वि० १६ ॥

३४. अंतकाल संदेहे योगे प्रवृत्तः दुःखम् प्राप्नोति ॥ श्रवणादौ तु सुखम् ॥ भा० द्वि० १८ ॥

३५. तन् महाप्रभोः अपि भजने भवति इति ज्ञापयति ॥ प्रत्युत अभजने सर्वे इंद्रियाणां वैफल्यं च ॥ काम अभावे अपि इंद्रियाणाम् सार्थकत्वाय भजनम् कर्तव्यम्, तत् तद् अभिमानिन्यः देवता भगवद् संबंधम् अप्राप्य दुखिताः सत्यो मोक्षे ज्ञाने वा विधातम् कुर्युः इति भावः ॥भा. द्वि. २०॥

३६. अन्य भजने चेद् इंद्रियदोष इति ॥ भा० द्वि० २१ ॥

३७. भक्तिमार्गेण भजनम् मूल भक्तिः एव इति पुरुषोत्तम भक्ति सिध्यर्थं प्राकट्य कथैव उक्ता सर्वत्र अवतारेषु ॥ भा० द्वि० २९ ॥

३८. भगवान् स्वस्य रूपम् प्रदर्श्य पश्चात् स्व स्वरूपम् आह ॥ तेन संदेहः न उत्पन्न इति न मूलांतर अपेक्षा ॥ भा० द्वि० ३२ ॥

३९. अधिकारि देह व्यतिरेकेण स न भवति इति मोक्ष अर्थम् उत्पत्तिः अपि निरूप्यते ॥ तत्र गृहस्थस्य एव मुक्तिः संदिग्धेति दंपत्योः मुक्ति निरूपणम् ॥ तत्र गृहस्थस्य मुक्तौ भगवत् संतोषः प्रयोजकः ॥ तस्य अपि भक्तिज्ञानं योगः च आज्ञाकरणम् च ॥ भा० तृ० २ ॥

४०. अतः तीर्थ सेवा एव कर्तव्या ॥ तत्र अपि तीर्थे देवता बुद्धिः तदा एव सेवा भवति ॥ भा० तृ० १८ ॥

४१. कथया कथा संबध्यत इति हेतु अंतरम् ॥ अभक्तः उक्ते सर्वथा न विश्वास इति ॥ भा० तृ० २२ ॥

४२. गृह आसक्तिः दुःखात्मकं संसारम् प्रयच्छति ॥ कर्माणि तु गृह आसक्ति कार्याणि ॥ भक्तो हि

कर्मणाम् असारतां ज्ञात्वा भगवद् धर्मेषु रमते ततः कर्मभ्रष्टः तस्य अयुक्तः भवति ॥ भा० तृ० ३० ॥

४३. भगवता प्रोक्तम् भागवतम् ॥ न हि अन्यः भगवद् लीलाम् जानाति इति अभिप्रायेण आह ॥ अयम् अर्थ इति ॥ भा० तृ० ३८ ॥

४४. भगवतो हि स्वरूपम् भागवते वक्तव्यम् ॥ तद् भगवान् स्वयम् एव कदाचिद् वदति ॥ भा० तृ० ३९ ॥

४५. भगवदीयो यः कश्चिद् भगवता प्रोक्तम् कथयति तद् एव भागवतम् इति सामान्य लक्षणम् ॥ भा० तृ० ४२ ॥

४६. युक्त्या पदार्थ निर्धारः लौकिकः ॥ भागवत अर्थः तु अलौकिक इति ॥ तथा अपि अधिकार अभावे सः अर्थः न स्फुरति इति संदेहे जाते तन् निराकरणम् अवश्यम् कर्तव्यम् ॥ भा० तृ० ४३ ॥

४७. सर्व तिरोभावः तु भगवद् साक्षात्कारे ॥ तदा न स्वप्न दर्शनम् ॥ जागरणे अपि न देहादौ आत्मबुद्धिः किंतु सुषुप्तिवत् सर्वदा ब्रह्म आनंद अनुभवः ॥ सर्वेषाम् एव भगवद् गुणानुवादे परम आनंद अनुभवात् ॥ साधनम् च सुलभम् सर्वत्र सतां भगवद् गुण कीर्तनस्य नित्यत्वात् ॥ समीचीना भगवद् चरित्रः उक्तिः, गूढा गुप्ता ॥ तेनैव हि भगवत् प्रकाशः स च दुर्लभ इति न सर्वमुक्तिः ॥ भगवत् सेवया द्वयम् अपि प्राप्यत इति ॥ पश्चात् भगवत् प्रसादे तद् उक्त प्रकारेण स्वेच्छया अपि सेवा भवति इति अर्थः ॥ भा० तृ० ५१ ॥

४८. स्वस्मिन् एव जलम् कल्पयित्वा तस्मिन् शेते दैनं दिन प्रलयः तादृशः अपि भवति ॥ अन्यथा नारायणस्य शयनम् न संभवति ॥ भा० तृ० ६४ ॥

४९. अस्मिन कल्पे तत्त्वानाम् न नियम इति ज्ञापयितुम् स्थानापत्तिम् आह ॥ भा० तृ० ६६ ॥

५०. वस्तुतः भगवत् प्रसादः प्रार्थनीयः ॥ यतः संसारे दुर्लभम् एतत् ॥ तेन एव अर्थात् भजनम् प्रार्थितम् भवति ॥ भा० तृ० ६९॥

५१. नित्यं प्रीतियुक्त भक्ते हरिः प्रीतः सन् न उद्वेगम् प्रयच्छति इति अर्थः ॥ भा० तृ० ७२ ॥

५२. रसादि अभिनये हि केवलेन एव हस्तेन सर्वे पदार्थाः चेष्टा विशेषेण प्रदर्श्यंते ॥ भा० तृ० ७९ ॥

५३. भगवता एव प्रलयः क्रियते। निरंतरम् उत्पत्ति प्रलयाभ्यां पीडिता जीवा भगवद् शयन एव निर्वृतिम् प्राप्नुवंति ॥ भा० तृ० ८९ ॥

५४. मुक्ता हि भगवद् संनिधाने तिष्ठंति । अतः यदा भगवान् सृष्टिम् कर्तुम् इच्छति तदा स्वलीला सिद्धि अर्थम् तान् प्रेरयति अतः भगवद् इच्छावशाः ते कारण भूता इति अर्थः ॥ भा० तृ० ९४ ॥

५५. वाग् एका स्त्री अन्ये सर्वे पुरुषाः अस्मात् वाग् इति ॥ भा० तृ० १०३ ॥

५६. तेन जीवानाम् रूपनाम्नी सिद्धे नाम्नाम् अखंड प्रवृत्ति अर्थम् तन् मूल देवताम् आहेति आह ॥ तन्मूलस्य इति । भा० तृ० १०६ ॥

५७. मुक्तानां जीवानां भगवद् इच्छया संसारः ॥ भा० तृ० १२१ ॥

५८. तत्र अपि तस्य साधनरूपम् ज्ञानम् स्वतः सिद्धम् । भगवद् कृपयैव पुरुषार्थानाम् ससाधनानाम् सिद्धेः ॥ भा० तृ० १४४ ॥

५९. मोक्षः परम् पृथक् वक्तव्यः स केवल एव भवति न मिथुनी भावे ॥ स्त्रीजीवाः प्रकृति पर वशाः ॥ भा० तृ० १४५ ॥

६०. सत्त्वप्राधान्ये देव स्त्रीत्वम् रजः प्राधान्ये मनुष्य स्त्रीत्वम् ॥ तमः प्राधान्ये पशुस्त्रीत्वम् इति ॥ भा० तृ० १४६ ॥

६१. भगवान् तपसा न तुष्टः ॥ न अपि स्तोत्रेण । किंतु यथार्थ भाषणेन ॥ तत्र अपि स्वगृह मर्म कथनेन ॥ महतो निष्कपट भजने प्रसादः भवति ॥ अतः भगवंतम् प्रति प्रार्थना वचनम् व्यर्थम् ॥ एतद् भगवद् वचनाद् एव अवगम्यते ॥ भा० तृ० १५० ॥

६२. भगवद् प्रियत्वम् एव साध्यम् न अन्यत् ॥ तेन एव सर्व सिद्धिः इति भावः ॥ भा० तृ० १६१ ॥

६३. अध्यास समर्थनार्थम् सांख्य निरूपणम्, वस्तुतः भेदे हि अध्यासः भवति इति ॥ भा० तृ० १७९ ॥

६४. स्वस्य स्त्रीत्वात् गुरोः च सरस्वती रूपत्वात् तिर्यग्गतौ अपि जलधारणैव कृता ॥ अग्निभावे अपि ऊर्ध्वगतिः गुरुसायुज्याद् भविष्यति ॥ भा० तृ० १८९ ॥

६५. अनेन सर्वा लीलाः शृंखलारूपा

अपि प्रत्येकम् सफलाः ॥ भा० च० १ ॥

६६. स्वरूपतः तु स्त्रीत्वम् न प्रयोजकम् ॥ भजने तु इंद्रियत्वम् एव प्रयोजकम् इति आह ॥ भा० च० ७ ॥

६७. कर्ममार्गे सर्वे देवाः तुल्याः ॥ परब्रह्मणः अपि देवत्वम् एव ॥ भा० च० १९ ॥

६८. सर्वज्ञत्वे अपि स्वभावभेदात् रुचिः भिन्ना ॥ अतः रुचि अनुसारेण तेषाम् तथा वचनम् इति अर्थः ॥ भगवान् एव तथा रूपाणि कृतवान् ॥ तेन न प्रमेये तथा तथा वचनम् दोषाय ॥भा० च० २२ ॥

६९. कालिंदी पुष्टिमार्गीयेति मर्यादया तथा अभावेपि पुष्ट्यैव सर्वम् करिष्यति इति विचार्य तद् उभय संगमे स्नाता निर्मलताम् ययुः इति अग्रिम धर्म संपत्तौ हेतुः उक्तः ॥ भा० च० ३९ ॥

७०. कालरूपः हि गरूडः स चेत् दाढ्यभवत् प्रसादम् तस्मिन् स्वयम् पश्यति तदा अंते न ग्रसति इति तन् निमित्तम् स्वप्रसाद समये स नीत इत्यर्थः ॥ भा० च० ८६ ॥

७१. पुष्टिमार्गे इच्छाया एव बलिष्ठत्वात् प्रार्थना विशेषे अपि स्वविचारित अर्थ प्रार्थनस्यैव अभिनंदनम् अन्यस्य अनभिनंदःच पूर्व उक्त प्रक्रिया भेदतः भवति इति अर्थः ॥ भा० च० ९० ॥

७२. यत्र गृह गमने अपि एवम् अवांतरम् फलम् तत्र परमफले भगवद् उक्ते का वार्ता इति तद् उत्कर्ष अपि अनेन सूचित इति आह ॥ फल इति ॥ भा० च० ९३ ॥

७३. भगवदीयस्य प्राणिवधमात्रम् एव न उचितम् तत्र अपि भगवद् हेतु रहितम् ॥ भा० च० ९७ ॥

७४. अत्र भगवद् शास्त्रे सकाम भजने मोक्षकामः ॥ न तु स्त्रीकामः ॥ भा० च० १०४ ॥

७५. यदि भगवान् महतीम् कृपाम् कुर्यात् तदा तदैव भक्तिम् अपि दत्वा स्वयम् प्रकटीभूय परम मुक्तिम् अपि दद्यात् परम् तु एवं रूपैव यतः कृपा अतः तथैव आसेत्यर्थः ॥ भा० च० १९० ॥

७६. भक्तिमार्गे तु भगवान् स्वतः एव यदा भक्तेषु सर्वम् संपादयति स्वीयत्वेन तदा भक्तः स्व अंगीकारम् सर्व आत्मना ज्ञात्वा स्तुति आदिषु स्व अधिकारम् जानाति ततः स्तौति ॥ अथवा सर्वात्मना स्व अंगीकार ज्ञानेन-

आंतर आनंदे पूर्णे वहिः अपि सर्वेंद्रियेषु प्राकट्य समये वाचि स निर्गच्छन् स्तुतिरूपः भवति इति आनंदस्य एव अधिकार रूपत्वम् ।। अत एव पूर्वम् प्रभुवाक्यैः तस्मिन् सिद्धे जाते पश्चात् स्तुतिः भक्तिमार्गे मतेति पश्चात् निरूपिते इति अर्थः ।। जा० च० २०५ ।।

७७. अत एव पूर्वम् निवृत्तिं नितस्य संपन्न साधनस्य अस्य भगवति स्थितिः न जाता ।। किंतु भगवान् ।। वैपरीत्येन प्रवृत्तिपरम् विधाय स्वकार्यम् कारयित्वा स्वस्मिन् स्थापितवान् ।। भा० पं० १४ ।।

७८. इच्छायाः पुष्टिमार्गे ।। भजन रस अनुभव प्रतिबंधः अपि न भवष्यति इति अपि तद् अंगीकार इति ।। भा० पं० १८ ।।

७९. कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिः उच्यते ।। भा० पं० २४ ।।

८०. वस्तुस्थितिस्तु आनंदमय देहस्य वह्निरूप आवरण उद्गते सति तिरोधानम् इति आह ।। आनंदेति ।। भा० पं० ५५ ।।

८१. यथा बालस्य स्त्री स्पर्शादौ सत्यपि न शृंगार रस अनुभवः तथा मर्यादा मार्गीयत्वाद् यावता ज्ञान वैराग्य संभवः तावानेस्तद् रस अनुभवः अपि न अधिकः ।। तथा च भगवता स मार्ग एव तथा कृतः यत कर्मान् अक्लिष्टेनैव फलम् भवति इति अर्थः ।। पुष्टौ इति ।। भक्ति स्वरूपम् तु एतादृशम् एव सदा परम् तु भगवान् यस्मिन् मर्यादाम् मनुते तत्रेपा चेत् स्वशक्ति प्रकटयेन् मर्यादानाश एव स्यात् । अतः भगवद् इच्छयैव मतिबद्धा न अधिकम् करोति ।। भा० पं० ६ ३।।

८२. यथा कयाचिद् विरहिण्या ताद्शीम् एव प्रीतिमत् सपत्नीम् मति स्वैरचारी मधुपः संप्रति दहति इति उक्ते कदाचित् पृष्टया अन्यया प्रियपर तया व्याकृते अपि न तद् विप्रयोग रस विशेष अनुभवः अधिकार रूप प्रीति अभावात् तटस्थायाः तस्या न वा प्रीति उत्पत्तिः ।। भा० पं० ७८ ।।

८३. अत एव वस्तु स्थितिः एव परोक्ष वादेन उक्ताया वैराग्य जनकत्वम् अनुभवदशायां तु तस्या एव न तथात्वम् इति भगवद्लीलो इति तत् ज्ञापनाय प्रश्नः ।। एतत् ज्ञापनायैव भगवता एव अवबोध प्रश्नौ कारितौ इति निगूढ आशयः

आचार्यैः उक्तम् इति स्थितिः इति ॥ भा० पं० ७२ ॥

८४. तर्हि तद् तद् अवतारेषु तत् तत् भक्त नियम कथनं ॥भा० पं० ८३॥

८५. तत् मूलभूत भजनम् विना साधनैः तन्नाशः, न सर्वात्मने इति अत उक्तम् सर्वथा इति ॥ भा० पं० ८६ ॥

८६. भगवद् व्यतिरिक्तस्य वर्णनम् नैव युज्यते ॥ भा० पं० २०४ ॥

८७. प्रेम युक्ताः तु तत्रापि दासभावात् पदच्युताः ॥ पुनः दासा भविष्यंति भक्तिमार्गः न तेषु चेत् ॥ भा० प० ३१ ॥

८८. अतः कृपा एव शापेन कारणं हरिणा कृतम् ॥ भा० स० १६ ॥

८९. कृष्ण प्रसादः सर्वत्र बलम् पाने अथ रक्षणे ॥ भा० स० ३६ ॥

९०. विलंबः चेद् हरि इच्छातः तदा सद् धर्मम् आचरेत् ॥ भा० स० ८५ ॥

९१. कृष्णेन प्रेरिता देवाः प्रेरयंति यदा मनः ॥ लोभम् च नाशयेत्यक्षः तदा दाता स जायते ॥ भा० अ० ३४ ॥

९२. अक्षरम् तु अमृतम् यस्माद् अतः पीतम् पुनः मुखात् ॥ उद्धृत्य स्वस्य भोगार्थम् कर्तव्यम् इति निश्चयात् ॥ भा० अ० ७२ ॥

९३. सर्वथा शरणं गत्वा श्रेष्ठम् तस्मै निवेद्य च ॥ तदीयेभ्यः यथा कामं दत्वा तस्य इच्छया पुनः ॥ भा० अ० ९८ ॥

९४. एवम् गुरु उक्त मार्गेण सद्धर्मम् यः समाचरेत् ॥ दुर्वासनाः समस्ता हि दहेद् इति विनिश्चयः ॥ भा० अ० १०५ ॥

९५. अनेन सर्वे विषया हरि दत्ता हरौ परे ॥ निवेशनीया भक्तानाम् इति अर्थो विनिरूप्यते ॥ भा० ९ ५६ ॥

९६. क्षणात् कृष्ण स्मृतौ तस्य मुक्तिः उक्ता अनपायिनी ॥ भा०-९-७३ ॥

९७. कृष्ण वाक्यम् श्रद्धा कार्यम् माया मोहम् निवार्येहि ॥ वृक्षवत् तु स्थितिः कार्या शुद्ध अन्नेन च वर्तयेत् ॥ भा० द० ९२ ॥

९८. प्रत्यक्षे भजनम् श्रेष्ठम् एवम् चेद् रोधनम् स्थिरम् ॥ पुरुषाणां तथा स्त्रीणाम् रात्रौ च दिवसे तथा ॥ भा० द० १११ ॥

९९. अन्ये देवाः श्रियम् दत्वा तथा अन्यानपि वै वरान् ॥ स्वयम् संकटम् आयांति तस्मात् श्रीः न एव युज्यते ॥ भा० द० ४५५ ॥

१००. गोपिकावत् बहिः दृष्टौव्यसनत्वम् हि भासते ॥ संसारे निखिलो

तस्य त्याग इच्छा च प्रजायते ॥ भा० ए० २० ॥

१०१. ततः युग अनुरूपेण भजेत् स्वस्य अधिकारतः ।। भक्तिम् च अग्रे स्वयम् माह कृतार्थत्वम् च पुष्टिनः ।। भा० ए० ३० ।।

१०२. पौनरुक्त्यम् ततः न अस्ति प्रसंगात् अपि वारिता सर्वस्य मूलम् जिह्वा इति ततः सा विनिरूपिता ॥ भा० ए० ५५ ॥

१०३. न कृष्णत्वम् फलम् पूर्णम् ॥ भा० ए० ७० ॥

१०४. जन्मांतरे स्मृति अभावे संगात् नष्टः यदा भवेत् ॥ तदा का गतिः इति अत्र हरिपूजा निरूपिता ॥ भा० ए० ९१ ॥

१०५. तेन जाति स्मरो भावि तस्य ज्ञानम् हरिः स्वयम् ॥ जाति स्मरस्य वदति सर्वसाधनपूर्वकम् ॥ भा० ए० ९२ ॥

१०६. विलंबे कारणम् गर्वः तद् अर्थम् दोष वर्णनम ॥ भा० द्वा० १५ ॥

१०७. तन् निवृत्तिः च भवति इति अग्रे कीर्तनम् इरितम् ॥ भा० द्वा० १६॥

१०८. कथाः सर्वा इह उद्दिष्टा आधिभौतिकम् उच्यते ॥ यथा लोकाः प्रवर्तन्ते कथयंति परस्परम् ॥ भा० द्वा० ३६ ॥

१०९. शुद्धया फलप्रदानेन भक्तिदानेन च स्वयम् ॥ अत्र प्रतिष्ठितम् सर्वम् तेना अयम् विकृतः क्वचित् । भा० द्वा० ३८ ॥

११०. न अभूद् इति अवगत्य निश्चितपदैः उद्दीप्त दीप आकृतिम् श्रीमद् भागवत मदीयम् अधुना चक्रे मुदा वल्लभः ॥ भा० द्वा० ३९ ॥

१११. भगवद वाक्यम् आह स्वर्ग : सत्वगुण उदय इति । ७

११२. स्वर्ग शब्देन आत्मसुखम् । ११ धर्मिणो धर्मे प्रवेशात्। कालवत्नस नित्यप्रकटः किन्तुफल दान पर्यन्तमेवे ति हा--यावतु फल समापनमिति ।११०

११३. भक्तिमार्गेतु आरमभत एव परमानंदः ।१०३

११४. व्यवहार सन्निपात इति ।१४८

११५. लौकिक वाक्याना लय प्रकारम् आह । संस्कार मात्र विलियद् इति । वस्तु तस्तु न विलयः । अथवा विलय अंगीकारश्चेत संस्कार मात्र विलयाद् तद विलिनते इति अर्थः ।

भगवद् वाक्येषु नास्ति इति आह तद

अमावात् इति। वस्तु तस्तु सर्वम् वेदतुल्यम् इति आह । अष्मदादि मुखेन अपि । सर्व वाक्यम् भगवद् कर्तुकमेव । १७०

११६. वाक्रूप पतिः भगवान ।१७५ धर्म स्फुरणं तु धमिज्ञानादेव ।१७६

११७. भगवद भजनाद् च न पातः किन्तु कथश्चित कलि तरिष्यति । २१५

११८. ज्ञानमित्रो भक्तः प्रेमयुत्त्यस्तु तता अपि दुर्लभः तत्रापि सदाप्रेमप्लुतः ।२१६

११९. वाक्येन प्रवृतः साधन साधयन्नपि भगवता कृतार्था कियते । प्रयाण प्रवृत्ति आरम्य भगवतो रक्षकत्वात् । २२२

१२०. आत्म शब्दस्य भगवद वाचकत्वात् । २२५

१२१. या हि गुरू : सेवामु उपेदेक्ष्यति स स्वयं चेतु तां उत्तमं जानीयात् तथा कथं न स्वयं कुर्यात् इति सेवा पर एव गुरु : ।२२७

१२२. भगवत सेवायाम् अपि क्लिष्टम् चेति । अतो अक्लिष्टम् आम्र द्राक्षादि दुग्दाधि सन्मार्ग उपाजितम् । २३६

१२३. सेवा मुखया न तु पुजा इति। २३७

१२४. भुक्ताणा च उप्पवो निषिध्ध : । भगवद आवेश अमावात् । २४५

१२५. येन तमसि प्रविष्टो भगवन्तं न स्मरति । २४७

१२६. उपे : नाम संकीर्तनम् तत्र अंगम् । २४९

१२७. आज्ञान्यतिरेकेण ये तपः कर्वन्ति तेपाम् अन्ते भगवतः पीड्या क्रोधोभवति। २६९

१२८. सांप्रतं इरिरेव बुधरूपेण अवतीर्णो वेद निन्दा लक्षणं शास्त्र कृतवान् ।२८३

१२९. भगवतश्च फलत्वं भगवद वाक्यात् एवं अवसीदते । ३०८

१३०. सर्व पुरुपार्थरूपा सेवा चेत् सा भक्तिः स्वतन्त्रेतिउच्यते । १९६

१३१. शब्दे अपि व्याकणोपयोग इति व्यभिवारम् आराङ्कायाहा । ७३

१३२. तत्रापि प्रेम सम्भवे गङ्गा स्वयमुघम्य पाययति । ३१४

१३३. स्नेहमार्गे हीनभावो न दोपाया यतो भगवान प्रेमाण गोपीभ्यः अदेयमपि कामं दत्तवान् । ३१९

१३४. श्रवणस्य अंग त्रयं भागवतस्य सम्यक् तात्पर्यज्ञानं, भक्तमुखात् श्रवणम् श्रोतुश्र्चवैराग्यमिति । एतद अभावे न फलति इति अर्थः । ३२९



अणु - भाष्य

१११. शब्दः चक्षुः आदिवत् न संदिग्ध अर्थ प्रतिपादकः ॥ अलौकिकः हि वेद अर्थः न युक्त्या प्रतिपद्यते ॥ तपसा वेद युक्त्या तु प्रसादात् परमात्मनः ॥ न हि स्व बुद्ध्या वेद अर्थम् परिकल्प्य तदर्थम् विचारः कर्तुम् शक्यः ॥ अणु मात्र अन्यथा कल्पने अपि दोषः स्यात् ॥ परंपरया पाठवद् अर्थस्य अपि गुरुमुखात् एव श्रवणे अपि मन्द मध्यमयोः संदेहो भवेत समान धर्म दर्शनात् पादादि पाठवत् ॥ तथा च निर्णये येन केनचिद् वक्तव्ये हरिः स्वयम् व्यासः विचारम् चिकीर्षुः तत् कर्तव्यताम् बोधयति ॥ ब्रह्मविचार एव आर-म्भणीयः, न धर्मविचारः ॥ शब्द ब्रह्मणि निष्णातः न निष्णायात्

परे यदि ॥ श्रमः तस्य फलम् मन्ये हि अधेनुमिव रक्षतः ॥ भाष्य १, १, १, १ ॥

११२. फलसंबन्धात् ॥ फल अर्थम् च ब्रह्मज्ञानम् ॥ फलम् च फल वाक्योक्त धर्मज्ञानाद् एव, न अन्यथा ॥ आदि शब्दः च धर्म-वाची ॥ स च स्वसंबन्धिनम् लक्षयति ॥ ऋग् एव मन्त्रः ॥ भा० १, १, २, २ ॥

११३. न च सर्वस्मिन् वेदे धर्म एव जिज्ञास्यः ॥ तद् गुरुणैव व्यासेन ब्रह्म जिज्ञासायाः प्रतिज्ञातत्वात् ॥ तस्मात् पूर्वमीमांसानभिज्ञाः क्रिया-परत्वम् सर्वस्य अपि वेदस्य वदन्तः मूर्खा एव ॥ ब्रह्म अर्पणम् ब्रह्म हविः इति आदि स्मृतेः ॥ भा० १, १, ३, ३ ॥

११४. अतः प्रथमम् स्वरूप निर्णयः ॥ तत्र प्रथमे अध्याये स्वरूप वाक्यानि विचारयन्ते ॥ तानि द्विविधानि ॥ संदिग्धानि, निःसंदिग्धानि च ॥ तत्र निःसंदिग्धानाम् निर्णयः न वक्तव्यः ॥ संदिग्धानि पुनः चतु-र्विधानि ॥ कार्यप्रतिपादकानि, अन्तर्यामि प्रतिपादकानि, उपास्य रूप प्रतिपादकानि, प्रकीर्णकानि च इति ॥ आकृति मात्र अर्थम् लोक अपेक्षा ॥ लौकिकः व्यव-हारः सन्निपातरूपत्त्व तु पुरुषार्थ असाधक एव ॥ तर्हि शब्दमात्रस्य कथम् ग्रहणम् ॥ वेदव्याख्यात् वाक् विषयत्वाद् इति ब्रूमः ॥ भा. १, १, ४, ४ ॥

११५. तस्माद् आत्मशब्द प्रयोगाद् गुणातीतम् एव कर्तृ ॥ भा० १, १, ४, ५ ॥

११६. अन्नमयादि तुल्य वचनात् तथा एव फलसिद्धेः इति ॥ आनन्दमयः परमात्मा न अन्नमयादिवत् पदार्थ आन्तरम् । पुनः वचनेन अभ्या-सेन प्रवाहाद् भेदे साधिते ब्रह्म-त्वम् ॥ अन्यथा जीवस्य साधनफले निरूपयन्त्याः श्रुतेः जीवपरत्वम् एव स्यात न ब्रह्मपरत्वम् ॥ अक्षर ब्रह्मविद् परम् ब्रह्म प्राप्नोति इति अर्थः ॥ अत्र पर शब्दस्य पूर्वे परत्वे तद् इति एव वदेत् ॥ तादृशे जीवे स्वीयत्वेन वरणे भक्तिभावात सहकारि योग्यता संपत्या पुरुषोत्तम प्राप्तिः भवति इति निर्णीयते ॥ तदैव गुहायाम् परम व्योम आविर्भावः । परः मीयते दृश्यते अनेन इति तथा ॥ परम व्योम्नः अति अलौकिकत्व ज्ञापनाय अलौकिकः प्रयोगः कृतः॥

शुद्धपुष्टि मार्गीयत्वाद् अस्यभक्तस्य स्वातन्त्र्यम् भोग उच्यते ।। सहभावः उक्त्या ब्रह्मणः गौणत्वम् ।। अत एव भक्त आधीनत्वम् भगवतः स्मृतिषु अपि उच्यते ।। अत्र अशन क्रियायाम् ब्रह्मणा सहभाव उच्यते तेन अश भोजन इति धातोः एव अयम् प्रयोगः अर्थस्य अलौकिकत्व ज्ञापनाय अलौकिकः प्रयोगः कृतः ।। तत उक्तरीत्या भगवद् वरणेन भक्तिलाभे गुहायाम् आविर्भूतम् यत् परमं व्योम तस्मिन् निहितः पुरुषोत्तम एव इति ।। तत्र येन रूपेण यत्कार्यम् करोति तेन रूपेण समर्थो अपि तद् अतिरिक्तम् न करोति । तथैव तस्य लीला यतः ।। तथा च अन्नमयादि रूपैः क्षुद्राणि एव फलानि ददाति ।। हीन अधिकारिणाम् तावतैव आकांक्षानिवृत्तिः भवति ।। अत एव पुरुषोत्तम आनन्द अनुभवे सत्य अनुभवैकगम्यः अयम् आनंन्दः, न मनोवाक् विषय इति ज्ञात्वा लोकवेद ।। कालादिभ्यः अपि न बिभेति इति ।। एतेन लौकिकम् पूर्वदेहम् त्यक्त्वा साक्षाद् भगवद् भजन उपयोगिनम् भगवद् विभुत्यात्मकम् संघातम् प्राप्नोति आदौ ।। यत्र गुहायाम् भगवद् वरणेन परमव्योम आविर्भावः ततः पूर्णआनन्दात्मकस्यम् पुरुषोत्तमरूपम् फलरूपम् प्राप्य उक्तक्रम् अर्थरीत्या तेन सह सर्व काम अशनम् एव मनोवाग् विषयानन्द वेदनम् तद्वान भवति इति वाक्ये एक वाक्यतया अवगम्यते ।। अस्मात् लोकात् प्रेत्येपि वाक्ये इदम् शब्द प्रयोगात् प्राकृतगुणमयम् प्रपंचम् अतिक्रम्य गुणातीतम् प्रपंचं साक्षाद् लीला उपयोगिनम् प्राप्नोति इति अवगम्यते । जीवे तु आनन्दमयः पुरुषोत्तमः प्रविशति इति रसात्मकत्वाद् आनन्दात्मकम् एव विरहभाव रसाब्धिम् अनुभूय पश्चात् प्रादुर्भूतम् प्रभुस्वरूपम् प्राप्य न बिभेति कुतश्चन इति ।। उक्तभक्तस्य सदा एव विरह भावे तु विशेषतः प्रियस्वरूप अतिरिक्तास्फूर्त्या अन्नप्राणादि रूपः स एव इति ज्ञापनाय तत् तद् रूपत्वम् उच्यते ।। तद् अनुभव विषयः प्रकट आनन्दमय इति तद् स्वरूपम् उच्यते ।। तत्र निरूपधिप्रीतिः एव मुख्या, न अन्यद् इति ज्ञापनाय प्रियस्य प्रधान अंगत्वम् उच्यते । तदा प्रिये इक्ष-

णादिभिः आनन्दात्मक एव विविध रस भाव संदोह उत्पद्यते। स्थायि-भावस्य एकरूपत्वाद् आत्मत्वम् उच्यते ॥ भा० १-१-५-११.॥

११७. मन्त्रेण अभिधया वृत्त्या प्रतिपाद्यम् मान्त्रवर्णिकम् ॥ यत्र यद् उद्दिष्टम् तद् एव मुख्यतया ज्ञातव्यम् ॥ उपपादनीयम् च संदिग्धम् ॥ तस्मात् सर्वत्र प्रपाठके मान्त्रवर्णिकम् एव प्रतीयते ॥ अतः मुख्य उपपत्तेः विद्यमानत्वेन आनन्दमयः परमात्मा एव ॥ भाष्य १-१-५-१८. ॥

११८. अतः देह इन्द्रिययोः विद्यमानत्वात् जीवः कश्चिद् अधिकारी सूर्यमण्डलस्थ इति गम्यते ॥ फलम् तत् सायुज्यद्वारे इति ॥ तस्य च शरीरस्य कर्मजन्यत्व अभावात् अपहतपाप्मत्व आदि संगच्छते ॥ सुवर्ण शरीरत्वम् अपि अलौकिकत्वाद् ब्रह्मण एव संगच्छते ॥ ब्रह्मणः शरीरम् इति तु सर्वथा असंगतम् सर्वकर्तुः ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्य अपि शरीरम् कल्पयेत् ॥ किंतु लीलया-व्यामोहनार्थम् अन्यथा भासयेत् नटवत् ॥ माया हि एषा मया सृष्टा इत्यादि भगवद् वाक्यम् भगवन् मायया भगवन्तम् अन्यथा पश्यन्ती इति आह । न तु भगवान् एव मायिक इति । शरीरे सति जीवत्वम् एव इति निश्चयः । अतः ब्रह्म धर्म उपदेशात् सूर्यमंडलस्थः परमात्मा एव ॥ भाष्य १-१-६-१९.

११९. स्वलीला सिद्ध्यर्थम् तत् शरीरम् इति ॥ तस्य नियमनं तद् अर्थम् इति ॥ भाष्य. १, १, ६, २० ॥

१२०. अस्य लोकस्य का गतिः इति आकाश इति ह उवाच ॥ सर्वाणि ह वा इमानि भूतानि आकाशाद् एव सम् उत्पद्यन्ते ॥ आत्मन आकाशः संभूत इति कार्य निरूपणम् । आकाशः परमात्मा एव । तद् लिंगात् ॥ सर्व शब्द वाच्यत्वम् ब्रह्मणि एव ॥

भाष्य १, १, ७, २१

१२१. प्राणस्य मुख्यस्य अपि सर्व भूत संवेशनम् स्वपादौ श्रुतौ एव उपपाद्यते यदा वै पुरुषः स्वपिति प्राणम् तर्हि वाग् अपि इति आदिना । अत एव तद् लिंगात् प्राण शब्द वाच्यम् ब्रह्म इति ॥ भाष्य. १, १, ८, २२ ॥

१२२. अथ यदतः परो दिवो ज्योतिः दीप्यते विश्वतः पृष्टेषु सर्वतः पृष्ठेष्वनुत्तमेषु लोकेषु इदम् तावत्

यद् इदम् अस्मिन् अन्तः पुरुषे ज्योतिः इति ॥ तस्मात्पूर्वम् त्रिपादस्य अमृतम् दिवि इति उक्तत्वाद् अस्य त्रिपात् सबन्धि अमृतम् उपरितन लोकेषु इति ॥ भाष्य १, १, ९, २३.

१२३. तस्याम् एव व्याख्यान रूपायाम् गायत्र्याम् उदाहृतः मन्त्रः कथम् अकस्माद् ब्रह्म चतुः पाद् अभियध्यात् ॥ यद् वै तद् ब्रह्म इति ब्रह्मपदम् अपि छन्दसः प्रकृतत्वाद् तत्परम् एव अवगन्तव्यम् । शब्दस्य अपि ब्रह्मवाचकत्व सिद्धेः ब्रह्मः उपनिषद् इति वत् शब्द ब्रह्म इति च ॥ तथा तेन द्वारेण चेतसः अर्पणम् निगद्यते । भाष्य १, १, ९, २४

१२४. अस्मिन् वाक्ये तु गायत्र्याः पादा एव न उपदिष्टाः किन्तु ते ब्रह्मण एव पादा इति । भाष्य १, १, ९, २५.

१२५. मन्त्रे दिव्य एव उक्तम् ॥ अस्मिन् वाक्ये सर्वत्र उच्यते ॥ सर्वत्र विद्यमानस्य दिवि विद्यमानत्वं न विरूद्ध्यते ॥ भा० १, १, २, २६

१२६. अस्मिन् प्रकरणे अध्यात्मसंबन्धः ॥ आत्मानम् अधिकृत्य यः संबंधः । आत्मशब्दः ब्रह्मवाचि ॥ वस्तुतः जीवस्य ब्रह्मत्वाय तथा वचः ॥ तस्य संबन्धः । तद् धर्माः । तेषां बाहुल्यम् प्रतीयते । प्राणस्य प्रज्ञानम् आत्मत्वम् । स्वातन्त्र्येण आयुःदातृत्वम् । न वाचं विजिज्ञासीत वक्तारम् विद्यात् इति च उपक्रम्य, तद् यथा रथस्य आरेषु नेमिः अर्पिता, नाभावरा अर्पिता एवम् एवैता भूतमात्राः प्रज्ञामात्रा स्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः ॥ १, १, १० २८.

१२७. प्राणधर्मा भगवति न विरुध्यन्ते ॥ प्राणस्य भगवद् संबंधात् तद् धर्माणाम् अपि भगवद् संबन्धात् । अथवा वक्तृत्वादयः न जीवधर्माः किंतु ब्रह्मधर्मा एव । जीवे आश्रितत्वाद् भासन्ते । प्राणस्य तु संयोग एव ॥ तस्मात् सर्वे धर्मा ब्रह्मणि युज्यन्ते । भाष्य. १, १, १०, ३०. ॥

१२८. ब्रह्मवाक्यानां पुनः निःसंदिग्धानां समन्वयः स्वतः सिद्धः ॥ संदिग्धानि द्विविधानि शब्दतः अर्थतः च ॥ तत्र प्रथम सूत्र एव व्यवहारः स्थापितः ॥ अधिगानां ब्रह्मवाक्यानां चतुः लक्षण्या ब्रह्मपरत्वे सिद्धे श्रवणम् सिध्यति १, २, १, १.

१२९. न च प्राण शरीर रूपः जीवः भवति । तिरोहित आनन्दत्वेन

निराकारत्वात । अत आनन्दरूप प्राणशरीररूपत्व अभावात न वाक्यार्थः जीवः । भा.ष्य १, २, १, ३ ।

१३०. एतं प्राणशरीररूपम् कर्मत्वेन ध्येयत्वेन प्राप्यत्वेन च व्यपदिशति, कर्तृत्वेन च शारीरं व्यपदिशति, न च भजनीय रूप अकथने तादृशं फलम् सिध्यति इति । १, २, १, ४ ।

१३१. गुरुरूप तादृश रूपम् निःश्वमित वेदः उद्गमजनकं स्मृत्वा, तद् अर्थम् अपि स्मृत्वा, भगवान् पुरुषोत्तमः वाक्यानि उक्तवान् स्मृतिरूपाणि । १, २, २, ६ ।

१३२. अस्मदादि प्रतिपत्ति अर्थम् तु लौकिकवद् वचनं भोक्तृत्वाय । भगवति भोक्तरि प्रवेशार्थम् योग्य रूपत्वम् एव ॥ ओदनत्वं । प्राणानां तत्रैव समवलयात् मृत्युः अपि तत्रैव लीनः अग्रे जन्म मरणादि अभावाय भगवति एव प्रविशति, तस्माद् अस्मिन् वाक्ये ब्रह्मक्षत्र-मृत्यूनां भोग्यत्वेन ग्रहणात् अत्ता भगवान् एवेति सिद्धम् । १, २, ३, ९ ।

१३३. एष आत्मा इति ह उवाचैतद् अमृतम् अभयम् एतद् ब्रह्म इति । १, २, ५, १३ ।

१३४. तस्माद् अमृतम् आनन्दः अभयम् चित्, ब्रह्म सत्, सच्चिदानन्दरूपं आत्मेति उक्तं भवति । १, २, ५, १५ ।

१३५. तस्माद् अक्षिस्थाने सहज एव यो भगवान् अस्ति तत्परम् एवैतत् वाक्यम् इति सिद्धम् ॥ व्यापक सर्व गतस्य सर्वतः पाणिपादान्तत्वाद् आनन्द मूर्तिः भगवान् एव, ब्रह्मवादे तु एषैव मर्यादा, सगुण वादः ब्रह्मवाद अज्ञानाद् इति । १, २, ५, १७ ।

१३६. पुरुषस्य ब्रह्मत्वं निःसन्दिग्धम् एव, इषदानन्द तिरोभावेन ब्रह्म अक्षरम् उच्यते ॥ प्रकट आनन्दः पुरुष इति ॥ ब्रह्मविद् आप्नोति परम् इति अत्रैव तथा निर्णयात् ॥ तस्माद् अदृश्यत्वादि गुणकः परमात्मैव । १, २, ७, २१ ।

१३७. किं वैश्वानरशब्देन ब्रह्म प्रतिपादयितुं शक्यते, न वा इति, अर्थस्य अति सन्दिग्धत्वात् संदेहः, तत्र उपक्रमे ब्रह्म आत्मपद प्रयोगः अस्ति, न अन्यत् किञ्चित्, उपपादने तु एतद् धर्मा एव। साकारस्य तु लोकन्यायेन अब्रह्म-

त्वं, वैश्वानरः यदि अपि अग्नौ एव प्रसिद्धः तथा अपि पूर्वकाण्ड सिद्धत्वात् देवता आत्मपरिग्रहः युक्तः, ततः च संवत्सरः वा अग्निः वैश्वानरः इति। वैश्वानरः परमात्मा एव, कुतः ? साधारण शब्द विशेषात्, साधारण शब्दात् विशेषः। येन: भगवान एव वैश्वानरः भवति। साधारणात् धर्मात् शब्द एव विशेष इति वा। तेन परमेश्वर एव वैश्वानरः भवति न अन्यः॥ भगवद् अंशत्वाद् अन्यत्र उपचारात् प्रयोगः, तस्माद् वैश्वानरः परमात्मा। १, २, ८, २४।

१३८. स्मर्यमाणं रूपमनुमानं स्यात् प्रादेशमात्र वैश्वानरस्य ब्रह्मत्वे स्मरणम् हि मननं श्रुतस्य भवति, श्रुतिवाक्येभ्य एव हि श्रवणं। १, २, ८, २५।

१३९. अहं वैश्वानरः भूत्वा प्राणिनां देहम् आश्रितः॥ प्राणापानसम युक्तः पचामि अन्नं चतुर्विधम्॥ इति जाठर एव अग्नि वैश्वानरः भवति तस्यैव भगवद् विभूतित्वात्, वाक्यअर्थः यथाकथञ्चित् योजयिष्यते॥ न तु विरुद्ध धर्माणां विद्यमानत्वाद् भगवत्परत्वं वाक्यस्य, ॥ विरुद्धधर्माः शब्दादयः अन्तः प्रतिष्ठानम् च॥ अग्निः वैश्वानर इति शब्दः केवल वैश्वानर पदे भवेत्॥ भगवत् परत्वं योगेन॥ तद् अग्नि साहचर्याद् अग्निः एव भवेत्। १, २, ८, २६।

१४०. यद् यद् धिया त उरुगाय विभावयन्ति, तद् तद् वपुः प्रणयसे सद् अनुग्रहाय। १, २, ८, ३०।

१४१. एनं वैश्वानरम् अस्मिन् मूर्धचिबुकान्तराले जाबालाः समामनन्ति। न हि अनन्तः संकुचित स्थाने भवति। १, २, ८, ३२।

१४२. आत्मशब्दः व्याख्यातः स्वशब्देन, अत्र न जीवस्य आत्मत्वेन उपासनार्थम् आत्मपदं किन्तु पूर्व उक्तानाम् आत्मभुतं, तेन न भारकृतो दोषः। तज्ज्ञानेन अमृतत्व प्राप्तेः। १, ३, १, १।

१४३. मुक्तानां जीवन्मुक्तानां शरीरादि अध्यास रहितानाम् अवान्तर प्रकरण शरधनुन्यायेन ब्रह्मत्वेन ज्ञातं पृथक्त्वेन वा जीवं लक्ष्य योजयितुम् तद् उपसृप्यता व्यपदिश्यते, तेन शरीरादि अध्यास विशिष्टं न ब्रह्मणि योजनीयमिति। किंच वाग्विमोक एव न वस्तु विमोकः। वस्तुनः ब्रह्मत्वात्,

वाचा आरम्भण मात्रत्वाद् विकारस्य, अतः न सर्व विज्ञानबाधः अतः बाधक अभावाद् इदं ब्रह्मवाक्यमेव । १, ३, १, २ ।

१४४. अक्षर परमात्मैव, कुतः ? परोक्षेण ब्रह्मकथनार्थम् अक्षरपदम्, अन्य निराकरणार्थम् तद् धर्म उपदेशः च, तस्माद् अक्षरं परमात्मैव ॥ १, ३, ३, १० ॥

१४५. केवलभगवद् वाचकाः शब्दा ब्रह्मलोकशब्दः च ॥ १, ३, ५, १५ ॥

१४६. तस्माद् वाक्ये भगवद् अनुकारित्ववचनाद् न नानार्थ कल्पनम् ॥ भगवद् प्रकाशेन एव प्रकाशवत्वम् इति चकारार्थः ॥ १, ३, ६, २२ ॥

१४७. शब्दाद् एव प्रमितः ॥ अत्र सन्देह एव न कर्तव्यः ॥ शब्दाद् एव प्रकर्षेण विमानात्॥ यदि भगवान् तादृशः न स्याद्, अन्यस्य तादृशत्वम् न उपपद्यते ॥ तस्माद् भगवतः सर्वतः पाणिपादान्तत्वाद् यत्र यावान् अपेक्षते तत्र तावन्तम् श्रुतिः निरूपयति इति अंगुष्ठमात्रः परमात्मा इति सिद्धम् ॥ १, ३, ७, २४ ॥

१४८. अतः शब्दात् प्रभवः शब्दः उक्त पदार्थानां ॥ वेदोक्ताः सर्वे एव पदार्था आधिदैविका एव पुरुष अवयव भूताः ॥ सर्वानुकारित्वाद् भगवतः ॥ अतः नाम प्रपञ्चः वेदात्मकः भिन्न एव अंगीकर्तव्यः, स केवलं शब्दैक समधिगम्यः ॥ १, ३, ८, २८ ॥

१४९. निःश्वसित वचनात् च, तस्य अपि अयं प्राणभूतः नित्य इति ॥ अर्थ प्राधान्यात् ब्रह्मविद्या, पराविद्या, प्रपञ्चभेदाद् एव लौकिक वैदिक शब्दव्यवहार भेदौ ॥ तस्माद् आधिदैविक प्रतिपादकत्वाद् वेदस्य नित्यत्वम् ॥ १, ३, ८, २९ ॥

१५०. स्वमुख्येन मुखेन अमृतं दृष्ट्वैव तृप्यन्ति ॥ १, ३, ८, ३१ ॥

१५१. अमृतम् वै प्राणाः इति श्रुतेः ॥ प्राण उपासकस्य अपि अमृत प्राप्तिः युज्यते ॥ अग्नि हृदयत्वात् प्राण शब्दवाच्यत्वं तु पूर्वमेव सिद्धम् ॥ तस्मात् सर्वं जगत् कम्पनं भगवत् कृतम् इति भगवानेव वाक्यार्थः ॥ १, ३, १०, ३९ ॥

१५२. अत्र अपि सम्प्रसाद वचनात् परं ज्योतिः ब्रह्मैव, तस्माद् यः कश्चन शब्दः ब्रह्मस्थाने पठितः तद् वाचक एव इति ॥ १, ३, ११, ४० ॥

१५३. जीवस्य ब्रह्मत्व प्रतिपादने जीववाक्यत्वम ॥ स्वातन्त्र्येण ब्रह्मण

एव ज्ञानकर्मत्वे ब्रह्मवाक्यत्वं इति, यद्यपि अर्थज्ञाने न सन्देहः तथापि नियामकं हेतुमाह भेदेनेति ॥ जीवस्य शरीरे इन्द्रियाणां दुःखदातृत्वमेव ॥ भगवद् निर्गमने प्राणानां निर्गमनात् ॥ तस्य च इच्छा आधीनत्वात् तद् अभावे इन्द्रियाणि सुषुप्तौ तत्रैव समवलीयन्ते ॥ १, ३, १३, ४२ ।

१५४. किंच, सर्वस्य वशी इति आदि शब्देभ्यः स्पष्टम् एव ब्रह्मप्रकरणम् इति ॥ १, ३, १३, ४३ ॥

१५५. जीवप्रकरणम् हि एतत् मुक्ति उपायोस्य रूप्यते योग्यं शरीरमारुह्य गच्छेद् इति हरेः पदम्, तत्र जीवस्य ब्रह्मप्राप्तौ मुख्यं साधनं शरीरम्, स्वस्थः सर्वं सामग्री सहित अपराधीनमानत्वात्। एवं ज्ञात्वा युक्त सामग्रीकः तद् देशं प्राप्नोति। तद् ब्रह्मविषयकं महद् भवेति, ततः परम् अव्यक्तम् न प्रकटं भगवत् कृपैव, सा तु भगवद् अधीना न साधनान्तर आधीना, स च भगवान स्वाधीन इति ॥ १, ४, १, १.

१५६. अव्यक्त शब्देन हि सूक्ष्मम उच्यते, तस्माद् धर्म धर्मिणोः अभेदात् भगवानेव सूक्ष्मम् इति तत् कृपैव अव्यक्तवाच्या ॥ १, ४, १. २

१५७. स्वधर्मा अपि स्वाधीनाः स्वयमपि स्वाधीन इति, तथा कृपाविष्टः साधनं आनन्दरूपः फलम् इति ॥ १, ४, १, ३. ॥

१५८. अनेन जीवेन आत्मना इति जीव ब्रह्मणः च अनुप्रवेशः, भगवत अभोगे हेतुः, जीवेन भुक्तभोगाम इति ॥ १, ४, २, ९. ॥

१५९. यथा आदित्यो वै देवमधु, वाचं धेनुमुपासीत् ॥ १, ४, २, १० ॥

१६०. उच्यते प्राणादयः संज्ञाशब्दाः करणवाचकाः ते ज्ञानरूपम् वा क्रियारूपं वा कार्यम् जनयन्ति स्वव्यापारेण तेन तेषां करण आन्तर अपेक्षा अभावात् प्राणादीनां पुनः प्राणादिमत्वं बाधितं स्यात ॥ १, ४, ३, १२ ॥

१६१. अन्नस्थाने ज्योतिः ग्राह्यम ॥ १. ४, ३, १३ ॥

१६२. सर्वत्र भगवद् अन्वये नैव जीवस्यापि प्रियत्वं तस्यैव सुखरूपत्वात्। सर्वं व्यवहारस्य तन्मुलकत्वेन पूर्वम् उक्तत्वात् ॥ १, ४–७–१९ ॥

१६३. ब्रह्मवाद व्यतिरिक्ताः सर्वे वादाः अवैदिकाः वेदविरुद्धात् चेति

आह । वैदिकानां हि वेदः प्रमाणं ॥ १, ४, ९, २८ ॥

१६४ प्रथम अध्याये वेदान्तवाक्यानां विवादास्पदानां ब्रह्मपरत्वेन समन्वयः प्रतिपादितः, अधुना श्रुतिस्मृत्यविरोधः प्रतिपाद्यते ॥ २, १, १, १ ॥

१६५. अग्निः वाग् भूत्वा मुखम् माविशद् इति एवम् । देवता पदम् च श्रुतिः अन्तरे ॥ २, १, ३, ५ ॥

१६६. तत्र विकारः वाङ्मात्रेण एव आरभ्यते न वस्तुत इत्यर्थः प्रतिभाति। आरम्भण शब्दाद् आदिभ्यः तद् अनन्यत्वं प्रतीयते। कार्यस्य करण अनन्यत्वं न मिथ्यात्वं, कृतावेदितव्यः, अन्तः प्रविष्ट चोर वधार्थम् एव एष आरम्भः । अलौकिक प्रमेये सूत्र अनुसारेणैव निर्णय उचितः॥ २, १, ७, १४॥

१६७. शब्दान्तरं सत् शब्दाद् आत्मशब्दः ॥ २, १, ७, १८ ॥

१६८. यथा प्राणा पानानां नियमने जीवनमात्रम् अनियमने आकुञ्चनादि ॥ २, १, ७, २० ॥

१६९. नहि सम्पूर्णः अंशस्य हितं नियमेन करोति, सर्व इन्द्रिय व्यापार अभाव प्रसंगात् स्वलीलयैकं तु करोति एव ॥ २, १, ८, २२ ॥

१७०. यथा क्षीरम् कर्तारम् अनपेक्ष्य दधि भवन समये दधि भवति एवम् एव ब्रह्म अपि कार्यसमये स्वयम् एव सर्वम् भवति । २-१-९-२४

१७१. न हि लीलायां किञ्चिद् प्रयोजनम् अस्ति, लीलाया एव प्रयोजनत्वात्, ईश्वरत्वाद् एव न लीला पर्यनुयोक्तुं शक्या, सा लीला कैवल्यं मोक्षः । २-१-१०-३३

१७२. चेतनाः चतुर्विधा जीवाः सशरीरा अलौकिकाः च अन्ये अचेतनाः । २-२-१-२

१७३. सम्बन्धस्यः उभयनिष्ठत्वात्, स च नित्यः सदा सम्बन्धि सत्वम् अपेक्षते । २-२-३-१३

१७४. प्रति संख्या निरोधः नाम भावानां बुद्धि पूर्वकः विनाशः । आद्यः निरोधः पदार्थ विषयकः व्यर्थः द्वितीयः क्षणिक अंगीकारेणैव सिद्धत्वाद न अंगीकर्तव्यः २-२-४-२२

१७५. अनुभव स्मरणयोः एकआश्रयत्वम् एक विषयत्वञ्च । २-२-४-२५

१७६. पुनः दैत्यव्यामोहनार्थम् प्रवृत्तस्य भगवतो बुद्धस्य आज्ञया "त्वञ्च रुद्र महाबाहो मोहशास्त्राणि कारय

अतथ्यानि वितथ्यानि दर्शयस्व महाभुज, स्वआगमैः कल्पितैः त्वं च जनान् मद् विमुखान् कुरु, इति एवम् रूपया महादेवादयः स्व-अंशेन अवतीर्य वैदिकेषु प्रविश्य विश्वासार्थम् वेदभागान् यथर्थानपि व्याख्याय मद् असद् विलक्षणाम् असद् पर पर्यायाम् अविद्यां सर्व-कारणत्वेन स्वीकृत्य तन् निवृत्य-र्थम् जातिभ्रंशरूपम् सन्यासपाषण्डं प्रसार्य सर्वमेव लोकंव्यामोहित-वन्तः। व्यासः अपि कलहं कृत्वा शङ्करं शप्त्वा तूष्णीमास, अतः अग्निनामया सर्वतः सद् उद्धारा-र्थम् यथा श्रुतानि श्रुति सूत्राणि योजयता सर्वः मोहः निराकृतः वेदितव्यः। २-२-५-२६

१७७. ते हि अन्तर्निष्ठाः प्रपञ्च उदा-सीनाः। २-२-६-३३

१७८. जीवस्य हि चैतन्यं गुणः स सर्व शरीर व्यापी। प्रभाया गुणत्वमेव; स्पर्श अनुपलाभात् उद्गत औष्ण्य-वद्। २-३-१२-२५

१७९. इदानीम् संसार अवस्थायां सच्चि-त्प्राकट्यमेव मोक्षे तु आनंदअंशोपि प्रकट इति। तन् निवारयति, तथा सति नित्यं उपलब्धिः स्याद् आनंद अंशस्य, तथा सति, न संसार अवस्था उपपद्येत। जीवः निरानन्द एव ब्रह्म तु आनन्दरूपम्। २-३-१३-३२

१८०. भगवति सर्वे शब्दाः स्वभावत एव प्रवर्तन्ते औपचारिकत्व ज्ञापन अभावात्। २, ३, १४, ३६

१८१. न च कर्तृत्वमात्रं दुःखरूपम्, पयः पानादेः सुखरूपत्वात्। २, ३, १४, ४०।

१८२. प्रयत्न पर्यन्तं जीवकृत्यं, अग्रेतस्य अशक्यत्वात् स्वयमेव कारयति। फलदाने कर्मापेक्षः। २, ३, १५, ४२।

१८३. जीवेऽपि देह सम्बन्धकृतः, सम्बन्धः च आध्यासिकः भगवद् कृतः च, आध्यासिकः हि ज्ञानात् निवर्तते, द्वितियो भगवतैव। व्यासः अपि देह सम्बन्ध एव। २, ३, १६, ४८

१८४. प्राण शब्द प्रयोगः प्रियत्वाय प्राणः इन्द्रियाणि मनसः मुख्यत्वाद् एक वचनं। ये प्राणं ब्रह्मः उपासत इति। २, ४, १, १।

१८५. स प्राणः स्वतन्त्रः परतन्त्रः वा इति विचारे स्वतन्त्र इति। प्राणः अस्वतन्त्रः, मुख्यतः भगवद् अधीनः व्यवहारे जीव आधीनः, कुतः? तत् सह शिष्टयादिभ्यः चक्षुरा-दिभिः सह शासनात् इन्द्रिय-

जपवत् प्राणजपस्य अपि इष्टत्वात् ।
२, ४, ५, १० ।

१८६. प्राणनिमित्तैव शरीरस्थितिः इति तस्माद् व्यापार अभावेपि स्वरूप स्थिति मात्रेण तस्य उपकारित्वम् ।
२, ४, ५, ११ ।

१८७. वागादीनां देवता अधिष्ठानवतां प्रवृत्तिः स्वत एव वा, वागादीनां ज्योतिः आदि अग्नि आदिः अधिष्ठानम् अवश्यम् अंगीकर्तव्यम्, कुतः ? तदा मननात्, अग्निर्वाग् भूत्वा मुखं प्राविशेद इत्यादि, अयम् अर्थः । आध्यात्मिक आदिदैविकयोः एकत्वात् वदनादिकार्यार्थम् आध्यात्मिका एव निरूपिता, उद्गमने एतस्मात् जायते प्राण इत्यादिषु, वागादीनां नियमेन तत् तत्जीव सान्निध्य स्वतः च निर्गमनं मृत्युरूप श्रयेण तत्र लयः, पुनः उद्गमः समष्टिव्यष्टिभावः च अन्यथा न उपपद्येत ।
२–४–६–१४ ।

१८८. प्राणवता अधिष्ठितं वागादिकुतः ? शब्दात् । तत्र अन्योन्य उद्गातृत्ववरणे तथा उद्गाने यो वाचि भोगः तं देवेभ्य इति आम्नातं ।
२–४–७–१५ ।

१८९. अग्न्यादेः प्राण सम्बन्धः नित्य इति सर्वदा अधिष्ठातृत्वम्, प्राणस्य तत् सम्बन्धस्य च इति चकारार्थः, प्राणसहायेनैव यदा उचित वर्ण उद्गम इति लोके स्वामिभृत्य न्यायेन जीवे भोगः फलिष्यति ।
२–४–७–१६ ।

१९०. सुप्तेषु वागादिषु प्राणः जागर्ति, स्वामि सेवकवत् च अनेकं वैलक्षण्यम् । २–४–८–१९ ।

१९१. चक्षुरादि देवानां जीव रूपाणाम् एव वागादि रूपेण अनुप्रवेशात् तत् साहचर्येण नामरूपयोः अपि जीव एव कर्ता भविष्यति ।
२–४–९–२० ।

१९२. तस्माद् अधिकारिजन्म निर्धारः, तद् अनु तस्य ब्रह्मभाव योग्यता । तत्र पूर्वजन्मनि निःकाम यज्ञ कर्तुं ज्ञानं रहितस्य मरणे ज्ञान अभावेन यज्ञ अभिव्यक्ति अभावात् भूत संस्कारक एव यज्ञः जात इति । तस्माद् योग्य शरीर निःपत्तये स्वयमेव गच्छति भूत सहितः, श्रद्धाहोम अनन्तरम् । न हि वस्तुतः यज्ञानाम् इदम् फलम् भवति । अतः मुख्ये विलम्बात् प्रतिपत्तिः एषा । तस्य मुख्य फलस्य वा अन्तरे या प्रतिपत्तिः तद् अर्थम् वा । मरण अनन्तरम् एव कर्म

समाप्तेः । सम्यग् भूतानि तदेव संस्कृतानि । प्रतिदिन संस्कार अर्थम् च नैकठ्यम् अपेक्ष्यते । शरीरदाहे वा तद्गतानि भूत सूक्ष्माणि सम्यक् तमेव आस-क्तानि । प्रश्ने हि पुरुषत्वं वदति, न देहं मात्रम् । तत्र अपि सोमः राजा चेतनः । न हि अन्य अधिष्ठाने हि अन्यस्य शरीरम् भवेत् । ३, १, १, १ ।

१९३. शुद्ध आपाम एव इदम् शरीरम् । ३, १, १, २ ।

१९४. प्राणस्य गतिः प्राण गतिः, प्राणः गच्छन् स्व अपि आयकं गृहीत्वैव गच्छति, जलौकावद् अन्यत्र देहसम्बन्धः । मुक्तौ न प्राणा गच्छन्ति । क्रममुक्तौ अपि देह सम्बन्ध इति पौराणिकाः । देव भाव इति औपनिषदाः ।
३, १, १, ३ ।

१९५. वागादीनाम् अग्न्यादिभाव अनु-वादः । ततः मन्त्रणात् जीवस्य ब्रह्मभावः अवगम्यते सामग्र्या गतत्वात् । उभयोः वचन विधा-नात्, ब्रह्मविद्या च गोप्या ।
३, १, १, ४

१९६. ता एव आप एव श्रद्धा शब्देन उच्यन्ते । श्रद्धा सह भाव संस्कार द्वारेण संस्कृतेषु भूतेषु सिद्धः, तेन मनः स्थाने आप एव वाच्याः । श्रद्धा प्रयोगस्तु कामना-कृत व्यावृत्त्यर्थः तत्र फल एव श्रद्धा न कर्मणि, यः यद् श्रद्धः स एव सः इति श्रद्धा या आश्रयस्य विषयभाव जनकत्वात् कर्तुः कर्मभावाय श्रद्धाप्रयोगः । तस्मात् प्रथमे अपि आपाम अस्ति श्रवणम् । ३, १, १, ५ ।

१९७. अत्र भावे हि मुख्यम् भक्षणम् भवति । तद् अन्यस्य अन्नभावः न उपपद्यते । ब्रह्मज्ञाने तु भवति । अतः भक्षणम् अपि गौणम् । अथ यः अन्याम् देवताम् उपास्त इति अत्र यथा पशु शब्दः एवम् अत्र अपि भक्षणम सह क्रीडानम् सेवक भावः । देवानाम भक्षणम् भगवद् अवयवानाम् एव । आधि-भौतिकानां देवानाम् अशनम् एव । तस्मात् भक्षणस्य गौणत्वात् सोम-भावेन काचित् चिन्ता
॥ ३, १, १, ७ ॥

१९८. दृष्ट स्मृतिभ्याम् । दृष्टम् तावत् भोग साधक मूल द्रव्य नाशेपि भोग साधकता दश देह वस्त्र आदि सहित एव तस्मात् स्थानात् अपगच्छति । अन्यथा सद्य एव

देहपातः स्यात्। अन्यथा पूर्व जन्म स्मृति अभावे विषय आसक्तिः प्रसज्ज्येत। देवकृपा सहितः वृष्टिः भवति इति ॥ ३, १, २, ८ ॥

१९९. चरणश्रुतौ या योनिः उक्ता, सा उपलक्षणार्था, अनेन पूर्व जन्मनि समीचीनम् कृतम् इति ज्ञापिका न तु तस्मिन् जन्मनि समाचीन करणे नियामिका, अन्यथा ब्राह्मणानाम् निषिद्ध करणम् न स्यात् ॥ ३, १, २, ९ ॥

२००. रमणीय अनुष्ठातॄणाम् रमणीय शरीर प्राप्तिः एव बोध्यते ॥ ३, १, २, १० ॥

२०१. कर्मफलम् च द्वयम् एव ईश्वर इच्छया नियतम्। कर्म पुनः भगवद् स्वरूपम् एव ब्रह्मवादे सः अभिव्यक्तः फलपर्यन्तम् तद् आदि संयोग इति स्वमतम्। अन्त संयोग पक्षम् आह एकदेशित्व ज्ञापनाय ॥ ३, १, २, ११ ॥

२०२. अनुभवार्थम् आरोहः, अनुभूय अवरोह इति। पूर्वजन्म धर्मस्य चित्त शुद्धिः उपयोगः। अतः पापस्य अभावात् पुण्यस्य उपक्षीण त्वात् तस्य पञ्च अग्नि प्रकार एव। ज्ञान उपयोगि जन्मनि पापसंश्लेष अभाव उपायम् अग्रे वक्ष्यति ॥ ३, १, ३, १३ ॥

२०३. पाप उपभोगार्थम् यमालय गमनम् अंगी कर्तव्यम् ॥३, १, ३, १५॥

२०४. जडे तु पञ्चम्यं आहुतिः भरत एव हि ईश्वर इच्छया जन्म द्वयम् अधिकम्। त्रिभिः इति वचनात्। ततः पूर्वम् अस्मरणात् बाल्यादिवत् एव जन्म त्रयम्। पञ्च-आहुति नियमाभावस्तु ज्ञान उपयोगि देहे अपि अंशे अवतरणे पुष्टिमार्गत्वात न तत्र दोषः ॥ ३, १, ४, १८ ॥

२०५. साधन फलयोः प्रत्यक्षत्वात् न वृष्टि मात्रेण अन्नम् भवति बीजव्यतिरेकेण बीजस्य हि फलम्। न निमित्त मात्रेण तद्भावः वक्तुम् शक्यते। तृतीय आहुतौ शब्देन शब्द साम्येन कारणभूतस्य जलस्य अवरोधो ग्रहणम्। अतः पंचाग्नि विद्यायाम् अपि देव होमात् कारणभूतैव वृष्टिः जातेति न अत्र बीजान्तर अपेक्षा ॥३, १, ५, २१॥

२०६. अन्नभावापन्नस्य एव बहुकाल श्रवणात्। बहुकाले स्थितौ हि तद रूपता कारणवशाद् देवानाम् मनुष्य भाववत्। ऐक्यपक्षे अपि ज्ञानवतः

गृहस्थस्य दुर्लभत्वात् एवम् वचनम् ॥ ३, १, ५, २३ ॥

२०७. शब्दात्। देवा अन्नम् जुह्वति, तस्या आहुते रेतः सम्भवति इति देवैः आहुतिरूपेण होम वचनात् शुद्धत्वम्। अन्यस्य हि संस्कारेणैव शुद्धिः। तस्मात संस्कार शब्दात् शुद्धयेव अन्नम् ॥३, १, ६, २४॥

२०८. शरीरम् अर्थम् एव देवैः तत्र तत्र होमः कृतः ॥ ३, १, ७, २६ ॥

२०९. योनेः निर्गतम् शरीरम् गर्भ शब्देन उच्यते। अग्नेः उत्थित स्यैव फलरूपत्वात् शरीर शब्देन वैराग्य आदि युक्तः सूचितः। न तु स्वयम् तद् अभिमानेन जात इति। तस्मात् योग्य देहः साधन सहितः ब्रह्म ज्ञान अर्थम् निरूपितः ॥ ३, १, ८, २७ ॥

२१०. स्वप्नस्य सत्यत्वे तत् कृत गुणदोष सम्बन्धः जीवस्य भवेत्। यथा श्रुतिः वदति, तथा एव स्वप्ने दृश्यते। देवादिवाक्यानाम् प्रबोधे अपि बाध अभावात् श्रुति वादिनाम् श्रुतिः एव प्रमाणम्। किंपुनः अनुभव संवादिनी। तस्मात् स्वप्ने सृष्टिः अस्ति ॥ ३, २, १, १ ॥

२११. भगवद् निर्मितत्वात् स्वप्नस्थस्य अपि सत्यत्वम् ॥ ३, २, १, २ ॥

२१२. स्वप्न सृष्टिः माया मात्रम्। स्वमात्र विहारः तु महामायावित्वात् मायया अपि सिद्धयति। देवता आज्ञादिः तु जीव ब्रह्मणः विद्यमानत्वाद् युक्ता। अलौकिक ज्ञाने हि प्रतिच्छायत्वात् संवादः, क्वचिद् भगवद् आवेशे ईषद् संवादः अपि। तस्मात् स्वतंत्र सत्यतायाम् प्रमाण अभावात् मायामात्रम् स्वप्न प्रपंञ्च इति सिद्धम् ॥ ३, २, १, ४ ॥

२१३. सूचकः शुभ अशुभ फल सूचकः भवति स्वप्नः। चकारात् क्वचिद् आज्ञा विशेषदानम्। कलिकालादेः प्रत्यक्षे बाधकत्वात्। प्रातः सूचक फलस्यैव दृष्टत्वात्, न तु स्वप्न पदार्थस्य। तस्मात् सूचन अर्थम् जीव प्रदर्शनम् इति ॥ ३, २, १, ४, ॥

२१४. अस्य जीवस्य ऐश्वर्यादि तिरोहितम्। तत्र हेतुः परः अभिध्यानात्। परस्य भगवतः अभितः ध्यानम् स्वस्य एतस्य च सर्वतः भोगे इच्छा, तस्मात् ईश्वर इच्छया जीवस्य भगवद् धर्म तिरोभावः। ऐश्वर्य तिरोभावात् जन्मादि सर्व आपद् विषयत्वम् ज्ञान तिरोभावाद्

देहादिषु अहम् बुद्धिः सर्व विपरीत ज्ञानम् च अपस्मार सहितस्यैव वैराग्य तिरोभावात् विषय आसक्तिः आनंद अंशस्तु पूर्वम् एव तिरोहितः येन जीवभावः । अत एव काममयः । अकामरूपतया द्आनन्दस्य । निद्रा च सुतराम् तिरोभाव कर्त्री भगवद् शक्तिः । अतः अस्मिन् प्रस्तावे जीवस्य धर्म तिरोभाव उक्तः । भाष्य ॥ ३, २, १, ५ ॥

२१५. ईश्वर इच्छया ऐश्वर्यादि तिरोभावम् स्वमते निरूप्य । देह सम्बन्धाद् एव अस्य सर्व तिरोभावः । अस्मिन् पक्षे देह वियोग एव पुनः ऐश्वर्यादि प्राप्तिः । निद्राया विवेकज्ञान अभाव अवसरत्वात् यथा व्याख्यात एव अर्थः । भाष्य
॥ ३, २, १, ६ ।

२१६. तत्र निद्रया भगवद् शक्त्या बहिः दृष्टि आच्छादने भगवद् लीलायाम् तां पश्यति । तत्र अपि आच्छादने गाढ सुप्तः ज्ञान रहितः क्रिया शक्त्यां अन्तर्भगवन्तम् वा प्रविशति ज्ञान-शक्तेः सर्वथा तिरोधनात् तस्मात् सुषुप्तौ न प्रपंच सृष्टिः । भाष्य
॥ ३, २, २, ७ ॥

२१७. ततः नाडीभ्यः पुनः हृदय देशम् गत्वा भगवतः वा समागत्य, जागर्ति इति, आहोस्विद् यत्र स्थितः तत एव जागर्ति इति । तत्र श्रुति अनुरोधाव हृदय देशम् आगत्य जागर्ति इति एवम् प्राप्ते, उच्यते । प्रबोधो अस्मात् । अस्मद् आत्मनः सकाशाद् एव प्रबोधः । प्रियमेव संपरिष्वक्तस्य बोध अभावे कथम् आगमनम् । अत एव सम्परिष्वक्तः निबिड निद्रः । तस्मात् यत्रैव तिष्ठति तत एव प्रबोध इति सिद्धम् । भाष्य
॥ ३, २, ३, ८ ॥

२१८. केवल साक्षिवादः तु न ब्रह्मवादः । तस्मात् एक एव जीवः स्वप्न आदि दोष सम्बन्ध रहितः तादृश जन्म युक्तः भगवद्ज्ञान ज्ञान अधिकारि इति सिद्धम् । भाष्य
॥ ३, २, ३, १० ॥

२१९. भगवद् स्वरूप प्रतिपादकानि हि एतानि वाक्यानि, न तु अनुवादकानि । भाष्य
॥ ३, २, ४, ११ ॥

२२०. यथा प्रशापनस्य मुख्यत्वम् तथा सर्वं कर्मेति लौकिक कर्म अनुवादेन भगवत् सम्बन्धे स्पष्टम् एव मुख्यत्वम् । तस्मात् कार्यवत तत् धर्माणाम् अपि कार्यत्वात भग-

वत्वम् न भगवद् धर्मत्वम् इति सिद्धम्। भाष्य॥ ३, २, ५, १४॥

२२१. यथा सौरः प्रकाशः व्यवहार्यो अव्यवहार्यः च नहि स्वतः सम्पादयितुम् शक्यते, स्थापयितुम् वा, आगते तु सूर्ये मेघादि अभावे च सान्निध्यमात्रेण व्यवहारः कर्तुम् शक्यते, तथा लौकिक वाक्मनोभिः न शक्यते व्यवहर्तुम्, ईश्वर सन्निधाने तु शक्यत इति द्वयम् आह श्रुतिः। भाष्य ॥ ३, २, ५, १५ ॥

२२२. वेद निःश्वासायनभूत सम् उत्थान आदेः उक्तत्वात् च। अतः न इन्द्रियाणाम् परिकल्पना. किन्तु सर्व आकार स्वरूपम् वस्तु एव तादृशम् इति मन्तव्यम्। कृत्स्न वचनात्। भाष्य। ३, २, ५, १६॥

२२३. सर्वत्र लौकिकम् प्रतिषेधति अलौकिकम् विधत्ते इति युक्त्या निर्णयः। भाष्य। ३, २, ६, २२॥

२२४. न हि केनचिद् अपि चक्षुषा मनसा वा ब्रह्म दृष्टम् अस्ति। सर्व रूपत्वे तु सर्वैः एव द्रष्टुम् शक्यते। ॥ भाष्य ३, २, ७, २३ ॥

२२५. यतः संराधने सम्यक् सेवायाम् भगवत् तोषे जाते दृश्यते। अतः लौकिक अलौकिक प्रत्यक्ष विषयत्वाद् उभय वाक्यार्थरूपम् अपि ब्रह्म ॥ भाष्य ३, २, ८, २५ ॥

२२६. तपः प्रणिधान आदि कर्मणि भगवतः प्रकाशः। तत्र यथा तेषाम् कामः तथा प्रकटि भवति। यदि एकवारम् प्रकटः स्यात् तदा तद् रूपत्वम् अङ्गिक्रियेता अपि। प्रति भक्तम् प्रतिकर्मच आविर्भावः अतः प्रकाशः अपि कृत्रिम एव। दीप प्रकाशवत्। तस्माद् न भक्त प्रत्यक्षेण निर्णयः ॥ भाष्य ३, २, ८, २९ ॥

२२७. न हि एकम् वस्तु प्रतिक्षणम् अन्यादृशम् भवति निमित्त भेद व्यतिरेकेण। क्वचित् भक्तकामः च निमित्तत्त्वेन प्रतियते। न हि निमित्त भेदेन जायमानं वस्तु भवति। किन्तु तथा सति लिङ्गम् विग्रह एव भवति॥ भाष्य ३, २, ८, २६ ॥

२२८. यथा सर्पे ऋजुः अनेक आकारः कुण्डलः च भवति, तथा ब्रह्मस्वरूपम् सर्व प्रकारम् भक्त इच्छया तथा स्फुरति ॥ भाष्य ३, २, ८, २७ ॥

२२९. तेजः शब्द वाच्यत्वात् ॥ भाष्य ३, २, ९, २८ ॥

२३०. उत्पत्त्या च उपपत्त्या च विचार-

द्वयम् । उपपत्त्या पूर्वनयनम् स्व सिद्धांत:।। भाष्य ३, २,, ९, २९ ।।

२३१. अज्ञान व्यवधानम् ज्ञान प्रशंसा अर्थम् उक्त्वा, ज्ञान अनन्तरम् संसार सम्बन्ध अभावाय सेतुत्वम् वदति । पापाब्धि तरणार्थम् । य: च तरति, तद् गता: च दोषा गच्छन्ति इति च । अत: संसार फलयो: मध्ये विद्यमानत्वात् तीर्ण-स्यैव फल श्रवणात् फलरूपम् वस्तु किञ्चिद् अन्यद् अस्ति इति ज्ञायते। निधित्वेन फलवचनम् अवान्तर फलपरम् भविष्यति ।
।। ३, २, १०, ३१ ।।

२३२. अस्मिन् वाक्ये तु गायत्र्या: पादा एव न उपदिष्टा: किन्तु ते ब्रह्मण एव पादा इति । १-१-२-२५

२३३. मन्त्रे दिव्य एव उक्तम् । अस्मिन्वाक्ये सर्वत्र दिव्यम् उच्यते । १-१-२-२६

२३४. प्राणधर्मा: भगवति न विरूध्यन्ते । प्राणस्य भगवद संबंधात्तद् धर्माणाम् अपि भगवद् सम्बन्धात् । अथवा वक्तृत्वादय: न जीवधर्मा: किन्तु ब्रह्मधर्मा एव जीवे आश्रित्वाद् भासन्ते । प्राणस्य तु संयोग एव । तस्मात् सर्वेधर्मा ब्रह्मणि युज्यन्ते । १-१-१०-३०

२३५. श्रुते: जीवपरत्वमेव स्यात् न ब्रह्मपरत्वम् । १-१-५

२३६. नहि अहंकारादय: पदार्थो ब्रह्मवादे सम्भवन्ति ! १-४-१

२३७. तथा कृपाविष्ट: साधनं आनन्दरूप: फलमिति । १-४-३

२३८. अन्नस्थाने ज्योति: ग्राह्यम् । १-४-१३-३

२३९. अलौकिक प्रमेये सूत्र अनुसारेणैव निर्णय उचित:, न स्वतन्त्रतया किंचित परिकल्पनं । २-१-७ (१४)

२४०. एवं अत्रापि भक्षणं सहक्रीडनं सेवकभाव: । ३-१-७

देवानां भक्षणं भगवद अवयवानाम् एव, अशन अनशने तस्या विरूध्ये, आदिभौतिकानां देवानां अशनमेव, तस्याद भक्षणस्य गौणत्वात् सोमभावे न काचित् चिन्ता । ३-१-७

२४१. पूर्व जन्म स्मृति अभावे विषया शक्ति : प्रसज्येत् । ३-१-८

२४२. भक्षण भवनयो: नियमो न स्यात् । ३-१-१०

२४३. य: पूर्व जन्मनि विहिताचरण करोति स उत्तम जन्म प्राप्नोति, यस्तु निषिध्ध

आचरण करोति स श्वादियोनिम् प्राप्नोति। ३-१-९

२४४. फलांश एव अनुशय इतितु स्वमतं, कर्म च द्वदम् एव इश्वर इच्छया नियवं, कर्म पुनः भगवद स्वरूपम् एव ब्रह्मवादे, सो अंशो अयिव्यत्मः फलपर्यन्तम् तद आदि संयोग इति स्वभतः। ३-१-११

२४५. तस्मात् सोमभाव अनन्तरम् एव सर्वेषा जन्म इति प्राप्तम्। ३-१-३-१२

२४६. वहन्यादि देवानां जीवरूपाणाम् एव वागादि रूपेण अनुप्रवेशातु ततु साहचर्येण नाम रूपयो अपि जीव एव कर्ता जीवस्यतु शरीर सम्वन्धे कतृत्वाद तस्माद नामरूप प्रपञ्चस्य भगवानेव कर्ता इति सिध्धम्। २-४-९

२४७. भगवद निर्मिततत्वाद स्वप्नस्थ स्यापि सत्यम्। ३-२-२

२४८. क्वचित् भगवदे आवेशे ईषत संवादोपि तस्मात् स्वतंत्र सत्यतायां प्रमाण अभावान् मायामात्र स्वप्ने प्रपञ्च इति सिध्धमु। ३-२-३

२४९. सूचकः शुभ अशुभ फलसूचको भवति स्वप्नः चकारातु क्वचित् आज्ञाविशेषदानं, कलिकालादेः प्रत्यक्षे वाधकत्वात्, युक्तस्य अयम अर्थः। ३-२-४

२५०. ननु जीवाय भगवान सृष्टिम् करोति प्रदर्शयति च स्वस्यलीलां, अंशाश्रय अयम् कथम अस्य दुःखित्वम् इति आशक्य परिहरति तु शब्दः अस्य भगवदधर्म निराधाम ऐश्वर्य तिरोभावातु दीत्वम् पराधीनत्वम्, आनन्द जीवस्य एश्वर्यादि तिरोहित। सर्वतो भोगेच्छ। तस्माद् इश्वरेछया जीवस्य भगवद् धर्म तिरोभावात् अंशस्तु पूर्वमेष तिरोहितो येन जीवभावः। ३-२-५

२५१. तत्र निंद्रया भगवद रात्तया वहिः द्दष्टि आच्छादने भगवदलीलायां तां पश्यति तत्र अपि आच्छादने गाढसुप्तौ ज्ञानरहित : क्रियाशक्तिः आन्तर भगवन्तम वा प्रविशति वहिः नाडीपु वा समाया ति। सुपुप्तौ न प्रपंच सृष्टिः ३-२-७

२५२. भगवद स्वरूप प्रतिपादकानि हि एतानि वाक्यानि, न तु अनुवाद कानि। ३-२-११

२५३. न हि केनचिद अपि चक्षुपा मनसा वा ब्रह्म दष्टम् अस्ति, सर्वरूपत्वे तु सर्वैरिव द्दष्टुम राक्यते। ३-२-७-२३

२५४. ब्रह्म तु उभयएवं, उभय व्यपदेशात्। उभयरूपेण निर्गुणत्वेन अनन्नगुणत्वेन सर्व विरूध्ध धर्मेण रूपेण व्यवदेशातु ताई कथम, एक वस्तु अनेकधा भासते तत्राह अहिकुण्डलवत्। ३-२-८-२७

सुबोधिनिजी प्रथम स्कंध

२३२. श्रीमद् भागवत आगमः सुरतरुः लोके फलत्वम् गतः भाषाभेद विभेदतः त्रयम् अपि स्यात् नः विरुद्धम महत् । अर्थम् तस्य विवेऽचितुं न हि विभुः वैश्वानरात् वाक्पतेः अन्यः तत्र विधाय मानुष-तनुम् मां व्यासवत् श्रीपतिः । दत्वा आज्ञाम च कृपा अवलोकन पटुः यस्माद् अतः अहम मुदा । गूढ अर्थम् प्रकटी करोमि बहुधा व्यासस्य विष्णोः प्रियम् ।

॥ का. १, १ ॥

२३३. भगवद् तात्पर्यम् वेद एव, न लोक इति वा । प्रपञ्चेन बन्धः, वेदेन मोक्षः । देह इन्द्रिय अन्तःकरण धर्मसम्बन्धः दोषः । न ब्रह्मणि शरीरे इन्द्रिय सम्बन्धः ।

॥ सु. १, १, १ ॥

२३४. पर उत्कर्ष असहनम् मत्सरो दोषः । भगवद् साक्षात्कारे तु अन्ततः सायुज्ये वा शान्त परमानन्दः ।

॥ सु. १, १, २ ॥

२३५. व्यापि वैकुण्ठे अक्षरात्मके प्रणव-बीजः वेद तरुः अस्ति । अयम् अर्थः गोप्यः अपि भक्त चिन्तया परवशस्य भगवतः हृदयात् आगतम् इति गलितम् । तथा रसात्मकस्य भगवतः भागवतम् रसः । तत् स्पर्शनमात्र योग्यम् न भवति किन्तु पान योग्यम् इति अर्थः ॥ सु. १, १, ३ ॥

२३६. तत्र आनन्दस्य हरेः लीला शास्त्र अर्थः ॥ सु. १, १, ४ ॥

२३७. तत्र यावत् सर्वज्ञत्वम् न भवति तावद् भगवद् शास्त्र अपरिज्ञानम् ॥ सु. १, १, ६ ॥

२३८. गुरूणाम् अनुग्रहात् सर्वम् भवति इति अर्थः ॥ सु. १, १, ८ ॥

२३९. न हि श्रवण इच्छा योगेन निवर्तते । न वा योगः सर्वैः कृतम् शक्यते । न वा योगेन भगवदीयः पदार्थो ज्ञातुम् शक्यते, भगवद् वाक्य

व्यतिरेकेण । अत एव साक्षात् परम्परया वा भगवन् मुखोक्तम् गुरु-मुखात् श्रुतम् ॥सु. १, १, १३ ॥

२४०. तस्मात् न भगवद् कथा रसाद् अधिको रसः कश्चिद् अस्ति । ब्रह्म आनन्द रसः अपि न्यून इति । ॥ सु. १, १, १९ ॥

२४१. आनन्द मात्र कर पाद मुख उदर आदित्वात् । अयम् लोके हि गुप्तः स्व सत् चित् आनन्द रूपताम् न प्रकाशयति ॥ सु. १, १, २० ॥

२४२. मर्यादा अतिक्रमे पुनः पाप बाहुल्याद् भगवद् कथा रुचिः एव निवृत्ता भवति । तस्मात् सर्वदोष निवर्तकः कलिः इति तस्मिन् न आगते कथायाम् सक्षणाः । वैष्णव इति । यत्र क्वचित् कथा श्रवणे दैत्यः बुद्धि नाश संभवति । तदा सर्वम् नश्येत् ॥ सु. १, १, २१॥

२४३. धर्मस्य हि ग्लानौ तद् रक्षार्थम् स भगवान् अवतरति ॥ सु. १, १, २३ ॥

२४४. भगवद् साक्षात्कारः फलम् । साधन पारम्पर्ये प्रथमतः धर्मः । अन्तिमो भगवद् प्रसादः॥ सु. १, २, ६ ॥

२४५. जीवस्य तत्त्व जिज्ञासा फलम् उक्तम् । तत् च साक्षात्कार इति पर्यवसितम् । तत्र विचार सहित प्रमाणेन यद्यपि निर्विचिकित्सम् शाब्द ज्ञानम् भवति तथा अपि अन्तःकरण दोषात् न साक्षात्कारः सिद्ध्यति । तद् अर्थम् प्रथमम् धर्मः । ततः अन्तःकरणशुद्धौ वेदादि सत् प्रमाणे श्रद्धा । ततः तद् अर्थस्य मननम् । ततः निदिध्यासनेन साक्षात्कार इव ज्ञानम् । ततः विषयेषु वैराग्यम् । ततः श्रवणादि साधन भक्तिः । ततः परम भक्तिः । ततः सर्वत्र भगवद् साक्षात्कारो हृदि बहिः अपि इति अर्थः । आत्मानम् तं भगवन्तम् आत्मरूपम् ॥ सु. १, २, १२ ॥

२४६. ततः भगवद् कथा श्रवणम् । ततः कथा रुचिः । ततः कथाया अन्तेपु च श्रद्धा ॥ सु. १, २, १६ ॥

२४७. यथा स्पर्शमणि स्पर्शेन ताम्र लोहयोः सुवर्णता भवति । तथा च त्रिभिः निर्मितम् पात्रम् सर्वम् सुवर्णम् भवति । तथा भक्त्या स्पृष्टम् चित्तम् सर्वम् सत्त्वम् भवति ॥ सु. १, २, १९ ॥

२४८. न हि भगवान् शेते वस्तुतः । अस्ति च योगभूता निद्रा काचित् शक्तिः । सा हि जीवानाम् क्लेश-नाशिनी स्व समीपं च जीवान्

आनयति, गुह्यम् च प्रकटी करोति
॥ सु. १, ३, २ ॥

२४९. नहि जीवस्य ब्रह्मचर्यम् सम्भवति। इन्द्रियवत्त्वात्। यथाहि क्षुद् अग्निः आविर्भूतः सोढम अशक्यः। एवम् बीज आधार काम अग्निः अपि। तत्र यथा जलपानम्, तथा स्त्री प्रेक्षणादि ॥ सु. १, ३, ६ ॥

२५०. सर्वरस आस्वादनं भगवत उत्तम्। ते च रसा उत्कृत्वा अपकृष्टाः स्वत आधारतः अधि कारिभेदन च भवन्ति ॥ १, ३, ३७ ॥

२५१. भगवतः सर्व सम्बन्धि भागवतम्
॥ सु. १, ३, ४० ॥

२५२. धर्मः तु भगवतैव सह गतः
॥ सु. १, ३, ४३ ॥

२५३. यज्ञद्वारा हि वेदे स्त्रीणाम् उपयोगः
॥ सु. १, ४, २९ ॥

२५४. भगवद् सम्बन्धिनाम् धर्माणाम् भगवता सह अभेदात यत्र क्वचिद् अवतीर्णः भगवान् यथा सेव्यते तथा तत्र क्वचिद् अपि स्थितानि नामानि श्रूयन्त इति अर्थ बलम् निरूपितम् ॥ सु. १, ५, ११ ॥

२५५. समर्पणम् एव भक्तिः। न च भगवति अर्पितम् कर्म भवति इति अर्थः। चकारात् ईश्वर अर्थम् वा क्रियमाणम्। तस्मात् सर्व कर्मसु भक्तिः सहकारिणी
॥ सु. १, ५, १२ ॥

२५६. भगवद् धर्म स्फुरणे वा हेतुः। सर्वे हि जीवाः स्वभावतः बद्धाः कालपाशेन। तेषाम् बन्धन निवृत्तिः महान् उपकारः। सा च काल-नियामक भगवद् चरित्र आवेशाद् एव भवति इति आह अखिल बन्धमुक्तय इति – भगवान् एव स्वयम् सर्व उद्धारकः स्फुरिष्यति
॥ सु. १, ५, १३ ॥

२५७. देहादि धर्मम् तद् अधिकारेण वा प्रवृत्तम्। स्वस्य तु जीवस्य दास-त्वाद भगवद् सेवैव स्वधर्मः। हरेः भगवतः परब्रह्मणः भक्तिमार्ग अनुसारेण चरणसेवा जीवानाम् स्वाभाविको धर्मः। अंशत्वे अपि अंशिनः सेवा मुख्या। भगवद् भजनम् तु न कालसाध्यम्। सर्वत्र भगवन् मार्गे भगवत एव साधन-त्वेन विधानात् च। अन्तिम च जन्मनि भगवद् भक्तिः। भगवद् प्रसादैकलभ्यत्वात्
॥ सु. १, ५, १८ ॥

२५८. भगवतः कृपा अभावेऽपि मार्गस्यैव बलिष्ठता ॥ सु. १, ५, १९ ॥

२५९. तथा सति सर्वत्र भगवद् दृष्टिः चेत् कृतार्थः भवति इति कार्यम् भगवत्त्वेन निरूपितम्। इदम् विश्वम्

भगवान् इव न तु भगवान्
॥ सु. १, ५, २० ॥

२६०. सेवा च पुष्टिमार्गे सस्नेहा। कृपाफलम् च एतत्
॥ सु. १, ५, २५ ॥

२६१. सेवा तु रोग निवर्तिका। श्रवणेन च अन्तः प्रविशति भगवान्। तत्र चित्तम् सेवाम् भावयति। योग सेवा अपेक्षया अपि योगेश सेवाया उत्तमत्वात् ॥१, ६, ३५॥

२६२. अच्युतस्य मित्रम् अपि अच्युतम् एव ॥ १, ७, १७ ॥

२६३. ब्रह्मविदः हि स्वेच्छया देहत्यागः
॥ १, ७, ४५ ॥

२६४ मृतानां प्रेतत्व विमोके हि जीवताम् शौचम् ॥ १, ८, २. ॥

२६५. भक्तस्य कार्ये उपस्थिते प्रारब्धम् अपि स्वकार्यम् त्यजति इति समानशील व्यसनानाम् सख्यम् अपेक्षते ॥ सु. १, ८, ८, ॥

२६६. तथा साधारण स्त्री पुरुषाणाम् दैत्य अंशानाम् च न रसः न ज्ञानम् न वा भक्तिः इति।
॥ १, ८, १९ ॥

२६७. भगवत एव कालत्वात्। ज्ञाते पुनः ज्ञानी प्रियतमो मत इति वाक्यात् स्वप्रियम् न भक्ष्येत् कालः।
॥ १, ८, २७ ॥

२६८. किम् कर्तुम् भगवान् विचारयति इति न को अपि वेद ॥ १, ८, २८ ॥

२६९. न हि परमानन्दे स्फुरति विषयेच्छा भवति ॥ १, ८, ३४ ॥

२७०. सर्वपरित्यागेन भगवद् चिन्तनम् कर्तव्यम्। तत् मौनेन मनसः चाञ्चल्य परिहारेण अक्रियया च भवति ॥ १, ९. ३० ॥

२७१. अन्तिमः उच्छ्वास पर्यन्तम् या अस्माभिः सम्पादिता बुद्धिः सा भगवति उपकल्पिता। यद् अपि एवम् मति सदर्पणे न कश्चित् फलम् शास्त्रसिद्धम् तथा अपि अहम् एतत् समर्पयामि ममैतत फलम् भविष्यति इति स्वयम् एव तृष्णा भवति। तथा सृष्टि अर्थम् यथा करोति तथा अस्मन् मुक्ति अर्थम् अपि एवम् कृतवान् इति अर्थः ॥ १, ९, ३२ ॥

२७२. स्वभक्तानाम् वंशरक्षा सर्वथा कर्तव्या। १, १०, २ ॥

२७३. भगवानः तु जीवार्थम् करोति इति न भोक्तृत्वम्। जीवरूपेणैव भोक्तृत्वम् ॥ १, १०, २३ ॥

२७४. ईश्वर धर्मः प्रमेयबल पोषकः।
। १, १०, २४ ॥

२७५. गार्हस्थ्य फलम् धर्मसाध्यम् भगवद् फलम् भक्तिसाध्यम्।
॥ १, १०, २७ ॥

२७६. ज्ञानेन मुक्ताः कालान्तरे स्व-सेवार्थम् भक्ताः क्रियन्ते ।
॥ १, ११, ८ ॥

२७७. यावद् रसे न प्रविष्टः तावत् तस्य रसं न जानातीति कामशास्त्रम ।
स्ववशे स्थितस्य न रस इति ।
॥ १, ११, ३५ ॥

२७८. आत्मानम भक्षयति इति । स्व-स्मिन्नेव स्वयम् अन्तः वहिः भवति इति वस्तुवृत्तम् । तत्र भक्ष्यादि व्यवहारः तु लौकिकः
॥ १, १३, ४७ ॥

२७९. कुटिलता बुद्धिदोषः ॥ सु. १, १५, ३७ ॥

२८०. सात्विकाः प्रेम अवलोकेन वशी-कृताः । तामसाः तु रुचिः अस्मि-तेन मनोहारि मोहनेन । राजसाः तु वल्गुजल्पैः मनोहर वाक्यैः ।
॥ १, १६, ३५ ॥

२८१. यथा वेदान्त विज्ञाने पञ्चाग्नौ देह सम्भवः । तथा भागवतज्ञाने ब्रह्माग्नौ बोधसं युते ॥ का. १, १३, ३ ॥

२८२. भगवद् कृत उपकारत्वम् गुणः । ततः सती भगवद् एकनिष्ठा । भगवता एव स्व अंशैः अलंकृता च ॥ १, १७, २५ ॥

२८३. भक्त्या स्फुरन्तम् भगवन्तम् निर्दि-शति ॥ १, १७, ३३ ॥

२८४ यस्मिन् दिवसे यस्मिन् क्षणे भगवान् त्यक्तवान् तदैव अयप कलिः अनुवृत्तः ॥ १, १८, ६ ॥

२८५. अनन्यभाव इति । न विद्यते अन्य-स्मिन् भावो यस्य । मुनिव्रतः मुक्त समस्तसंग इति । मुनिवद् व्रतम् यस्य । वृथा आल्लाप परि-वर्जनम् मौनम् । मुनिव्यतिरिक्तैः सह वा भाषणनिषेधः । मुक्ताः सर्वे संगा येन । पुत्रमित्रादिभिः मन-सा सङ्गाः परित्यक्ताः । आज्ञया शरीराद् अपि व्यावर्तिताः
॥ १, १९, ७ ॥

२८६. ततो व्यासस्य भगवद अवतारे आदि नारायण अवतारे वा सर्वजन आल्हादनार्थाय मूर्त्तीभूतं देवतात्मकं तस्य फलम् आनितं । १-१-४३

२८७. फलं च विरोपतः । तद च रसात्मकं निर्जरैः जलम् एव सर्व इंन्द्रीयैः संबंध प्रेमरस जनयति । तद एकीभूतं रदये रदय एव भवति । १-४-४३

२८८. इन्द्रियानि तु धर्मान् एव गृहंति न तु धर्मिणः तत्र केवलानां ग्रहणंजीवैः अशक्यम् । १-३-३६

२८९. सेव्य सामर्थ्येन सेवक सामर्थ्यम वक्तुं भगवद गुणान आहा । १-४-७

२९०. समर्पणम् एव भक्तिः। न च भगवति अर्पितम् कर्म भवति इति अर्थ:। १-४-१२ चकारात् इश्वरार्थभ् वा क्रियमाणं । १-४-१२

२९१. सेवार्थम् सत्संग इति प्रथमं साधनम् ।१-४-२३

२९२. सेवाया: स्व इच्छाया सेव्य वश्यतम् सर्वजनिनं । १-५-२४

२९३. सा भक्तिः स्पर्शमणिरुपा जातेति आह । १-५-२८

२९४. नहि भगवान् अनुमान गम्य: । आत्मतवेन प्रत्यक्षत्वात् । १-६-२६

२९५. मुक्ति प्रकरणे श्रवणादिनाम् धर्मत्वं न भक्तित्वं इति विशेष:। १-८-३५

२९६. भगवद आविर्भाव व्यतिरेकेण अपि भगवद् अंगैः मानसरुप नामभिः मुक्तिः भवति इति विशेषः । १-९-२३

२९७. वृथैव जीवनं लोके भक्तिः ज्ञानः उत्सवैः विना। १-१०-७

२९८. सर्वा एव गीरा: भगवता श्रुता : । उच्चैकथने हेतुः । १-१०-३१

२९९. आलिंगनं सर्वदोष निवृतये। १-१०-८

३००. स्नेहः स्त्रीणाम् अधिक इति आद्यम् तपो र्ग्रडणम्। १-१०-९

३०१. उपदिष्टा अपि ज्ञाने अंतर्यामि तथा भगवद् स्फूर्तावपि यो रसः सत्संगात् उत्पद्यते बहिर्भगवद् संबंधेन वा । सन ज्ञानादिभिः भवति। १-१०-११

३०२. एवं कर्मणां फलमिति पक्षे गुरूः सेवैयवा कृतार्थता। १-११-७

३०३. प्रेम भक्तेषु भगवतो अपि प्रेमः । १-११-८

३०४. प्रथम तो भगवद् दर्शनम् एव दुर्लभं । तत्रापि सन्मुखतया । तत्रापि भगवद् दष्टिः स्वस्मिन् पतति । तदाहि भगवद् द्दष्टया गृहीतो भगवति प्रविष्टः एव तत्रापि स्निग्धया द्दष्टया गृहीतः कदापि न विश्लेषम् इति । १-१२-९

३०५. भक्त वत्सल इति । यथा गौर्वत्सं द्दष्ट्वा व्याकुला भवति तथा भगवान् जात इति अर्थः द्दष्टवा अनुग्रहम् वितन्वन् तथा तासु द्दष्टिः पतिता । भगवान ज्ञानादि सम्पन्नो यथावत् तासां रदये प्रविष्टः येन सुखिता न अन्य तु किंचिद् उक्तवत्यः। १-११-१०

३०६. अत एव न कदापि तृप्तिः भगवद दर्शने। १-११-२४

३०७. मुखस्य पानपात्रत्वं श्रुति सिद्धम्। १-११-२५

३०८. यावद रसेन प्रविष्ट स्तावत् तस्य रसं न जानाति इति कामशास्त्रं । स्व-वशे स्थितस्य न रस इति । १-११-३४

३०९. भगवता स्व सामर्थ्यम् दानात् भगवद् रूपो जात इति । १-१२-३०

३१०. आत्म निष्ठतया बाह्यधर्मा त्यक्तव्याः । १-१५-२७

३११. भगवद आवरणं भगवद् इच्छा । परम प्रेम्णा भगवद् सेवायां भगवद् आवरणं अपग्चछति तदा निर्मले दृष्टेः सवितृ प्रकाश साक्षात्कार इव भगवद् स्वरूपयोः मनसा साक्षात्कारो भवति । १-१५-३०

३१२. वाक् संबंधेन हि शरीर संबंधः । आत्मनो हि वाचः । १-१५-४१

३१३. भगवद वाक्ये अपि स्वरूप आविष्टत्वातु । १-१६-१

३१४. भक्तिः तु भगवद रूपेति न तथा व्यभिचारः । १-१६-३०

३१५. पानं रहय प्रवेश पर्यन्तम् । स्वरूपतो अपि पेय योग्यता उक्ताः । १-१७-४२

३१६. भगवद् सायुज्य प्राप्तस्य सर्वत्र भगवन इव स्फुरणात् एप ईति निर्देशः । १-१७-१२

३१७. भगवद् भक्तो भागवतः । यस्तु भगवता भागवत्वेन गृहितः सफलमुखो महाभागवता । १-१८-१६

३१८. केवलं नाम उच्चारण कर्तृः फलम् उच्यते । नामो माहात्म्यम् आह । १-१८-१९

३१९. भगवद् शब्दो निरतिशय ब्रह्मवाचकः । १-१८-२१

३२०. यथा जलस्य रसः । १-१८-२२

३२१. अन्ये तु गुरु द्वारा भगवता अंगीकृता । महाभागवता भवंति । अस्य तु भगवान एव गुरुः । १-१८-४६

३२२. लौकिको उपदेशक गुर्व अपेक्षया भगवद् मुखस्य अत्यंत गुरूत्वात् नितरां गुरुः । १-७-४३

३२३. अभिकारिणाम् भक्तानाम् अपि यावद् अधिकारत्वम् अधिकाररिकम् इति न्यायेन न भगवद् प्राप्तिः किन्तु स्वस्थान प्राप्तिमिति । १-१८-१९

३२४. न वा योगेन भगवदीयः पदार्थो ज्ञातुं शक्यते भगवद् वाकय व्यतिरेकेण । १-१-१३

३२५. ननु नाम उच्चारण सामर्थ्य रहितानां पृक्ष पखादीनां का गति रिति चेत् तत्राहा यद् पाद संश्रया इति । भक्त स्पर्शेन ते अपि

मुव्यंत इति अर्थः । तथा सति लोक रक्षा वुध्या न भगवति शुद्धो भावो भवेद् अतः तानूत्याजयति । १-६-२७

३२६. भक्तिमार्गेन भगवद सेवायाः शरीर मात्र साध्यत्वात् । केवले शरीरेण भगवद सेवां करिष्यन्ति तस्य शरीरस्य कियांतरे विवियोग अभावार्थम् अनशनं कृतवान् इति आह । १-१९-५

३२६. भगवदीय शरीर निष्पादनार्थम् भगवद् चरणे संवंध प्राप्य भक्तानां ततु संवंधे तादृश शरीरम् निष्पाददितुम् स्थितस्य चरणे प्राप्तेः पूर्वम् एव ततु प्राप्ति साधकत्वं गंगायावद इति। १-१९-६

३२७. देह जाति गुण क्रियासु न कोपि रसः । यथा यथा भगवद नैकटयम् तथा स्नेहातिरायः । १-१९-१६

३२८. भगवद एक निष्ठत्वातु न अन्य द्दष्टिरिति । १-१९-१७

३२९. स्मर्तव्य आंतर भजनियं वाह्य् वेति नियमे । आंतरं अपि भजनीय् अथवा निषेध मुखे न वक्तव्यं । १-१९-३८

३३०. यद्यपि ब्रह्म अभिव्यक्ति द्दशायां ध्यानं न अपेक्षते स्वतः एव स्फुरति । तथा अपि अनअभि व्यक्ति दशायाम् ध्यानं कर्तव्यम् न तुष्णाम् भावोयुक्त इति। १-१५-४४

३३१. लौकिक वैदिक मार्ग अपेक्षया पुष्टिमार्ग उत्कृष्ट इति उक्तं भवति। १-२७-१३

३३२. सर्वा एव गीरो भगवता श्रुताः । उच्चैः कथने हेतुः । १०-३१

३३३. अन्तिमे च जन्मनि भगवद् भक्तिः । भगवद् प्रसादैक लल्यत्वात् । १-४-१८

३३४. मन्त्र एव भूर्तिः शरीरं दस्य मन्त्रार्थ रूपम् । १-४-३८

३३५. महाभाग्येन गुरूणां सेवा करणं सामर्थ्यम् भवति । तद् जाते अपि सामर्थ्ये यदि सेवां न कुर्याद् तथा महद् अभागयम् तु तद् विपरितं । १-७-४१

३३६. कालस्तु आत्मानं न ग्रसति । आत्मत्वात् । १-१३-१२

३३७. भगवद् वाक्यत्वेपि स्वरूप अविष्टत्वात् परम् भगवत जातं । १-१६-२

३३८. व्यवहारश्च सन्निपातः तेन दावत् जीवं सन्निपात व्यवहार अन्ते अपि तत् कार्यम् प्राप्नुवन्ति । देह इन्द्रिय अन्तःकरणैः भगवदीय कार्यकरणे पूर्व सिन्नियाणे निवर्तन्ते ।१-१८-४०

३३९. भगवद् भक्तः भागवतः यस्तु भगवता भागवतत्वेन गृहितः स फलमुखो

VADODARA

महाभागवत: । १-१८-१६

३४०. भगवद् आविर्भाव व्यतिरेकेण अपि भगवद् अंगै: मानसरूपनाममि: मुक्ति: भवति इति आह । १-९-२३

३४१. प्रेम भक्तेपु अपि भगवतो अपि प्रेम । १-११-८

३४२. अतो मध्ये व्यापरस्य देवता परत्वे अपि भगवद् परत्वं । १-५-१५

३४३. भक्तिस्तु भगवद्रूपेति न तया व्यभिचार: । १-१६-३०

३४४. भगवद् सायुज्यं प्राप्तस्य सर्वत्र भगवत इव स्फुरणात् एव इति निर्देश: । १-१७-४२

३४५. भगवद् भक्तो भागवत: । यस्तु भगवता भागवत्वेन गृहीता: सफलमुखो महाभगवत: । १-१८-१५

३४६. प्रीति: एव द्वारम् । १-१७-३३ भगवद् संबंध तु प्राप्या भगवता संस्कृत्या । १-१८-२२

३४७. अत: केवलं नाम्नो उच्चारण कर्तृ: फलम् उच्चते । १-१८-१९

३४८. न वा योगेन भगवदीय: पदार्थो ज्ञातुं शक्यते भगवद् वाक्य व्यतिरेकेण । १-१-१३

३४९. नाम उच्चारण सामर्थ्य रहितानां वृक्षपक्षिणां का गति रिति चेत् तत्राहयद् पाद संश्रया इति । भक्त स्पर्शेन ते अति मुव्यंत इति अर्थ: १ तस्माद न भगवद् कथा रसाद् अधिको रस: कचिद् अस्ति । ब्रह्मानंद रसोऽपि न्यून इति । १-१-१९

३५०. तथा सति लोकरक्षा बुध्या न भगवति शुद्धो भावो भवेत् अत: तान् त्याजयति । १-६-२७

३५१. भगवद् अवतारे न भार्यादि विशेष संबंध: किन्तु संबंधमात्रम् इति षष्ठी प्रयोग: । १-१-१२

३५२. अत एव न कदापि तृप्ति: भगवद् दर्शने । १-११-२४

३५३. मुखस्य पानपात्रत्वं श्रुति सिद्धं । १-११-२५

३५४. परम प्रेम्णा भगवद सेवायां भगवद् आवरणम् अपगच्छति । तदा निर्मल दृष्टे: सवितृ प्रकाश साक्षोत्कार एव भगव स्वरूपयो: मनसा साक्षात्कारो भवति । १-१५-२९

३५५. आलिङ्गनम् सर्व दोष निवृत्तये । १-१०-८

३५६. उपदिष्टा अपि ज्ञाने अंतर्यामितया भगवद स्फूर्तावपियोरस: सत्संगात

उत्पद्यते वहिर्भगवद् संबंधेन वा । स न ज्ञानादिभि: भवति: । १-१०-११

३५७. प्रथम तो भगवद् दर्शनम् एव दुर्लभं । तत्रापि सन्मुखतया । तत्रापि भगवद दृष्टि: स्वस्मिन् पतति । तदाहि भगवद् दृष्टया गृहीतो भगवति प्रविष्ट एव तत्रापि स्निग्धया दृष्टया गृहित: कदापिन विश्लेषमिति । १-११-९

३५८. भक्त वत्सल इति । यथा गौ: वत्सं द्रष्टवा व्याकुला भवति तथा भगवान जात इति अर्थ: दृष्टवा अनुग्रहम् वितन्वन् तथा तासु दृष्टि: पतिता । भगवान ज्ञानादि सम्पन्नो यथावत् तासां हृदये प्रविष्ट: येन सुखिता न अन्य तु किंचिद उक्तवत्य: । १-११-१०

३५९. परम प्रेमणा भगवद सेवायां भगवद् आवरणम् अपगच्छति । तदा निर्मल दृष्टे: सवितृ प्रकाश साक्षात्कार एव भगवद स्वरूपोयो: मनसा साक्षात्कारो भवति। १-१५-२९

३६०. भगवद् सायुज्यं प्राप्तस्य सर्वत्र भगवान् एव स्फुरणात् एप इति निर्देश: । १-१७-४२

*****

सुबोधिनिजी द्वीतीय स्कंध

२८६. लोकव्यवहारेण आत्मा आरोपित एव दृश्यते देहादिरूप: संवलित: वा ॥ सु. २, १, २ ॥

२८७. ये हि यस्य परिकरा भवन्ति ते तं पोषयन्ति ॥ २, १, ४ ॥

२८८. भगवदीयत्वम् हि साक्षाद् भगवद् अनुगृहितानाम् पुष्टिमार्गीयाणाम् जन्मलाभरुपम् इति उच्यते । ॥ २, १, ६ ॥

२८९. महापुरुषस्य सम्बन्धी महापौरुषिक:। तदीयत्वं च गुण आस्वादन योग्यतयैव । अन्यथा तादृश धर्मवत: सम्बन्धी न स्यात् । ॥ २, १, १० ॥

२९०. शीघ्रमरणम् अनुस्मृत्य तादृश रस आस्वादनाभावाद् विषीदन्तम् ।

अतः जीवने यत्ता ज्ञापकः ज्ञाप उत्तम एव । अतस्ता च उत्तमा । आस्वाद्य परम् रसम् तस्मिन् रस प्रवेशात् न पश्चात्तापः । सु. २, १, २ ॥

२९१. यथा भगवद् भजने भगवदीयाः षड्गुणाः स्वस्मिन् सङ्क्रमन्ते तथा देहादि भजने तद् गताः षड्दोषाः सङ्क्रमन्ते ॥ २, २, ७ ॥

२९२. तदीयो भावो अपि स्वयम् अंगीक्रियत इति ॥ २, ४, १३ ॥

२९३. यथा यथा दोषनिवृत्तिः तथा तथा वस्तु याथात्म्य स्फुर्तिः । । २, ४, २१ ।

२९४. यतः ब्रह्मणा अपि पूर्वम् भगवद् ध्यानात् प्रार्थितः भगवानः तस्य ब्रह्मणः हृदये प्रविश्य स्व प्रकाशिकाम् वेद रूपाम् वाणीम् आस्यातः निष्काशितवान् । अतः भगवद् गुणेषु वक्तव्येषु नित्य याण्यैव तद् भवति इति प्रकृते भगवद् प्रार्थना आवश्यकी। अतः अन्तःकरणे प्रथमम् सती भगवद् अनुभव सहिताम् स्मृतिम् पूर्वे अनुभूतानाम् भगवदीयानाम् पदार्थानाम् निर्माणाय पश्चात् तेनैव हृदा भगवद् प्रेरितेन अन्तर्वेद प्रादुर्भावात पुनः भगवत् प्रेरिता वाणी आस्यतः निर्गता। न हि भगवद् भार्या स्वतः बहिः निर्गन्तुम् शक्नोति ॥ २, ४, २२ ॥

२९५. तपः तु भगवद् उपयोगि देह इन्द्रिय सम्पादकत्वेन तत्परम् एव ॥ २, ५, १६ ॥

२९६. फलार्थम् न यागः किन्तु ईश्वरार्थम् इति ॥ २, ६, २७ ॥

२९७. चित्ते भगवद् प्रेम सम्पादनीयम् । ततः प्रेम संवलितम् चित्तम् सर्वत्र विद्यमानम् भगवन्तम् विषयी करिष्यति । तथा भक्तिः आविष्टम् चित्तम् स्वयम् एव भगवन्तम् गृह्णाति ॥ २, ६, ३३ ॥

२९८. यत्र हि कार्यम् तत्र साधनम् अवश्यम् भावि । अतः साधन व्यतिरेकेणैव साध्य करणात् मुक्तिदानात् च साक्षात् पुरुषोत्तमः कृष्णः । २, ७, २७ ॥

२९९. वस्तुतस्तु यागस्य तथात्व अभावाद् भगवता एव तथा संपादनात् भगवद् इच्छयैव गोवर्द्धनः स्थितः। हस्तः तु केवलम् शास्त्रार्थत्वाय प्रदर्शितः ॥ २, ७, ३२ ॥

३००. सर्वम् भगवान् । अन्यथा प्रतीतिः मायया। सर्वत्र भगवान् सर्व लीला सहितः सर्व दोष विवर्जित इति एतद् मतम् मम भगवतः । इदम्

हि भगवद् शास्त्रं मम आतिष्ठ ।
।।सु. २, ९, ३६ ।।

३०१. फल मुखम् अंगं श्रद्धा निरूप्या । २-१-१

३०२. रात्रि संबंधि आयुः अज्ञानेन गच्छति । दिवा च दिन संबंधि आयुः अर्थे हृदा गाच्छति । पुरूपार्थ साधनिभूत आयुः तारूण्यमेव । २-१-३

३०३. अतः फलदान समर्थरूपम् एव आत्मा श्रोतव्य इत्याह । भगवान इति । २-१-४

३०४. प्रेमद्वारा अभय सिद्धः । अभयंतु भगवद् प्रवेश रूपम् । २-१-४

३०५. स्मरणस्य फल साधकत्वं साधयति । २-१-६

३०६. यदि अपि भगवदीयत्वम् अपि जन्मलाभः । भगवदीयत्वं हि साक्षात् भगवद् अनुगृहतिानाम् पुष्टिमार्गीयाणाम् जन्मलाभ रूपम् इति उच्यते । २-१-७

३०७. यतो देवाः सर्वेपु लोकोपु परिभ्रमन्ति । २-१-२९

३०८. यस्तु शब्दः स भगवतः श्रोतम् इन्द्रियम् । २-१-१९

३०९. अतो भगवन् मुखे यत् देयम् तत् ज्वलद् अग्नौ देयम् । २-१-२९

३१०. नित्य प्रवाहरूपा सृष्टिः । २-१-३१

३११. यस्तु भगवद् प्रसादम् न प्राप्नोति केनापि प्रकारेण तस्य जीवनम् अपि नास्ति । जीवनरूपस्य भगवदीय रसस्य अभावात् परम् श्वसिति ।२-३-२३

३१२. भगवदीयो रसः तत्रैव प्राप्तव्यः । गृहं च तस्यैव । अतो अन्येपाम् सर्वथा तद् रस प्राप्ति दुर्लभ इति । गृह सेवकस्य तु सुलभेति । निरंतर रस प्रवाहात् न सायुज्य अपेक्षा। २-४-१५

३१३. भगवदीयाणां मुखात् यद् भगवद माहात्म्य श्रवणात् तत् सर्व वस्तु यथात्म्य परिज्ञापकम् इति तद् आज्ञानकृतम् पापम् मूलभूत इति निवर्तते । पश्चात् आकर्पकाणाम् आभावात् भगवता सह गमन सामर्थ्यम् भवति। २-४-१६

३१४. येषां अंतिमम् जन्म जातं । ये च जीवन मुक्ताः केवलं गुणातीत एव व्यवस्तिाः पुनः आवृत्ति संभावना रहिताः ते अपि हरे गुणानुकथने श्रवण अनन्तरम् भाविनि कीर्तने परमानंद रसम् उपलभमानाः साधन दशायां एवैवं सुखम् एतत् साध्य फलदशायां कीदशं

सुखम् भविष्यति इति मन्यमाना रमंते । २-१-७

३१५. साधनीभूतं आयुः नास्ति इति विषादो न कर्तव्यः । यथा स आकांक्षस्य अधिकारिण रसः अभिव्यक्तिः तथा जीवने ज्ञापकः श्राप उत्तम एव । आस्वाद्य परम रस तस्मिन् प्रवेशात् न पश्चात्तापः । २-१-१२

३१६. अतः सुक्ष्मरूप भागवत द्वयम् बहिः स्थितं भगवता ब्राह्मणाय प्रकटितं । अंतः प्रवेश्यः पुनः प्रकटितवात् । २-१-११

३१७. यतो देवाः सर्वेषु लोकेषु परिभ्रमन्ति । यस्तु शब्दः स भगवतः श्रोत इन्द्रियम् । अतो भगवनमुखे यत् देयं तत् ज्वलद अग्नौ देयम् । २-१-३०

३१८. नित्य प्रवाहरूपा सृष्टिः । २-१-३१

३१९. अतो वाक् इन्द्रिय देवता अग्निः । २-१-३८

३२०. स्वप्नस्य मामिकत्वे अपि ज्ञानं न माचिकं । तस्य आत्मरूपत्वात् । २-१-३९

३२१. यथा ब्रह्मणि सर्वत्र आनंदपूर्ण : एवं शब्द ब्रह्मणि अपि सर्वत्र फलम् उच्यते । २-२-३

३२२. स भगवत् सेवार्थम् स्थावितो न अन्यत्र विवियोगम् अईति । २-२-३

३२३. प्रितिस्तु भगवदधर्म भगवान सर्वेभ्यो जीवेभ्यं स्तं खण्डशो दत्तवान् सुखार्थम् । अतो यत्रैव प्रियते । अतो देहादिभ्यः प्रीतीम् आच्छिद्य भगवति स्थापयंति इति भावः । २-२-७

३२४. यथा भगवद् भजने भगवदीयाः षडगुणाः स्वस्मित् संक्रमंति तथा देहादि भजने तदगताः पडदोषाः संक्रमन्ते । २-२-८

३२५. यद्येपि कर्मभिः अपि ब्रह्माण्डे गमनम् अस्ति तथापि न तेषां स्व इच्छा गमनं इति आह । २-२-२४

३२६. यत्रैव आनंदमयो भूत्वा आनन्दरूपं भगवतं प्रविशति स न पुनः संसारं प्रविशति। २-२-३३

३२७. दांपत्यं भगवद भजनार्थम् अपेक्षितं । २-२-११

३२८. भक्ति च भवति । भगवति प्रेम भक्त संगश्च मुख्यतया भवति । २-२-१३

३२९. अतो अपि सूक्ष्मध्याने तत् हृदि भगवति समागते तत्र यः परमस्नेहः साक्षाद् भगवद् प्रवेश हेतुः। स फलरूपो अपि साधन रूपो अपि अवांतर व्यापार

अपिरूपो तद् हेतुः मार्ग गृहान् निर्गतस्य इष्ट देश प्रवेश प्रर्यन्तम् विततः। २-२-३४

३३०. अग्रिमो भगवद् संबंध फलरूपः। पिबंति ये भगवत इति। सर्व सकामा संतः प्रेमला इति विभागः। कथा इव अमृतम्। २-२-३८

३३१. आयुः हरणार्थम् स्थापितस्य सूर्यस्य अधिकारीणो लोकन्यायेन अधिकार दातुं अंतरंगस्य न हरति इति ज्ञायते। हुतम् च आयुः भगवदीयेभ्यः प्रयच्छति। विवियोगस्य आवश्यकत्वात यद्यपि वाकये प्रार्थकस्य एव आयुषो न हरणं तथापि हरणस्य अनित्यत्व ज्ञापनेन तथा अवशीयते। २-३-१९

३३२. एवं क्षणमाते अपि भगवद् कथां संबंधे आयुष्यः कृतार्थते इति। २-३-१९

३३३. तथा प्राकृतः कथा एतत् कर्णम् प्रविष्टा एवं सर्वतो नाशयंति इति अर्थः। एवम् अपि सा न भगवद् परा किन्तु व्यभिचारिणि च। अन्य स्तोत्रकरणाद् अन्यगामिनि। २-३-२०

३३४. भगवतो हि द्विविधा सृष्टिः। चेतना अचेतना च। २-३-२१

३३५. स तु केवलम् मरणार्धम् एव जीवन्ति इति अर्थः। यस्तु भगवद् प्रसाद न प्राप्नोति केन अपि प्रकारेण तस्य जीवनम् अपि नास्ति। जीवन रूपस्य भगवदीय रसस्य अभावात् परम स्वसिति। २-३-२३

३३६. तस्माद् सर्व इन्द्रियाणां देहादेच सफल्यार्थम् भगवद् कथाम् अभियेही इति आह। २-३-२५

३३७. न हि बहि स्थितो अंतः प्रविशति। किन्तु आन्तरे वा आविर्भवति इति अर्थः। २-४-१२

३३८. एवं प्रेम भक्तिं अतो न किंश्चित् कर्तव्यः। २-४-१९

३३९. साधनं भगवद् प्रसाद एव। फलं स एव उभयोः एष विनिश्चयः तदाह भगवान प्रसीदता इति ये हि भगवद प्रसाद योग्याः ते आत्मवंतः। २-४-१८

३४०. पदार्थानां सर्वेषां भगवदत्वात्। तथा शब्दानां नित्यताः नित्ये शब्दार्थ संबंध इति। २-४-२२

३४१. अर्थोअपि भगवद आधीन इति। २-४-२२

३४२. सर्व मोक्ष दानार्थम् एव भगवतो व्यासस्य अवतारः। शब्दरूपा सृष्टिम् करोति। २-४-१५

३४३. अतो द्रव्येन प्रिता देवता व्यापारः। २-५-१५

३४४. तस्य लोकत्वे सुखत्वे वा भगवदीयत्वं न व्यभिचरति । २-५-१५

३४५. प्रथमतः सर्वेषां जीवानां लिंग शरीर सामग्री भगवता लिंग शरीर संवंध्यति निरूप्यते । २-६-१

३४६. लोके हि जलाद् शुध्दिः भवति। तद अत्र भगवद् प्रस्वेद रूपम् ।२-६-४

३४७. अनेन स्थान भेदाय फलभेदो भविष्यति इति सूचितम् । २-६-१८

३४८. वाक् सम्वन्धेतु भगवान हृदये स्थापित इति न त तो व्यभिचार :। २-६-३३

३४९. तत्र देहस्तु अत्यन्तं मलिना मलमूत्रादि पूर्णात्वाय अशुधत्वम् । आत्मा तु विशेषेण शुद्ध : ।२-६-३९

३५०. भगवदीयो रसः तत्रैव प्राप्तव्यः गुरू च तस्यैव । अतो अन्येषां सर्वथा तद् रस प्राप्ति दुर्लभेति। गृह सेवकस्यतु सुल्लभेति । निरंतर रस प्रवाहात् न सायुज्य अपेक्षाः । २-४-१५

३५१. जगवदीयाणां मुखात् यद भगवद् माहात्म्य श्रवणातु तत् सर्व वस्तु यथात्म्य परिज्ञापकम् इति तद् आज्ञानकृतम् पापम् मूलभूत इति निवर्तते । २-४-१५

३५२. पश्चात् आकर्षकाणाम् अभावात् भगवद् सह गमनं सामर्थ्यम् भवति । २-४-१६

३५३. वाक्कृतम् अनशनकृतं च तपः । २-७-६

३५४. तपो हि संतापात्मक वत् साधन पर्यवसापि न सुखं प्रयच्छति । न हि देह इन्द्रियाणि क्लिष्टानि सुखं प्रयच्छति । विहितत्वात् फलदानेपि दातुः संवंध अभावात् आज्ञामात्रेण तथा करणे अपि स्व आत्म सर्मपकत्वे नैव तद् बोधना अभिप्रायात् अदष्ट द्वारा फलभजने मानाभावात् कर्षयंतः शरीरस्थं भूतग्राममिति । मानाभावाद् भगवद् क्रिया उर्पायकतां संपादय देहं भगवद योग्यम् करोति। यस्तु भगवान सर्वात्मकः क्लेशं दष्टवा फलं प्रयच्छति । अन्य क्लेस निवृत्यर्थमूवा । २-४-१७

३५५. गिरिवासिना अत्यंजाः जावितः कार्यतश्च दुष्टाः । भक्त समाश्रयण मात्रेण शुद्धा भवंति :। २-४-१८

३५६. पूर्वम् अनुभूतानि भगवदीयानां पदार्थानाम् निर्माय पश्चात् तेनैव हृदा भगवत् प्रेरितेन अन्तर्वेद प्रादुर्भावात् पुनः भगवद् प्रेरितावाणि आष्यतो निर्गता । २-४-२३

३५७. अर्थो अपि भगवद् अधिन इति । अस्मत्

मुख निर्गतायां वाचिः भगवान पतिः अपि भगवद् अधिन इति ।अस्तम् मुख निर्गतायां वाचिः भगवान पतिः अलंकरण रूपेण प्रविशतामिति प्रार्थयते भूतैः महद्भिरिति । २-४-२३

३५८. अनेन काम क्रोध कृताः पदार्थो, न भगवद् मुखं प्रविशन्ति । न प्रसाद हेतवो भवन्ति इति निरूपितम् । २-७-७

३५९. भगवद् शब्दः मंत्र स्वरूपः । २-९

३६०. सर्वे हि भगवदीया जीवाः कौस्तुभ रूपम् । २-७-१४

३६१. रसस्तु गोपिकाभिः एव भुक्तः, त एव हि रसं जानन्ति ये तद् एको उपजीविनो भवन्ति । २-१-४३

३६२. अभयं इच्छतां भगवान श्रोतव्यः । २-१-२ एकेनैव प्रेम द्वारा अभयम् सिद्धे । अभयंतु भगवद् प्रवेश रूपम् । २-१-२

३६३. भगवदीयत्वं हि साक्षात् भगवद् अनुगृहीतानां पुष्टिमार्गीयानां जन्म लाभ रूपम् इति उच्यते । २-१-७

३६४. एषां अंतिम जन्मजातं । ये ज जीवनमुक्ता केवलं गुणातीत एव व्यवसिताः पुनः आवृत्ति संभावना रहिताः ते अपि हरे गुंणा कथने श्रवण अनन्तरम् भाविनि किर्तने परमानंद रूपम् अलभमाना साधन दशायाम् एवैवं सुखम् एवतु साध्य फल दशायां कीदशं सुखं भविष्यति इति मन्यमाना रमंते । २-१-७

३६५. प्रथमं पानं कृत्वा पश्चाद अनुकीर्तनं कर्तव्यं इति शास्त्रार्थस्य निर्धारः । २-१-१२

३६६. अतो देवाः सर्वेषु लोकेषु परिभ्रमन्ति । २-१-३० अतो भगवान् मुखे यत् देयं तत् ज्वलद् अग्नौ देयम् । २-१-३०

३६७. यस्तु शब्दः स भगवतः श्रोत्रम् इन्द्रियम् । अतो भगवन् मुखे यतुदेयंतत् ज्वलद अग्नौ देयम् । नित्य प्रवाह रूपा सृष्टि : सर्वे अपि समुद्राः भगवतः कुक्षि : । २-१-३३

३६८. स भगवद् सेवार्थम् स्थापितो न अन्यत्र विनियोगम् अर्हति । २-२-२

३६९. प्रीतिस्तु भगवद् धर्मः । आत्मनः भगवतः लिंग शंरीरम् आकाश शरीर ब्रह्मेति श्रुतेः । अग्रमो भगवद् संबंध : फलरूपः । २-२-३४

३७०. यस्तु भगवद् प्रसाद न प्राप्नोति केनापि प्रकारेण तस्य जीवनम् अपि नास्ति । जीवन रूपस्य भगवदीय रसस्य अभावात् । २-३-१३

३७१. अतो द्रव्येण प्रीता देवता व्यापार : । २-५-१५

३७२. स्वभाव विजयी भगवान् आनंदमयः । २-१-४

३७३. न केवलं ज्ञान मात्रेण फलम् । किंतु श्रवणादिभिः ज्ञाते ब्रह्मणि तत् फलं प्रयच्छति । २-१-२

३७४. एवं क्षणमात्रेपि भगवद् कथा संबंधे आयुष्य कृतार्थेति । २-३-१८

३७५. स्वभाव विजयि भगवान आनंदमयः । २-१-१४

३७६. यतो देवाः सर्वेषु लोकेषु परिभ्रमन्ति। २-१-२९

३७७. यस्तु शब्दः स भगवतः श्रोत्रं इन्द्रियम् । २-१-२९

३७८. अतो भगवन् मुखे यत् देयम् तद ज्वलद् अग्नौ देयम् । २-१-२९

३७९. नित्य प्रवाह रूपा सृष्टिः । २-१-३१

३८०. साधनीभूतं आयुः नास्ति इति विषादो न कर्तव्यः । यथा स आकांक्षस्य अधिकारिणो रस अभिव्यक्तिः । तथा जीवने यत्ता ज्ञापकः शाप उत्तम एव आस्वाद्य परम रस तस्मिन् प्रवेशात् न पश्चात्तापः । २-१-१२

३८१. यदि अपि भगवदीयत्वम् अपि जन्मलाभः । भगवदीयत्वं हि साक्षात् भगवद् अनुगृहितानां पुष्टिमार्गीयानां जन्मलाभ रूपम् इति उच्यते । २-१-७

३८२. येषां अंतिमं जन्म जातं । ये च जीवन मुक्ताः केवलं गुणातीत एव व्यवशिताः । पुनर आवृति संभावना रहिताः ते अपि हरेगुणानु कथने श्रवण अनन्तरम् भाविनि कीर्तने परमानंद रसम् उपलममानाः साधन दशायाम् एवैवं सुखम् एतत् साध्य फलदशायां कीदशम् सुखं भविष्यति इति मन्यमाना रमंते । २-१-७

३८३. भगवदीयो रसः तत्रैव प्राप्तव्यः । गृह च तत्रैव अतो अन्येषां सर्वथा तद रस प्राप्ति दुर्लभेति । गृह सेवकस्य तु सुलभेति । निरंतर रस प्रवाहात् न सायुज्य अपेक्षा । २-४-१५

३८४. भगवदीयानां मूखात् यद् भगवद् महात्म्य श्रवणं तत् सर्व वस्तु याथात्म्य परिज्ञापकम् इति तद् अज्ञानकृतम् पापम् मूलभूत इति निवर्तते । २-४-१५

३८५. पश्चात आकर्षकाणाम् अभावात् भगवता सहगमन सामर्थ्यम् भवति । २-४-१६

३८६. अभय भगवद् प्रवेश रूपम् । २-१-५

३८७. गिरिवासिना अत्यंजाः जातितः कार्यतश्च दुष्टाः । भक्त समाक्षयण मात्रेण शुद्धा भवंति । भक्ता एव भगवद सेवा योग्या भवंति । २-४-१८

३८८. पूर्वम् अनुभूतानि भगवदीयानां पदार्थानाम् निर्माय पश्चात तेनैव यदा भगवत् प्रेरितेन अन्तर्वेद प्रादुर्भावात् पुनः भगवद् प्रेरतावाणी आस्यतो निर्गता । २-४-२३

३८९. अर्थो अपि भगवद अधिन इति । अस्मत् मुख निर्गतादां वाची भगवान पतिः अलंकरण रूपेण प्रविशतामिति प्रार्थयते भूतेः महद्भिरिति । २-४-२३

३९०. भगवदीयत्वं न व्यभिचरति । २-५-१६

३९१. वाक् कृत अनशन कृतम् च तपः । २-७-६

३९२. अनेन काम क्रोध कृताः पदार्थान भगवन्मुख प्रविशन्ति । न प्रसाद हेतवो भवन्ति इति निरूपितम् । २-७-७

३९३. भगवद् शब्द मंत्र स्वरूपः । २-९-४५

३९४. सर्वे हि भगवदीया जीवाः कौस्तुभ रूपम् । २-७-१४

३९५. सरस्तु गोपिकाभिः एव भुंक्तः त एव हि रसं जानन्ति ये तद् एको उपजीविनो भवन्ति । २-१-४३

३९६. सर्व मोक्षदानार्थम् एव भगवतो व्यासस्य अवतारः । शब्दरूपां सृष्टिम् करोतिति । २-४-१५

३९७. अतो द्रव्येण प्रीता देवता व्यापारः । २-५-१६

३९८. फलमुखं अंगं श्रद्धा निरूप्या । २-१-१

३९९. प्रेम द्वारा अभय सिद्धे । २-१-५

४००. अभय इच्छताम् उपायम् आह । अभयम् इच्छता भगवान श्रोतव्यंः । २-१-५

*****

सुबोधिनिजी तृतीय स्कंध

३०१. चित्तोद्वेगेन यत् क्रियते कर्त्तव्यत्व सहितेन अपि न तत् फलायेति ॥ ३, १, १ ॥

३०२. गृहस्थितेः उत्कृष्टत्वं न भगवदीयत्व मात्रेण, किन्तु भगवता सह स्थितया भगवत् कायार्थम् वा, अन्यथा न स्यातव्यम् इति स्थितिः ॥ ३, १, २ ॥

३०३. खण्डशः पदार्थ श्रवणम खण्डम् एव फलम् जनयति ॥ ३, १, ४ ॥

३०४. अत्र मुख्य अपराधः भगवद् वाक्य उल्लङ्घनम्, तत् स्वभावतः जीवस्य न घटत इति दोषत्रय संनिपातः तद् हेतुत्वेन वक्तव्यः। न हि संनिपात अभावे कश्चिद् भगवद् वाक्यम् न मन्यते ॥ ३, १, ६ ॥

३०५. एवम त्रिदोष व्याप्तः भगवद् वाक्यम् न अङ्गीकृतवान् इति आह। यथा क्षीरसागरम् मथित्वा अमृत कलशम् उद्धृतवान् एवम् सर्वशास्त्राणि मथित्वा तानि वाक्यानि उद्धृत्य व्याहृतवानित्यर्थः ॥ ३, १, ९ ॥

३०६. स्व अधिकार अनुसारेण भगवान् सर्वत्र तथा स्फुरति इति ॥ ३, १, १५ ॥

३०७. सर्व तीर्थानि पादे यस्येति। तस्य स्थानेषु इति तीर्थेषु अपि विशेषः, वैष्णव स्थानेषु एव गत इत्यर्थः ॥ ३, १, १७ ॥

३०८. अनन्यत्वेनैव मौनं सिद्धं, तेन वा शब्दः संस्कृतः ॥ ३, १, १८ ॥

३०९. अनुवादे धर्मप्राधान्यम्, निरूपणे धर्मिण इति। वेणुभ्यां जातः वन्हिः न तावन्मात्रम् नाशयति, किन्तु वनम् एव सर्वम् ॥ ३, १, २१ ॥

३१०. भगवद् स्मरणम् बहु जन्म सुकृतेन भवति ॥ ३, १, २३ ॥

३११. भगवद् भक्तत्वे अपि सेवकत्वम् विशेषः। भगवद् परिपाल्यानां भगवतांशावतारेण उद्धवादिनानां वा। तस्मिन् दृष्टे स्वयमपि भगवद् संबन्धी जात इति, तदीयानाम् स्मरणेन पञ्चभूतेषु वायुः संस्कृतः ॥ ३, १, २५ ॥

३१२. भगवानपि स्वयम् आविर्भूतः। पुत्रत्वम् च गर्भस्थिति मात्रेण न जननात्। सहज सम्बन्धरूपत्वाद् अन्तर्यामितया विद्यमान एव प्रादुर्भूत इति सूचितम् ॥ ३, १, ३३ ॥

३१३. स्वेच्छया जनिते देहे अभिवशाद् भगवद् आवेश इति ॥ ३, १, ४४ ॥

३१४. पञ्चवापिको हि सेवायाम् अधिकारी ॥ ३, २, २ ॥

३१५. अनेन बहिः वाग् इन्द्रिय विषय निवृत्तिः उक्ता ॥ ३, २, ३ ॥

३१६. सुषापदेन च तत्र प्राणलय अभावः सूचितः, स्मरणे तद् आनन्द आविर्भाव अभावात् ॥३, २, ४॥

३१७. तामसादि गुणैः ते भगवन्तं न जानन्ति । न हि भाग्ये विद्यमाने स्वयम् तिष्ठति भगवति गते । अभाग्यं तु नास्ति, कियत्कालम् भगवद् अनुभवात् ॥ ३, २, ८ ॥

३१८. ये तद् वाक्यं मन्यन्ते अदृढमूलाः शास्त्ररहिताः त एव भ्रान्ता भवन्ति, ये तु अस्मादादय आत्मरूपे भगवति उप्तात्मानः ते न भ्रमन्ते ॥ ३, २, १० ॥

३१९. यथा तेजोरूपम् बिम्बम्, तथा आकृतिः सच्चिदानन्दरूपेति ॥ ३, २, ११ ॥

३२०. सजातीय एव प्रविष्टं सजातीयं वर्द्धते ॥ ३, २, १३ ॥

३२१. तत्र सख्यपर्यन्तम् भगवद् भजने जाते अनुरागः प्रवृद्धः । हाससहितो रासो भावोद्वारी हृदये भगवदैक्यं प्रापयति । स्वतंत्रा एव ता भगवदानन्द अनुभवे समर्था जाता इति अर्थः । यथा दृष्टिः भगवति प्रविष्टा, तत्संगे चेतना अपि तत्रैव गता । अतो न स्वशरीरे तासां कामभोग अपेक्षा, भगवत्स्वरूप एव आनन्द अनुभवात् ॥३, २, १४॥

३२२. स्वयं साक्षरः पुरुषोत्तम आविर्भूत इति अर्थः ॥ ३, २, १५ ॥

३२३. अनेन सर्वाणि एव भगवद् वाक्यानि 'मानुषीं' तनुम् आस्थितम् । यदा भगवद् वाक्यानाम् एवैषा गतिः, तदा तैर्व्यामोहितानां वाक्यानां किं वक्तव्यम् इति भावः ॥ ३, २, १७ ॥

३२४. भजनीय दोष व्यतिरेकेण सेव्यमानं न त्यजन्ति । लोके हि सर्वेषाम् एव देवानां मनुष्याणां वा सेवकाः तत् परित्यज्य भगवदीया जायन्ते न भगवदीयाः कदाचिद् अपि अन्यस्य ॥ ३, २, १८ ॥

३२५. भगवद् संबन्धः हि कोटि कल्पवृक्षाद् अपि अधिकः, स प्राप्तः केन वा त्यक्तुं शक्य इति अर्थः । ॥ ३, २, १९ ॥

३२६. एतादृशे का फलचिन्ता ? अत्र परम् एकम् एव बाधकम्, व्यामोहिका भगवद् लीला, तया चेत् न व्यामुग्धः ॥ ३, २, २१ ॥

३२७. धृताः पोषिता वा । सेवार्थम् एव वयम् पोषिताः ॥ ३, २, २२ ॥

३२८. क्लेशः तु बुद्धिकृतः न भगवद् कृतः ॥ ३, २, २३ ॥

३२९. भगवांश्च गुणान् एव गृह्णाति न दोषान् ॥ ३, २, २३ ॥

३३०. भगवद् भक्ता वेदकल्पवृक्षेषु स्थिता भक्तिम् आश्रित्य भगवन्तं गायन्ति इति उक्तम् भवति ॥ ३, २, २७ ॥

३३१. दोषस्तु रसात्मक एव न भवति। ॥ ३, २, ३४ ॥

३३२. एषैव बुद्धिः अधिकारिणः या भगवद् एकपरा, भगवतः सर्वान् दोषान् दूरीकृत्य, स्वार्थम् एव आत्मसात्कृता भवति। ॥ ३, ३, ३ ॥

३३३. न स्वभावतः अपि भगवदीयानां बुद्धिः अन्यविषया भवति। ॥ ३, ३, ४ ॥

३३४. भगवद् भक्तानां भगवतैव स्थापितो अहंकारः फलायेति। ॥ ३, ३, ५ ॥

३३५. भगवान् सर्वेषां स्वकीयानां सर्वमेव कार्यं स्वयं करोति इति भगवद् चरित्रम् उक्तम् ॥ ३, ३, ६ ॥

३३६. तेन परम वैषयिक भोगार्थम भगवति सा दृष्टिः प्रेषिता। तानि एव अवलोकनानि, भगवद् ग्राहकाणि। अनेन भगवदीयानाम् एवम चित्तम् भगवतो उत्पाद्यत इति उक्तम्। ॥ ३, ३, ७ ॥

३३७. भगवदार्यैः भगवद् कर्तव्यं भगवद् आज्ञाया कर्तव्यम् इति ॥ ३, ३, ११ ॥

३३८. भगवदीयानां स्पर्शने इन्द्रियम ज्ञानहेतुः एव न सुखहेतुः इति ॥ ३, ३, १३ ॥

३३९. नहि भगवान् विश्वम् विषयत्वेन भुक्तवान्, किन्तु आत्मत्वेन। भगवान् भुङ्क्ते जीवः अपि भुङ्क्ते। जीवद्वारा भगवान् भुङ्क्ते इति पक्षे भक्तिमार्ग विरोधः भवति ॥ ३, ३, १९ ॥

३४०. न हि भगवद् अभिप्रायम् सगुणा जानन्ति ॥ ३, ३, २५ ॥

३४१. अनुरागात् भयनिवृत्तिः, न हि अनुरक्तो भगवान् मारयति ॥ ३, ४, १० ॥

३४२. मम अनुग्रहः फल सूचकोऽनन्तिम जन्मनो अपि अन्तिमत्वम् साधयति। एवम् अन्तिमे जन्मनि अनुग्रहो जात इति फलम् आवश्यकम्। किञ्च, न योग्यता मात्रम्, किन्तु फलमुखम् एव तत् ज्ञानम् इति ॥ ३, ४, १२ ॥

३४३. अन्तर्भक्तिरसः पूर्णः। तदा स्नेहेन उत्थितानि सर्वाणि एव रोमाणि अवयवशः ॥ ३, ४, १४ ॥

३४४. चरण भजनं तु स्वतः अतिरसम्

प्रयच्छति इति फलतः महत्त्वम् च प्रत्यक्ष सिद्धम् ॥ ३, ४, १६ ॥

३४५. तत् च गुरुसेवा व्यतिरेकेण न भवति इति, प्रभुत्वेन सेवितो अपि भगवान् गुरुत्वेन अपि सेवितः। स्वरूपेणैव प्रादुर्भूत इति स्वरूपम् एव अत्र आत्मशब्देन उच्यते ॥ ३, ४, २० ॥

३४६. भगवद् स्मरणेन तस्य ज्ञान उत्पत्तेः मनसा भगवता एव अयम् उपदिष्टः ॥ ३, ४, २३ ॥

३४७. भगवद् अनुगृहीतः भगवानिव न्यक्कण्यो भवति ॥ ३, ४, २४ ॥

३४८. यदि कश्चिद् गुरुः सेव्यः, तदा भगवतैव निर्दिष्टः ॥ ३, ४, २६ ॥

३४९. अल्पया अपि कथया सुधया लोका अमरा जायन्ते ॥ ३, ४, २७ ॥

३५०. साधनता ज्ञानं तु अन्ध परम्परया। अनुवृत्तिः स्व आग्रहात्, अस्मादीयैः तथैव कृतम् इति।
॥ ३, ५, २ ॥

३५१. शब्दच्छलेन ते लग्नाः स्व समानं कुर्वन्ति इति ज्ञाप्यते। यदि लोकानां तथा भाग्यम् अपि न भवति, तथापि त एव भाग्यरूपा भूत्वा तान् स्वसमानान् कुर्वन्ति इति भव्यानि इति उक्तम्।
॥ ३, ५, ३ ॥

३५२. किञ्च, भगवान अन्तर्यामि सर्वानिव नानाप्रकारेण प्रेरयति, स्व स्वभावात् जीव स्वभावम् अनुसृत्य वा। उभयथा अपि प्रेर्य धर्म अविष्टो भवति ॥ ३, ५, ४ ॥

३५३. स रसः च पदार्थो बहु गृह्यते, अल्प रसः अल्प एव इति अनुभवः
॥ ३, ५, १० ॥

३५४. आस्तिक्य बुद्धिः श्रद्धा। कथा प्रथमतः स्वकार्यम् श्रद्धाम् एव जनयति ॥ ३, ५, १३ ॥

३५५. भगवान् स्वसेवार्थम् इन्द्रियाणि दत्तवान्। ये पुनः दान समये आसुराणि इन्द्रियाणि प्राप्तवन्तः, ते तां कथां श्रुत्वा अपि तद् रसानभिज्ञा न भजन्ते, ते शोच्यानाम् अपि शोच्याः। ते अपि यदि दैवगत्या भगवद् संमुखा भवेयुः तथा अपि न शोच्याः, सर्वथा विमुखाः चेत् तदा शोच्याः। अर्थ शून्य अक्षयो अपि वादादयः, त एव तेषां रोचन्ते, दिवाभीतानां यथा तेजः ॥ ३, ६, १४ ॥

३५६. एवं साक्षात् भगवद् संबंधे भक्ति प्रपत्ती निरूपिते ॥ ३, ५, ३९ ॥

३५७. तेषां हृदये वा पद स्थापनार्थम् विलासं प्रेमादिकम् करोति, तदा ते ज्ञाता भवन्ति इति अर्थः।

अतस्तस्य लक्ष्य अर्थस्य गुप्तत्वात् तान् न जानन्ति इति उक्तम्। ॥ ३, ५, ४४ ॥

३५८. ये अन्तःकरण शुद्धि अर्थम् अन्तःकरण ताप त्रय निवारणाय भगवद् कथाम् पीत्वा तेन प्रक्षालित अन्तकरणाः। ३, ५, ४५ ॥

३५९. भगवद् प्रेरणया गणेन कृतत्वात् भगवद् कृतम् एव ॥ ३, ६, ४ ॥

३६०. वाचि जायमानो भोगो अग्नेः भवति। भोगः तु वाच्येव। वाक् इन्द्रियम् अग्नेः आध्यात्मिकं रूपम्। आमज्ञ दोष सहितो अग्निः वाग् इति उच्यते। अत एव अग्नेः स्व अंशभूता वाक्॥ ३, ६, १२ ॥

३६१. भगवानेव हि गुरुः, स हि मुखेन उपदिशति ॥ ३, ६, ३० ॥

३६२. वाग् व्यापारेण भगवद् भजनम्। ॥ ३, ६, ३४ ॥

३६३. भगवता स्वार्थम् एव वयम् उत्पादिताः, वाणीं च स्वां समर्पितवान् स्व सेवार्थम्। तस्याः पतिः भगवान्। भगवद् अर्थम् स्वयं प्रेरकः। तथा च स्वतः वा, मत्प्रेरणया वा, अन्यम् अभिधाय वाणी व्यभिचारिणी जाता। ताम् इदानीम् संस्करोमि, संस्कृता सा भगवति योजनीयेति ॥ ३, ६, ३६ ॥

३६४. अन्यानि इन्द्रियाणि केवलं भगवद् अर्थं योजयितुम् अशक्यानि, देहार्थम् तद् उपयोग आवश्यकत्वात्। दुष्टानि च न भगवति योजनीयानि। तदा द्वयम् रक्षणीयम्, वाक् इन्द्रियम् श्रोत्रं च। तस्माद् एते चेद् भगवद् कृपया स्वार्थम् प्राप्ते भवतः, तदा भगवद् गुणा वक्तव्याः श्रोतव्याः च। न अन्यद् वक्तव्यम् श्रोतव्यम् इति आह। कीर्तनद्वारा सर्वाणि एव इन्द्रियाणि स्वयं च सफलो भवति। श्रोत्रस्य च अयम् एव लाभः ॥ ३, ६, ३७ ॥

३६५. अयम् आत्मा भगवान् स्वस्य अपि मार्गम् स्वयं न जानाति, किमुत अपरे? स हि यावत् करोति तावत् तस्य परोक्षे भवति। ॥ ३, ६, ३९ ॥

३६६. कार्यम् हि बीज प्रयोजनाभ्याम् विना न भवति ॥ ३, ७, १ ॥

३६७. लीला नाम विलासेच्छा, कार्य व्यतिरेकेणैव कृतिमात्रम्। सा च लीला बाले प्रसिद्धा ॥३, ७, २॥

३६८. ततः भगवद् अनुकम्पा, सत्त्व आकार अंतःकरणे स्फुरितस्य भगवतः कृपा अवलोकनम्। ततः भगवद् भक्तियोगः। निरन्तर श्रव-

णादिकम् भगवद् कृपा व्यतिरेकेण न भवति इति ॥ ३, ७, ११ ॥

३६९. भजनानन्दः स्वतः पुरुषार्थरूपः, तत् संबन्धिनी सेवा, तस्यां रतिः प्रीतिः ॥ ३, ७, १३, ॥

३७०. तद् अपि एतस्य भगवद् ध्यानात् तथा स्फुरितम् इति तस्य अनुवादः। मध्यस्थ मात्र अनुवादो वा, मायावादिवत् ॥ ३ ७. १५ ॥

३७१. भगवन् मार्गे अपि गुरुसेवा भक्त्युपयोगिनी । ३ ७. १८ ॥

३७२. अन्यथा गुरु सेवा अभावे मार्गान्तर विरोधे न भगवति भक्तिः स्यात् । अतः व्यसन निवृत्ती रासस्य अनुषङ्गिकी । अतः मार्गद्वय साधकत्वात् गुरुसेवा सर्वेषाम् एव हितकरी ॥ ३, ७, १८ ।

३७३. स्वस्य स विशेषम् परिज्ञानार्थम् भगवद् कृपया वा धर्म आन्तर स्फुरणम्, तद् अपि गुरु उक्तत्वेन एव ज्ञापयितुम् अनुवादः क्रियते ॥ ३, ७, २१ ॥

३७४. अनु व्रतम् येषाम्, गुरोः इच्छा अनुवर्तिनाम् ॥ ३, ७, ३५ ॥

३७५. यद् भागवतम् भगवता न परम्पराय उक्तम्, किन्तु साक्षाद् एव । भगवत्त्वम् वा साक्षात् । येषां बुद्धौ मन्त्राः स्वतः स्फुरन्ति, सा बुद्धिः उत्तमैवं भवति । ३, ८, २ ॥

३७६. आनन्द अनुभवः तस्य आन्तर एव युक्तः न बाह्ये ।न तादृश आनन्दः अनुभव योग्यः । भगवत्यपि तथा, बीजत्वात् ॥ ३, ८, ११ ॥

३७७. आभरणादिभिः क्रियमाणा शोभा भगवद् वेषम् एव आश्रयते, न तु आभरणैः भगवद् वेशे शोभा भवति । आभरणानाम् आभरणत्वं च भगवद् धर्मः ॥ ३, ८, २५ ॥

३७८. एवम् प्रत्यक्ष भजने सर्व पुरुषार्थदाता निरूपितः ॥ ३, ८, २७ ॥

३७९. तत्र वल्लभेन तेन च स्व अलङ्कृतम् ॥ ३, ८, २८ ॥

३८०. देहभाजाम् भगवतो गतिः न ज्ञायत इति ॥ ३, ९, १ ॥

३८१. त्वदीयम् एव वा चरण अम्बुजम्। भगवदीयत्व संपादक शरीर हेतु भूतानि संस्कृतानि भूतानि चेत् ते प्राप्नुयुः तदा अस्मिन् जन्मनि त्वदीया एव भवेयुः । ३, ९, ५॥

३८२. यथा कन्या वरं वृणीते, स्वेष्ट पूरकत्वे अपि स्वयम् एव तदीया भवति, न तु स स्वकीयः । ॥ ३, ९, ६ ॥

३८३. अतः दैन्ये विद्यमाने भोगे स्वातन्त्र्य अभावात्, तस्मिन् अपि क्षणे दुःखं सिद्धम् इति न भोगः सिद्ध्यति । ॥ ३, ९, ७ ॥

३८४. द्वादश विधः पुरुषः द्वादशधा

अतस्तस्य लक्ष्य अर्थस्य गुप्तत्वात् तान् न जानन्ति इति उक्तम् ।
॥ ३, ५, ४४ ॥

३५८. ये अन्तःकरण शुद्धि अर्थम् अन्तः करण ताप त्रय निवारणाय भगवद् कथाम् पीत्वा तेन प्रक्षालित अन्तकरणाः । ३, ५, ४५ ॥

३५९. भगवद् प्रेरणया गणेन कृतत्वात् भगवद् कृतम् एव ॥ ३, ६, ४ ॥

३६०. वाचि जायमानो भोगो अग्नेः भवति । भोगः तु वाच्येव । वाक् इन्द्रियम् अग्नेः आध्यात्मिकं रूपम् । आमन्न दोष सहितो अग्निः वाग् इति उच्यते । अत एव अग्नेः स्व अंशभूता वाक् ॥ ३, ६, १२ ॥

३६१. भगवानेव हि गुरुः, स हि मुखेन उपदिशति ॥ ३, ६, ३० ॥

३६२. वाग् व्यापारेण भगवद् भजनम् ।
॥ ३, ६, ३४ ॥

३६३. भगवता स्वार्थम् एव वयम् उत्पादिताः, वाणी च स्वां समर्पितवान् स्व सेवार्थम् । तस्याः पतिः भगवान् । भगवद् अर्थम् स्वयं प्रेरकः । तथा च स्वतः वा, मत्प्रेरणया वा, अन्यम् अभिधाय वाणी व्यभिचारिणी जाता । ताम् इदानीम् संस्करोमि, संस्कृता सा भगवति योजनीयेति ॥ ३, ६, ३६ ॥

३६४. अन्यानि इन्द्रियाणि केवलं भगवद् अर्थे योजयितुम् अशक्यानि, देहार्थम् तद् उपयोग आवश्यकत्वात् । दुष्टानि च न भगवति योजनीयानि । तदा द्वयम् रक्षणीयम्, वाक् इन्द्रियम् श्रोत्रं च । तस्माद् एते चेद् भगवद् कृपया स्वार्थम् प्राप्ते भवतः, तदा भगवद् गुणा वक्तव्याः श्रोतव्याः च । न अन्यद् वक्तव्यम् श्रोतव्यम् इति आह । कीर्तनद्वारा सर्वाणि एव इन्द्रियाणि स्वयं च सफलो भवति । श्रोत्रस्य च अयम् एव लाभः
॥ ३, ६, ३७ ॥

३६५. अयम् आत्मा भगवान् स्वस्य अपि मार्गम् स्वयं न जानाति, किमुत अपरे ? स हि यावत् करोति तावत् तस्य परोक्षे भवति ।
॥ ३, ६, ३९ ॥

३६६. कार्यम् हि बीज प्रयोजनाभ्याम् विना न भवति ॥ ३, ७, १ ॥

३६७. लीला नाम विलासेच्छा, कार्य व्यतिरेकेणैव कृतिमात्रम् । सा च लीला बाले प्रसिद्धा ॥ ३, ७, २ ॥

३६८. ततः भगवद् अनुकम्पा, सच्च आकार अंतःकरणे स्फुरितस्य भगवतः कृपा अवलोकनम् । ततः भगवद् भक्तियोगः । निरन्तर श्रव-

णादिकम् भगवद् कृपा व्यतिरेकेण न भवति इति ॥ ३, ७, ११ ॥

३६९. भजनानन्दः स्वतः पुरूपार्थरूपः, तत् संबन्धिनी सेवा, तस्यां रतिः प्रीतिः ॥ ३, ७, १३, ॥

३७०. तद् अपि एतस्य भगवद् ध्यानात् तथा स्फुरितम् इति तस्य अनुवादः। मध्यस्थ मात्र अनुवादो वा, मायावादिवत् ॥ ३ ७. १५ ॥

३७१. भगवन् मार्गे अपि गुरुसेवा भक्त्युपयोगिनी । ३ ७. १८ ॥

३७२. अन्यथा गुरु सेवा अभावे मार्गान्तर विरोधे न भगवति भक्तिः स्यात् । अतः व्यसन निवृत्ती रासस्य अनुषङ्गिकी । अतः मार्गद्वय साधकत्वात् गुरुसेवा सर्वेषाम् एव हितकरी ॥ ३, ७, १८ ।

३७३. स्वस्य स विशेषम् परिज्ञानार्थम् भगवद् कृपया वा धर्म आन्तर स्फुरणम्, तद् अपि गुरु उक्तत्वेन एव ज्ञापयितुम् अनुवादः क्रियते ॥ ३, ७, २१ ॥

३७४. अनु व्रतम् येषाम्, गुरोः इच्छा अनुवर्तिनाम् ॥ ३, ७, ३५ ॥

३७५. यद् भागवतम् भगवता न परम्पराय उक्तम्, किन्तु साक्षाद् एव । भगवत्त्वम् वा साक्षात् । येषां बुद्धौ मन्त्राः स्वतः स्फुरन्ति, सा बुद्धिः उत्तमैवं भवति । ३, ८, २ ॥

३७६. आनन्द अनुभवः तस्य आन्तर एव युक्तः न बाह्ये ।न तादृश आनन्दः अनुभव योग्यः । भगवत्यपि तथा, बीजत्वात् ॥ ३, ८, ११ ॥

३७७. आभरणादिभिः क्रियमाणा शोभा भगवद् वेषम् एव आश्रयते, न तु आभरणैः भगवद् वेशे शोभा भवति । आभरणानाम् आभरणत्वं च भगवद् धर्मः ॥ ३, ८, २५ ॥

३७८. एवम् प्रत्यक्ष भजने सर्व पुरुषार्थदाता निरूपितः ॥ ३, ८, २७ ॥

३७९. तत्र वल्लभेन तेन च स्व अलङ्कृतम् ॥ ३, ८, २८ ॥

३८०. देहभाजाम् भगवतो गतिः न ज्ञायत इति ॥ ३, ९, १ ॥

३८१. त्वदीयम् एव वा चरण अम्बुजम् । भगवदीयत्व संपादक शरीर हेतु भूतानि संस्कृतानि भूतानि चेत् ते प्राप्नुयुः तदा अस्मिन् जन्मनि त्वदीया एव भवेयुः । ३, ९, ५ ॥

३८२. यथा कन्या वरं वृणीते, स्वेष्ट पूरकत्वे अपि स्वयम् एव तदीया भवति, न तु स स्वकीयः । ॥ ३, ९, ६ ॥

३८३. अतः दैन्ये विद्यमाने भोगे स्वातन्त्र्य अभावात्, तस्मिन् अपि क्षणे दुःखं सिद्धम् इति न भोगः सिद्ध्यति । ॥ ३, ९, ७ ॥

३८४. द्वादश विधः पुरुषः द्वादशधा

रोगैः व्याप्तः, न केन अपि अंशेन सुखी भवति ।। ३, ९, ८ ।।

३८५. अतः ब्रह्मभावनायाम् अपि न संसार निवृत्तिः । ३, ९, १० ।।

३८६. प्रसादः तु, यदि भगवान् तद् हृदये समागत्य तिष्ठति, तान् च स्वकीयान् मन्यते, तदा भवति । अन्तःकरण कृतैः एव पूजासाधनैः संतुष्यति, न बहिःकरणैः । अतः येनैव प्रकारेण भगवान् परितुष्यति, तदेव साधनम्, अन्यत् तु परम्परया ।। ३, ९, १२ ।।

३८७. भक्त क्लेश स्मरणेन भक्ते विवृद्धा भगवतः प्रीतिः भवति ।
।। ३, ९, २५ ।

३८८. मध्ये भगवद् विचारे अपि काल विलम्ब हेतुः जात इति
।। ३ २, २७ ।।

३८९. वाणी भगवतः, अभिप्राय अज्ञानात्
।। ३, ९, २८ ।।

३९०. अतः साधनस्य सिद्धत्वात् आलस्यम् त्यक्तव्यम् इति भावः ।
।। ३, ९, २९ ।।

३९१. मत्कथा इति वचनात् अन्य कथा तस्मिन् समागत्य न कथितेति सूचितम्, किन्तु या कथा सा मदीयैव । अतः पूर्वम् अनुग्रह अभावात् अदर्शनम्, पश्चाद् अनुग्रहात् दर्शनम् इति । न तु तपसा दर्शनम्, तपः तु अनुग्रह सूचकम् ।
।। ३, ९, ३८ ।।

३९२. देहादौ च रतिम् न कुर्यात्, देहादिस्तु आत्मसंबन्धात् प्रियः ।
।। ३, ९, ४२ ।।

३९३. केवलम् तपो धर्मो भगवदीयो न भवति तपसि विशेषम् आह । भगवति अन्तःकरणम् आवेश्य तपःकरणं भगवद् उक्तम् इति एव कृतवान् ।। ३, १०, ४ ।।

३९४. तेषां बुद्धिः तु वेदात् ब्रह्मादिभिः च, अतो भगवद् अधीनाः ते भगवद् आज्ञया संसारे प्रवृत्ताः । भगवान् भगवद् आज्ञा च तेषां मूलम् महाभूतवत् ।। ३, १०, १४ ।।

३९५. ये पुनः भगवदीयाः ते गुणातीता देवा एव, न नराः, ब्रह्मसृष्टा वा न भवन्ति ।। ३, १०, २६ ।।

३९६. मनुष्या एव पुण्य परिपाकवशात् देवा भवन्ति इति केचित्
।। ३, १०, २७ ।।

३९७. धर्मे तु क्रियमाणे कालेना आयुर्भोगः प्रतिबध्यते, तदा शत संवत्सराद् अपि अधिकं जीवति ।
।। ३, ११, १२ ।।

३९८. यदा भगवान् शिशयिषुः भवति, तदा तमो गृह्णाति, पश्चात् च शेते ।

एतावान् एव व्यापारः । अन्यत् सर्वम् स्वयमेव भवति
॥ ३, ११, २९ ॥

३९९. तादृशम् अपि तद् अक्षरम् पुरुषोत्तमस्य परब्रह्मणो धाम भवति, देहस्थानीयं गृहस्थानीयं वा । यथा अस्मदादीनाम् प्राण अन्तःकरण व्यवहितानाम् एव देहः स्थानं भवति, न तथा अक्षरम् भगवतः, किन्तु साक्षात् ॥ ३, ११, ४१ ॥

४००. वेद अनुसारिणी सृष्टिः ब्रह्मणैव विनिर्मिता काल अनुसारिणी कालात् पुष्टचा सा भगवद् कृता
॥ ३, १२, १ ॥

४०१. तादृशस्य न कैवल्याख्यो मोक्षः फलम्, किन्तु भगवत् संतोषः
॥ ३, १२, ५ ॥

४०२. नाम व्यतिरेकेण अव्यक्ततया भोगः प्रसज्येत, ततः नाम प्रार्थना
॥ ३, १२, ८ ॥

४०३. यथा तवद् वाक्यम् प्रमाणम् तथा तव आचारो अपि
॥ ३, १२, ३१ ॥

४०४. स्वरा आकारादयः षोडश, स देहः
॥ ३, १२, ४५ ॥

४०५. शब्द ब्रह्म व्यतिरेकेण परब्रह्मणः प्रकाशनं न भवति । शब्द ब्रह्मणैव परब्रह्म प्रकाश्यते स्वप्रकाशम् अपि ॥ ३, १२, ४६ ॥

४०६. अतः शब्देनैव ब्रह्मणः भानम् । इन्द्रियरूपा वाक्, लौकिकश्च शब्दः
॥ ३, १२, ४६ ॥

४०७. निरूपण समये भगवदीयत्वेन भगवति प्रविष्टत्वात्, यत्र यत्र भगवान् तत्र तत्र स इति ॥ ३, १२, ५१ ॥

४०८. भगवत उत्पन्न एव भगवद् आश्रयो भवति, आश्रित एव भगवदीय चरित्रे श्रद्धानो भवति
॥ ३, १३, ३ ॥

४०९. महता श्रमेण श्रवणस्य ग्राहकत्वम् अपि भगवद् अर्थम् एव । सूरयो हि साधनम् एव स्तुवन्ति, न फलम्, साधन आधीनत्वात्
॥ ३, १३, ४ ॥

४१०. फलमुखेन गुणानाम् निरूपणात् न गुणान्तरोद्भावनेन दूषणं शङ्कनीयम्
॥ ३, १३, ४ ॥

४११. शुश्रूषणम् च तद् एव, येन सेव्यस्य सुखम् भवति, परितुष्यति च
॥ ३, १३, ६ ॥

४१२. निष्कपटेन हृदयेन माम् आज्ञापयेति यद् आत्मना सह सर्वस्व निवेदनम् तद् एव शुश्रूषणम् । अनेन ऐहिकं पारलौकिकम् अपि आत्मगामि सर्वम् निवेदितम् इति

ज्ञापितम् । एतद् एव आत्म–समर्पणम् नाम । न ततः अन्यत् प्रभोः शुश्रूषणम् अस्ति ॥ ३, १३, ९ ॥

४१३. गुरु उपदिष्टस्य पदार्थस्य सिद्धयर्थम् निस्तार्यमेव निवेदयेव । स हि आत्मा आत्मीय निस्तारार्थम् उपदिशति ॥ ३, १३, १० ॥

४१४. स्वशक्ति अनुसारेण सावधानैः तद्वाक्यम् सादरम् गृह्णेत ॥ ३, १३, १० ॥

४१५. एवम् पारतन्त्र्येण अपि विचारे क्रियमाणे यद् उपायो न स्फुरितः, तदा भगवति एव भारम् दत्तवान् ॥ ३, १३, १८ ॥

४१६. तीर्थम् हि सर्वेषाम् पापम् दूरीकरोति, तत् पापम् तीर्थे एव तिष्ठति ॥ ३, १३, १८ ॥

४१७. न हि समुद्रः सान्तो द्रष्टुम् शक्यते तथा भगवद् शरीरम् इति अर्थः ॥ ३, १३, २०, ॥

४१८. देवाः पापेभ्यः तिरोहिता भवन्ति ॥ ३, १३, ३६ ॥

४१९. आत्मजयः अन्तःकरण जयः ॥ ३, १३, ४० ॥

४२०. परम् अनन्य दृष्ट्या भजनं कर्तव्यम्, भगवद् अर्थम् एव भगवान् सेव्यः ॥ ३, १३, ५० ॥

४२१. स हि धृत स हि धृत भगवद् व्रतः भगवद् कथा श्रवण व्यतिरेकेण स्थातुं न शक्नोति ॥ ३, १४, १ ॥

४२२. भगवद् प्रसादो अपि कथाया व्यापाररूपत्वात् न भिन्नतया साधकः ॥ ३, १४, ५ ॥

४२३. कामशास्त्रे कामः पुरुषम् एव बाधते, न तु स्त्रियम् ॥ ३, १४, ९ ॥

४२४. वाचेति न प्रवृत्त्या, अन्यथा रसाभासः स्यात् । ॥ ३, १४, १५ ॥

४२५. चिद् रूपस्य स्वस्य, स्वदेहः सद् रूपः, आनन्दरूपः च भार्यायाः । ॥ ३, १४, १८ ॥

४२६. उत्तम बीजम् अपि यथा शूद्रायाम् प्रविष्टम् शूद्रतां आपद्यते तथेति अर्थः ॥ ३, १४, ३८ ॥

४२७. यस्तु भगवदीयः भूत्वा भगवदीयम् एव देहादिभिः करोति, जानाति, स भागवतः । ॥ ३, १४, ४७ ॥

४२८. तथा सर्व परिकर सहितः स्व सान्निध्येन असान्निध्येन वा तापम् दूरीकरोति इति अर्थः । ॥ ३, १४, ४८ ॥

४२९. विना पुत्रस्य भगवदीयत्वेन भागवतः पौत्रो न भवति इति पुत्रो अपि भगवद्भक्तः ॥ ३, १४, ५० ॥

४३०. स्वामी हि सेवकस्य हृदयम् जानाति ॥ ३, १५, ४ ॥

४३१. कृपादर्शन व्यतिरेकेण तत्र विद्यमानम् अपि दैन्यादिकं न प्रकाशते । अतः कृपादृष्ट्या द्रष्टव्यम् इति गूढः अभिप्रायः ।
॥ ३, १५, ९ ॥

४३२. वैष्णव पतिव्रतानाम् तु तैः सहगमनम्, तत्र च भगवद् गुणगानम् इति तद् अग्रे वक्ष्यति ।
॥ ३, १५, १४ ॥

४३३. तेषाम् अपि स्वतः सिद्धा वाक् । तेषां वाक् एव ब्रह्म ।
॥ ३, १५, १८ ॥

४३४. सा हि भगवद् भजनं कुर्वाणा, भजनस्य स्वस्य भगवद् चुम्बनम् एव महा फलत्वेन ज्ञातवती । चुम्बन मात्रेणैव कृतार्थता ज्ञानम् परमभक्तत्वबोधकम्, आत्मसमर्पणम् तु जातम् इति ॥ ३, १५, २२ ॥

४३५. अन्य विषयक कथा श्रवणम् वैकुण्ठगमने साधने सत्यपि प्रतिबन्धकम्, अन्यथा साधन अभावाद् एव न गच्छेयुः, किम् एतत् कथनेन
॥ ३, १५, २३ ॥

४३६. अन्तः स्थितः भगवद् आनन्दः सर्वम् एव संसार तापम् बहिः करोति, तदा तस्य बाष्पा मुखतः निःसरन्ति ॥ ३, १५, २५ ॥

४३७. अत एव विरक्तानाम् अपि लौकिक दृष्ट्या गमने दोष उत्पत्तिः
॥ ३, १५, २६ ॥

४३८. भूमिमध्यात् द्वारत्र सिद्ध्यर्थम् भगवान् आविर्भवेत्, तदा स्वकृत्यं पश्येत् इति गूढ अभिप्रायः
॥ ३, १५, २७ ॥

४३९. तदा तत्र परमानन्दात् अधिकरसः लोभात्मकः स्थापित इति तद् रसस्पर्शी हासः गोपिकानाम् इव सुखदः ॥ ३, १५, ४४ ॥

४४०. तीर्थम् हि द्विविधम्, गुरुरूपम् जलरूपम् च ॥ ३, १५, ४७ ॥

४४१. यथा भ्रमरः रसाविष्टः कालम् अपि न गणयति, रात्रौ अपि तत्र स्थितः बद्धो भवति तथा नश्चेतः ते पदयोः यदि रमेत तदा देहस्य नरके स्थितिः नः अस्माकम् बाधिका ॥ ३, १५, ४९ ॥

४४२. स्वरूप गन्धादि रहिता अपि चरणारविन्दे शोभते यथा तुलसी, तथा वाचो अपि पद चातुर्यादि अनपेक्षा भगवद् गुण प्रतिपादकत्वेन एव यदि शोभायुक्ताः स्युः तदापि नरके वासो न बाधकः ॥ ३, १५, ४९ ॥

४४३. इन्द्रियादीनाम् अन्यार्थम् जयः

ज्ञानमार्गे, मदर्थम् जयः भक्तिमार्गे
॥ ३, १६, २ ॥

४४४. स्वभावतः अहम् स्वमुखेना अन-श्नन्नेव तिष्ठामि। ॥ ३, १६, ८॥

४४५. भगवतः कालनियामकत्वाव न तत् संबन्धिनाम् काल अपेक्षा
॥ ३, १६, ९ ॥

४४६. भगवद् व्यतिरिक्ताः ते लौकिका एव भवन्ति इति। अतएव अन्यैः उच्चारिता, मन्त्रा एव न भव-न्ति, लौकिक वाणि उच्चारि त्वात्। मित्रत्वाद् भगवतो अपि सर्वं सखित्वात् तत् धर्म प्रति-ष्ठया तदीयत्वम्। भक्तिमार्ग अनु-सारेण भगवद् भोगो उपयिक हविः दोह कर्तृत्वात्
॥ ३, १६, १० ॥

४४७. जीवाः स्वभावतः दासा देहभावो अधमः ततः ॥ ३, १६, १२ ॥

४४८. धर्मो हि अन्यगतः धर्मिणं गोपा-यति, यथा जलगतं औष्ण्यं वन्हिम् गोपायति, तथा जीवेषु आगतो धर्मो ब्रह्म गोपायति
॥ ३, १६, १८ ॥

४४९. धनाभिनिविष्टचित्ता न भगवत् संमुखा भवन्ति॥ ३, १६, २१ ॥

४५०. अंशेन सेवाया व्यभिचारात्
॥ ३, १६, २१ ॥

४५१. भगवद् भक्तानां च प्रायश्चित्तम् भगवद् स्मरणम् एव। नित्यता तु स्मरणस्य प्रथम प्रवृत्तानाम्, यावद् भगवदीया भवन्ति। पश्चात् तु पाप-मेव न उत्पद्यते ॥ ३, १६, ३१ ॥

४५२. सैव वाक् गोपिकाः ॥ ३, १६, ३१ ॥

४५३. यस्तु उत्पादयति, स एव पालयति इति अधुना अपि स एवं पाल-यिष्यति ॥ ३, १६, ३७ ॥

४५४. सापेक्षं असमर्थं भवति इति निर-पेक्ष, एव प्रभुः ॥ ३, १७, २८ ॥

४५५. न हि स्वामिनि विद्यमाने अन्यस्य चिन्ता युक्तेति भावः ॥ ३, १८, ३ ॥

४५६. एवम् अन्यपराणां शब्दानाम् अन्य-परता योजनीया ॥ ३, १८, ६ ॥

४५७. सूर्यमण्डलस्थिता मूर्तिः भगवतो हिरण्यकेशरूपा भवति ॥
॥ ३, १८, ७ ॥

४५८. तस्य देह इन्द्रिय सामग्री सर्वा अपि परम तपसा सिद्धा, अतएव वपा एतत् न अश्नुते । ३, १८, ९ ।

४५९. मोहकलीलाम् परित्यज्य मुख्य लीला ग्रहणार्थम् उक्तः ॥ ३, १९, ३३ ॥

४६०. पूर्वत्र वा संबन्धः, भक्ष्यभोग आत्मकः विषय इति ॥ ३, १९, ३८ ॥

४६१. स्वामि कार्ये प्रसङ्गानां तथात्वे अपि यतो दृढः । यः केवलम् हरेः अर्थे सर्वथा यत्नवान् स्वतः । प्रसंङ्गाद् अपि न स्वार्थे महाभागवतः तु सः ॥ ३, २०, २ ॥

४६२. उत्सवः अत्र भगवद् स्मरणादिकम् ॥ ३, २०, ३ ॥

४६३. सर्वेषु पदार्थेषु सन्ति रसाः, रसज्ञ प्राप्या अभिव्यक्ता भवन्ति। अतः निरन्तर उत्पद्यमान दुःख निवृत्त्यर्थम् हरिः स्मर्तव्यः । किञ्च लोके आलस्यात् उद्वेगादिषु लीलया स्वास्थ्यं भवति, स्वस्य अन्यस्य वा क्रियमाणया कीर्त्यमानया वा ॥ ३, २०, ६ ॥

४६४. वैष्णवक्षेत्रे स्थिता देशगुणेन अपि वैष्णवा भवन्ति इति ॥३, २०, ७।

४६५. ततो अपि देह अहंकारो भगवद् सेवां उपयिकत्वात् उत्कृष्ट इति ॥ ३, २०, १८ ॥

४६६. लौकिक उपायेन नैते शान्ता भविष्यन्ति, अलौकिकः तु उपायो भगवत एव भवति इति। भक्तानां यादृशं रूपम् अनुरूपम्, तादृशं आत्मनः दर्शनं यस्य ॥ ३, २०, २५ ॥

४६७. अतः दोष समाधानं अपि त्वयैव कर्तव्यं इति दोष विज्ञापना ॥ ३, २०, २६ ॥

४६८. बहु द्रव्येण च प्राप्यम्, वयं च दुर्भगाः, तन्मूल्य द्रव्य रहिताः अतः बाधसे ॥ ३, २०, ३४ ॥

४६९. किञ्च, दृष्टिः अपि ते श्रान्तेव, रसेन पूर्णा आलस्ययुक्ता च जाता । श्रमः बहिः कार्येण शारीरः आलस्यं मनसः ॥ ३, २०, ३६ ॥

४७०. लोके अपि दर्पणादौ मुखम् पश्यन् न आत्मानं बहु मन्यते ॥ ३, २०, ४५ ॥

४७१. कल्पवृक्ष मूले गतः सर्वम् प्राप्नोति, यावति शक्तिः कल्पवृक्षे भगवत् स्थापिता तत्र सिद्धम् ॥ ३, २१, १५ ॥

४७२. त एव भगवद् भक्ताः, ये कथामृते पीयमाने देह धर्म रहिता भवन्ति । अमृतम् च तद् एव यद् देहधर्म निवर्तकम् ॥ ३, २१, १७ ॥

४७३. अतः मद् भजनस्य स्वभाव एव तादृश इति पूर्वम् एव फल जननम् ॥ ३, २१, २४ ॥

४७४. न हि भक्ताः स्वयं याचन्ते ॥ ३, २१, २६ ॥

४७५. सिद्धेः सह भगवतो व्यवहार एव तादृशः ॥ ३, २१, ३४ ॥

४७६. काम अपेक्षया अपि भगवद् वाक्यम् महद् इति विश्वासो भगवद् भावापन्नस्यैव ॥ ३, २१, ३५ ॥

४७७. शरणागतः चेत् क्लिष्टः तदा तत्र कृपा भवति । भगवान् स्वकृपाम् शरणागतेषु एव अर्पितवान् ॥ ३, २१, ३८ ॥

४७८. भगवद् वाक्यं निरन्तर अमृत उत्पत्ति रूपं इति, वाक्य श्रवणेन अपि पुष्टि प्रतिपादनार्थम् अमृत फलत्वेन निरूपितम् ॥ ३, २१, ४६ ॥

४७९. स हि तद् तद् अधिकार अनुसारेण बहुधा शास्त्र अर्थम् आह । भक्तेभ्यश्च पृथक् पृथक् आह । ॥ ३, २२, २० ॥

४८०. कथा श्रवणादिना भगवत परत्वम् । भगवत् परत्वे च विषय असक्ति अभावः ॥ ३, २२, ३५ ॥

४८१. भगवद् दत्त अधिकारे हि अधिकार कालः न आयुः गणनायां प्रविशति ॥ ३, २२, ३६ ॥

४८२. भगवद् भक्ता एव हि गुह्यम् धर्मम् विदुः ॥ ३, २२, ३८ ॥

४८३. सेवा सैव, या भर्तूं रोचते । रुचिः च महान् न वदति इति, तद् इङ्गितैः ज्ञातव्येति । तत् ज्ञानम् च पातिव्रत्याद् एव जातम् इति आह । इङ्गितकोविदेति । दीर्घकाल आदरनैरन्तर्यं सेवा फलदा भवति इति तदाह नित्यं प्रीत्येति ॥ ३, २३, १ ।

४८४. इन्द्रिय चाञ्चल्ये सेवा न फलति इति लोक वेद सिद्धम् । ।३, २३, २ ॥

४८५. यो हि निरन्तरम् मानं सन्माननां प्रयच्छति स हि पात्रे दानात् स्वयम् अपि मानं प्राप्नोति। ॥ ३, २३, ६ ॥

४८६. मम या अनुसेवा, सा मामेव गृह्णीतवती, कः सन्देहः परिकर गुणेषु ॥ ३, २३, ७ ॥

४८७. तादृशस्यैव तथा वचनम् सत्यं भवति इति तथा अनुवादः । ॥ ३, २३, १० ॥

४८८. भर्तुः एव धर्मेण भार्यायाः सामर्थ्यम् भवति इति ।।३, २३, १०॥

४८९. अनेन स्त्रीणां सर्वदा न शिरः स्नानम्, स्नानद्वयं च सूचितं भिन्न प्रकारेण ॥ ३, २३, ३३ ॥

४९०. सर्वाणि च फलानि विचित्र व्यसने संसारे भोक्तुम् अशक्यानि, व्यसनानाम् बाधकत्वाम् । ॥ ३ २३, ४२ ॥

४९१. पूर्वम् भगवान् सर्वत्र समः, इदानीम् भक्तिमार्गम् उत्पाद्य विषमो-

जात इति स्वानां भक्तानां पक्षस्य पोषणं यस्मात्॥ ३, २४, २९॥

४९२. लौकिके मया प्रोक्तम् एव लोकस्य प्रमाणम्, यतः अहम् एव जगत् कर्ता, पोषकः च, मद् वाक्यम् एव च वेदः च । ४, २३, ३५॥

४९३. मौनं वाग्व्यापार परित्यागः, तद् व्रतत्वेन गृहीतम् आदेह पर्यन्तम्। ॥ ३, २४, ४२॥

४९४. स स्वयम् अन्तर्मुखतयैव स्फुरति इति अर्थः ॥ ३, २४, ४४॥

४९५. भगवद् शब्दात् च विषय परिज्ञान लक्षणं ज्ञानम् आयाति। ततः भगवत् संबन्धिनी गतिम् प्राप्तवान्, यया गत्या भगवान् गच्छति। भगवति वा गतिः, भगवद् भावं सायुज्यं वा प्राप्तवान् इति अर्थः। ॥ ३, २४, ४७।

४९६. बहूनां जन्मनाम् अन्ते मे मया लब्धम् । तत्रापि करणम् त्वद् अनुग्रह एव ॥ ४, २५, ८॥

४९७. भगवद् साक्षात्कारे य उपयुज्यते स आधिदैविकः, आत्म साक्षात्कारे आध्यात्मिकः । आधिभौतिकः त्रिविधः, अणिमादि साधकः, शरीर साधकः, प्राणसाधकः च । ॥ ३, २५, १३॥

४९८. नहि इयं भक्तिः त्यागे भवति, किन्तु चित्तवत् सङ्गो यदा विषय भेदेन भिद्यते तदा भक्तिम् जनयति ॥ ३, २५, २०॥

४९९. आत्मा तु अन्तःकरण जीवात्मकः ॥ ३, २५, २१॥

५००. तेषां प्रकृष्टः सङ्गः सजातीय एव भवति। एकमत निविष्टानाम् एक स्वभावानां वा। प्रथमतः श्रुता हृदये रसम् उत्पादयन्ति, पुनः पुनः श्रुताः कर्णयोः। यथा काम अभिनिविष्टस्य चक्षुः कामिन्यां रसाविष्टं सत् बलात् निवर्त्यमानम् अपि न निवर्तते, किन्तु दिदृक्षैव निरन्तरं भवति। तथा कथा एव बलाद् अपि भावयति ॥ ३, २५, २५॥

५०१. विषयाः त्यक्ता अपि वासनया हृदि स्थिता राग अपगम एव गच्छन्ति। स च भगवति स्नेहेन संजातया सेवया, फलरूपम् प्राप्तया, इतर रस विस्मारिकया निवर्तते। तदा जात विरोगो भवति ॥ ३, २५, २६॥

५०२. सर्वा भगवतः सामग्री निर्गुणा। जन्मान्तरेण व्यवधानात् पूर्व-जन्मवृत्तिः यत् शब्देन परामृश्यते। फलरूपे जन्मनि सा अनिमित्ता भवति, स्वतन्त्रा, भगवद् निमित्ता

वा। भगवतः सकाशाद् फलानि निमित्तानि ॥ ३, २५, ३२ ॥

५०३. न हि भुक्त-कवलस्य परिपाकार्थम् औदार्याद् अग्नेः अन्यद् साधनम् विधीयते, औषधादिकम् अपि अग्निम् एव बोधयति। एतया मे पदम् प्राप्यत इति भावः
॥ ३, २५, ३३ ॥

५०४. ते भक्ता यावद् जीवन्ति च तावद् फलरूपाम् भक्तिम् कुर्वन्ति इति अर्थः। फलरूपता तदैव भवति, यदा भजनाद् रसो अभिव्यक्तः भवति बहुधा। तस्या अभिव्यक्तेः निदर्शनम्, भगवत एकात्मतां सायुज्यरूपं फलं न स्पृहयन्ति। प्रार्थना दूरे। ते भक्तेषु विरलाः प्रसङ्गात् निरूप्यन्ते। केचिद् इति दुर्लभाः। तेषां कायवाङ् मनोवृत्तिः स्वभावत एव भगवति भवति इति। मद् संबन्धिनि एव ईहा चेष्टा येषाम्।
॥ ३, २५, ३४ ॥

५०५. ते मे रूपाणि पश्यन्ति, निरन्तरं भगवद् साक्षात्कारो भवति। यथा मित्रैः सह क्रीडन्ति प्रथमतः पश्यन्ति। जीवन्त एवैते एतस्मिन्नेव लोके भगवता सह स्पृहणीयां वाचं वदन्ति यथा मित्रैः सह इष्ट आलापाः क्रियन्ते।
॥ ३, २५, ३५ ॥

५०६. बहिर्मुखान् कालरूपेण भक्षयति, अन्तर्मुखान् पुरुषेण अपि आययति इति ॥ ३, २६, १८ ॥

५०७. इन्द्रियाणाम् आध्यात्मिकरूपो वा प्राणः ॥ ३, २६, ३१ ॥

५०८. अर्थः हि शब्दम् आश्रित्य तिष्ठति। तत्र यद् आधिदैविकम् रूपम्, तद् शब्दनिष्ठम् शब्दैक समधिगम्यम् शब्देन नित्य सम्बद्धम्।
॥ ३, २६, ३३ ॥

५०९. शब्दः च भेरीदण्ड संयोगे जातः कर्ण शष्कुली पर्यन्तम् स्वभावतः गच्छति, तत्र प्रतिकूल वायौ न गच्छति, निकटे, अपि न श्रूयते। अनुकूले तु दूराद् अपि श्रूयत इति शब्दस्य अपि देशान्तर प्रापणम्।
॥ ३. २६, ३७ ॥

५१०. पानम् जलादेः, तेजो व्यतिरेकेण न अन्यः पिबति।
॥ ३, २६, ४० ॥

५११. एक एव रसः भौतिकानां पृथिवि अवयवानां संश्लेषाद् अनेकधा भिद्यते। वस्तुतस्तु अव्यक्त मधुर एक एव रसः ॥ ३, २६, ४२ ॥

५१२. जाग्रत दशायां संघातेन सह स्फूरणात को अयम् आत्मा इति यद्यपि विशेषतः न ज्ञायते, तथापि

सुषुप्तौ केवल आत्मा सङ्घात व्यतिरिक्तो भासत इति ।
॥ ३, २७, १४ ॥

५१३. आश्रय परित्यागे स्वरूपनाश प्रसङ्गात् ॥ ३, २७, १८ ॥

५१४. एवम् आकांक्षायुक्तः बहुजन्मना कालेन अध्यात्मरतो भवेत्, तदैव सर्वत्र जात वैराग्यो भवेत् । ततो अपि वा बहुजन्मना सर्वत्र वैराग्यम्
॥ ३, २७, २७ ॥

५१५. अन्तिम जन्मनि योगिनः विघ्नाः संभवन्ति ॥ ३, २७, ३० ॥

५१६. फलान्तरेण सम्बद्ध शुल्क ब्राह्मण इव मुख्ये फले न युज्यते ।
॥ ३, २७, ३० ॥

५१७. यावन्ति जीव जातानि, तावन्ति एव आसनानि ॥ ३, २८, ८ ॥

५१८. मुक्तान् भक्तान् जीवान् अतिप्रियत्वेन कण्ठस्थान् करोति ।
॥ ३, २८, १३ ॥

५१९. दशम वर्षम् आरभ्य षोडश वर्ष पर्यन्तम् किशोर अवस्था । रस प्रादुर्भावः तावद् दूरे ।
॥ ३, २८, १८ ॥

५२०. अतः तत् जानन्त श्रमः तयैव दूरी कर्तव्यः । यथा शीतल स्पर्शेन तापो गच्छति, तथा हस्त आनन्दस्य अन्तः प्रवेशेनैव श्रमो गच्छति इति अर्थः ॥ ३, २८, २३ ॥

५२१. विपुलः प्रसादः स्वतन्त्र भक्ति पर्यन्तः, तावत् ज्ञानं सिद्धयति ।
॥ ३, २८, ३१ ॥

५२२. यदि भगवान् स्वहृदये प्रकट एव, तदा स्वस्य मोहो न भवति इति सिद्धम् । सिद्धे भगवति मुख्ये सत्य आत्मनिवेदने आह-आर्द्रया भक्त्या अर्पितं मनो यस्य ।
॥ ३, २८, ३३ ॥

५२३. न विद्यते अन्यः भावः यस्य । अन्य बुद्धिः यस्मिन् मनसि न स्फुरति, तादृश मनसा अनन्य भावेनेति ॥ ३, २८, ४२ ॥

५२४. तेषाम् आवृत्त्या प्राणिनां भावो भिद्यते, अन्यथा श्रुत्वा अपि स्वभाववशाद् अन्यथा अर्थम् कल्पयन्ति, तद् अनुसारिणः च तथैव प्रवर्तन्ते, अतो बहुविधा मार्गा भक्तौ ॥ ३, २९, ७ ॥

५२५. भगवद् स्तोत्रेषु सर्वेषां संग्रहार्थम् बहूनि फलानि उच्यन्ते, अतः फल विशेष कामनयैव स्तोत्रादीनाम् श्रवणं सम्भवति इति तामसी भक्तिः उक्ता ॥ ३, २९, ८ ॥

५२६. पुरुषोत्तम एव भक्तिः । न तु पुरुषेषु अवतारेषु वा ॥ ३, २९, १२ ॥

५२७. सैवा आत्यन्तिकी :या स्वतो रस-भावं प्राप्ता, सैव न अन्यत फलम् अङ्गीकारयति। अत्यन्त प्रेम उत्पत्ती एवम् भवति ॥ ३, २४, १४ ॥

५२८. भगवतो निरन्तरम् नाम कीर्तनं च वाक् संस्कारकम्॥ ३, २९,१८॥

५२९. सहजो हि प्रयत्नः प्राणधारकः अतो भक्तिफलं दूरे; मृत्युः तु सेत्स्यति इति ज्ञान उत्तमम् मृत्योः अभावात् एतद् न कर्तव्यम् इति फलितम् ॥ ३, २९, २६ ॥

५३०. व्यर्थ त्याग अपेक्षया भगवति समर्पणम् उत्तमम् इति। भक्तौ अपि आत्म समर्पणम् ॥ ३, २९, ३३॥

५३१. नरक विशेषेषु सामान्यतः कुटुम्ब पोषको रौरवे पतति इति उक्तम्।
॥ ३, ३०, १८ ॥

५३२. मन्त्रेण हि स्तुतः अलौकिक आत्मा प्रसन्नो भवति ॥ ३, ३१, ११ ॥

५३३. भजनेनैव भगवान् कृपयति इति।
॥ ३, ३१, १६ ॥

५३४. ब्रह्मानन्दस्य लक्ष्म्यात्मकत्वाद् आनन्द अभावे फलं न किञ्चिद् इति अत एतेषाम् अपि निरोध मात्रं न तु तद् गत फलसम्बन्धः।
॥ ३, ३२, १० ॥

५३५. ते हि लोकवार्ताम् शृण्वन्ति न तु भगवद् कथाम्। यतः विद्यमानाम् अपि तां कथां हित्वा तत्रापि सुश रूपाम्। भगवता तथैव ते उत्पादिताः, विद्यमाने अपि स्व अन्ने सूकरादयः स्वभक्षम् एव भक्षयन्ति। तेषां जिह्वा न रसान्तरं गृह्णाति ॥ ३, ३२, १९ ॥

५३६. ते हि प्राकृताः स्वबुद्धि अनुसारेणैव तद् ग्रह्णन्ति। एकदेश ग्रहणेन, स्व स्वभाव ग्रहणेन च तद् अन्यथा गृहीतं भवति ॥ ३, ३२, २८ ॥

५३७. अस्मत् प्रतिपादितश्च नैर्गुण्यः।
॥ ३, ३२, ३७॥

५३८. बहिर्मुखस्य वक्ष्यमाणम् फलम् न भवति इति वक्ता अपि चेद् मद् चित्तः भगवद् प्रीतिअर्थम् एव, न धनादि अर्थम् कथयति ॥ ३, ३२, ४३ ॥

५३९. प्रमादः च स्वतः प्रीते न सम्बन्धादिभिः क्वचित् ॥ ३, ३३, ५ ॥

५४०. अतः निरन्तरं नामस्थानं श्वपचा जिह्वैव, तस्यैव तथा दर्शनात्।
॥ ३, ३३, ७ ॥

५४१. एवं स्वस्मिन् भगवत स्फुरणे जीव-भावो निवृत्त इति ॥ ३, ३३, २६ ॥

५४२. एवं सति अध्यास आश्रय भूतस्य देहस्य अपि स्फुरणं सर्वदोष-हेतुः न जातम् इति।
॥ ३, ३३, २७ ॥

५४३. असुराणां भगवद प्राप्तौ उपायमाह । क्रोध संरंभ एव भगवद् प्रापणो मार्गः । क्रोध मार्गेण तेषां चित्त भगवति प्रविशति इति अर्थः ३-२-२४

५४४. भगवतो अपि दर्शनं भगवद् इच्छैव जातम् इति । ३-४-७

५४५. अनुरागात् भय निवृत्तिः। सम्यक् इक्षणं समीक्षणम् दया सहितं। ३-४-१०

५४६. जलस्य अपि फलरूपम् । ३-४-१५

५४७. जगत् सगुणः भगवान निर्गुणः । ३-४-१५

५४८. निरंतर श्रवणादिकं भगवद् कृपा व्यतिरेकेण न भवति इति भक्तियोगः। ३-७-१३

५४९. यत् यष्मिन जन्मनि मद अनुग्रहः प्राप्त मम अनुग्रह फलसूचको अनअंतिम् जन्मनो अपि अंतिमत्वम् साध्यति । एवं अन्तिमे जन्मे ये अनुग्रहो जात इति फलम् आवश्यकं किंच न योग्यता मात्रं किंतु फलमुखम् एव तद् जातम् इत्याह । ३-४-१२

५५०. ननु कथया कथं क्षुद् पियासादिकं निवर्तते । सुधयेति अमृतरूपा हि सा अमृतं हि तथा भवति इति । ३-४-२७

५५१. वाचि जायमानो भोगः अग्नेभवति । ३-६-१३

५५२. वाक् इन्दियं अग्नेः आध्यात्मिकं रूपं । अत एव अग्नेः स्व अंशभूता वाक् ।३-६-१३

५५३. क्यसः वाक् इन्दियस्य एकांत लाभः एक एव भगवान स्वार्थः अंतो यस्य लाभो भगवद् प्राप्तैव सामाप्यते । ३-६-३८

५५४. गंगा भक्तिरसः चेति । ३-२८-२२

५५५. वाचो अत्र वेदरूपाः मनः तेषां अपि पूर्वरूपम् भगवदीयं । यतोवाचो निर्वतंते इति श्रुतेः । ३-६-४०

५५६. पृथिव्या अत्पत्तिमाह । रस मात्राद् इति। ३-२६-४४

५५७. इश्वर परिगृहितो अपि देहः कामाधीन एव इति । ३-१-४४

५५८. भगवदीयानां चरित्रे श्रुश्रुषुः प्राप्त सत्संग तीर्थायतनेः कृत पुण्य पुंजयोग्य देहं प्राप्य अधिकारी भवति इति भगवद् अधिकार सर्गे भूत सर्गो निरूपितः । ३-१-४५

५५९. रासो अवश्य तापादकः । ३-२-१५

५६०. न संबंधित्व मात्रं किंतु प्रतिक्षण अनुग्रह भाजतः। भक्तं द्रष्टवा भगवद् अनुग्रहस्य तरंगा उदगच्छति । ३-४-१४

५६१. अंतिमो जन्मनि अनुग्रहो जात इति फलं आवश्यकं । किंच न योग्यतामात्रं किं तु फल मुखमेव तत् जातं इति आह । ३-४-१२

५६२. सनका दिपु क्रोधः ब्रह्मपुत्रा अपि भूत्वा मानुप भावमापन्नाः । ३-१२-१४

५६३. भगद् प्रसादेपि कथायाः व्यापार रूपत्वात् न भीन्नतया साधकत्वम् । ३-१४-६

५६४. अन्य विपयक कथा श्रवणं वैकुट गमने साधने सति अपि प्रतिवंधकं। ३-१५-२२

५६५. स्मितस्य सुधात्वं तस्य अमृतत्वं । ३-१६-११

५६६. प्रथम प्रवृतानां यावद भगवदीया भवंति । पश्चाव पापमेव न उत्पद्यंते। ३-१६-३१

५६७. भगवद वाक्यं निरंतरे अमृत उत्पत्ति रूपमिति वाक्य श्रवणेन अपि पुष्टि प्रतिपादनार्थम् अमृत फलत्वेन निरूपितम्। ३-२१-४५

५६८. महापुरूपाणां दर्शनम् एव स्वातंत्र फलमिति । ३-२२-६

५६९. भगवद् दत्त अधिकार हि कालो न आयुः गणानायां प्रवशति।३-२२-३७

५७०. भावोनाम अन्तः करण धर्मः । ३-२५-२२

५७१. शब्दाँ मनः चेति । ३-२६-३०

५७२. पानं जलादेः तेनो व्यतिरेकेण न अन्य पिवति । ३-२६-४०

५७३. एवं जलम् अपि स्व अन्तर्गतम् रसरूपम् नद्यादौ प्रकटी कृत्य प्रदर्शयति । ३-२६-४६

५७४. अतः पुण्य अभावात् ऋणजलौकावत् देह संवंधातु च यम निर्भतो यातना देहः ताम्याम् एव आनीतः स्वदेह परित्याग अनन्तरम् एव तं गृहणाति इति । ३-३०-२९

५७५. मनोरथ अनुसारेण स्वप्नं पश्यति । ३-९-१०

५७६. ब्रह्म भावनायां अपि न संसार निवृत्तिः । ३-९-१०

५७७. यत्र भगवति अर्पितः समर्पितो धर्मः कदाचिद अपि न द्रियते न विदिर्णो भवति । ३-९-१४

५७८. स्नेहः माहत्म्यं च मिलितं भक्तिः भवति । ३-९-३१

५७९. स्तोत्रेण भगवता स्व ज्ञानं सर्वम् प्रकहितं ततु स्तोत्रं यत् कथया संवंध मदीयैव वार्ता तत्र कथिता । ३-९-३८

५८०. न तु तपसा दर्शनम् तपस्तु अनुग्रह एव सूचकं । फेवलतपोधर्म भगवदीयो न भवति इति। ३-९-३८

५८१. वाक् तु वैदिक सृष्टौ प्रविशति। ३-१०-१

५८२. भगवदीया एव गुणाः भक्तेषु स्थिता स्तथा भवति इति न विरोधः।३-१३-४

५८३. भगवद प्रसाद एव विश्व प्रसादः । ३-१४-४७

५८४. पावित्र्येपु नाम एकं भगवद् स्वरूपम् सर्व पदार्थेपु सहजं तिष्ठति।३-१६-१०

५८५. तथापि भक्ति सान्निध्यात् भगवदीया धर्मा यथा महादोषं दुरीकुर्वन्ति ।३-१५-४४

५८६. किंच स्मितेन सुधारूपेण उक्षिप्तं पद्यसदशं वक्रं येषां । स्नेहनैव दोष सहनं । मंद हासस्तु अन्तरक्षोभ जनन ज्ञापकः । तद गत स्नेह रस तन् निष्पिऽने न प्रकटो भवति। ३-१६-१९

५८७. न हि भक्तिरसे कामरसः प्रविशति । ३-१६-२१ काष्ट हास्यं कुर्वाणा । ३-२३-५१

५८८. अस्मिंश्च प्रविष्टे यथा तव मनोरथः तादश तव शरीरम् भविष्यति।३-२३-२४ पंचमं पुरूषार्थम् भगवद् स्नेहम् अलौकिक साधनत्वेन आह । ३-१४-४८

५८९. यस्तु भगवदीयो भूत्वा भगवदीयम् एव देहादिभिः कराति जानाति सभागवतः । ३-१४-४८

५९०. पंचम पुरूषार्थ रूपम् भगवद् स्नेहं अलौकिक साधनत्वेन आह।३-१४-४८

५९१. पावित्र्यं नाम एकं भगवद स्वरूपं सर्व पदार्थेषु सहनं तिष्ठति । ३-१६-१०

५९२. तथापि भक्ति सान्निध्यात् भगवदीयाधर्मा यथा महादोषम् दुरी कुर्वन्ति। ३-१५-४४

५९३. अतो अधिकार अभाव समय एव शतांयुषां । ३-२२-३७

५९४. भगवद दत अधिकारे हिकालो न आयुः गणानादां प्रविशति ।३-२२-३७

५९५. पीयूषं तस्य श्रवणेन भगवद् वाक्यम निरंतर अमृतोत्पति रूपम् इति वाक्य श्रवणेन अपि पुष्टि एव स्यात्। ३-२१-४५

५९६. अस्मिन् प्रविष्टे यथा तव मनोरथः तादश एव शरीरम् भविष्यन्ति ।३-२३-२४

५९७. किंच स्मितेन सुधारुपेण उक्षिप्तं पद्यसदशं वक्रंयेषां । स्नेहेनैव दोष सहनं

। मंद हासस्तु अंतक्षोभ जनन ज्ञापकः । तद् गत स्नहरसः तन् निष्पिऽने न प्रकरो भवति । ३-१६-२१

५९८. न हि भक्तिरसे कामरसः प्रविशति । काष्ठ हास्यं कुर्वाणा । ३-२३-५१

५९९. सर्वेषु पदार्थेषु संति रसाः रसज्ञंप्राप्य अभिव्यक्ता भवंति हि । ३-२०-७

६००. पृथिव्या उत्पत्ति गाह । रसमात्राद इति । ३-२६-४४

६०१. वचसः वाक् इन्द्रियस्य एकांत लाभः एक एव भगवान स्वार्थः अंतोयस्यभावो भगवद् प्राप्तैव समाप्यते । ३-६-३८

६०२. गंगा भक्तिरस श्चेति । ३-२८-२२

६०३. येषां वुध्धो मंत्राः स्वतः स्फुरति तस्य वुद्धि उत्तमैव भवति । ३-८-२

६०४. चित्तं भगवद् चरित्र पर तदैव भवति यदि भगवान प्रीतो भवति । ३-९-४०

६०५. भगवद् उत्पन्न एव भगवद् आश्रयो भवति। आश्रित एव भगवदीय चरित्र श्रधानो भवति । ३-१३-३

६०६. प्रथम प्रवृतानां यावद् भगवदीया भवति। पश्चात् पापमेव न उत्पद्यते । ३-१६-३१

६०७. पूर्वम् अपि वयं भगवदीया एव अन्यथा अस्मान पिता ब्रह्मत्यावद् रहस्यम् अस्मासु न वदेत् । ३-१५-४६

६०८. स्मितस्य सुधात्वम् । तस्य अमृतत्वम् । ३-१६-१०

६०९. रासो अवश्य तापादफः । ३-२-१४

६१०. वाचि जायमानो भोगः अग्नेः भवति । ३-६-१२

६११. अति आनंद हि भवगतः प्रहसितम् भवति । ३-२८-३४

६१२. पुष्टि प्रतिपादनार्थम् अमृत कलत्वेन निरूपितं । ३-११-४५

६१३. जीवस्य भगवत्वे काम क्रोधापि सर्व दोषः भगवति भवंति । न स्वभावतोऽपि भगवदीयानाम् वुद्धि अन्य विषयां भवति । ३-३-४

६१४. यत् यस्मिन् जन्मनि मद्द अनुग्रहः प्राप्तः । मम अनुग्रह फल सूचको अनंतिम जन्मनो अपि अंतिमत्वं साधयति । एवं अन्तिमे जन्मनि अनुग्रहो जात इति फलम् आवश्यकं किंश्च न योग्यता मात्र किंतु फल मुखम् एतत् गतम् इत्याह । ३-४-१३

६१५. येषां क्रोधमार्गेण तेषां चित्तम् भगवति प्रविषती इति अर्थः । क्रोध सरंभ एव भगवद् वाचको मार्ग भगवद् विषयत्वेन क्रोधस्यापि भगवद मार्गतम् । ३-२-२४

६१६. स्नहेत्व सेवा इति अंत भक्तिरस पूर्णः तदा स्नेहेन उत्थानि सर्वाणि एव रोमाणि अवयवशः सर्वत्रैव अंगे भोगचिते देवती संतिः ते भगवति संतुष्टे सर्वे संतुष्टाः एव उत्थिताः । ३-४-१५

६१७. भगवद्रसवास्य वा आस्वादितत्वात् । ३-२८-३५

६१८. काम शास्त्रे कामः पुरूषोमेव वाधते, न स्त्रियम् । ३-१४-११

६१९. स्वामिहि सेवकस्य हृदयं जानाति । ३-१५-९

६२०. एत एव बहुविधा विश्वा मित्रादिभिः योगवलेन सृष्टा भवंति । ३-१०-२३

६२१. अल्पयापि कथाया सुदाया लोकाः अमरा जायंते । ३-४-२७

६२२. भगवद् वियोगे अपि भगवद् कथाया स्थिता इति । ३-४-२७

६२३. धर्मवशात् भगवद् इच्छाया उर्ध्वगंतुः गर्मे सर्वज्ञातं भवति तत्रेति स्वस्य च जन्मशंतो एवम् । ३-३१-९

६२४. य केचन जीवमावा प्राप्ताः तेषां दास्यं परमो धर्मः देहभावं परित्यज्य ब्रह्मभावात् पूर्वम् जीवभाव एव । ३-३१-१७

६२५. अति आनंद हि भगवतः प्रहसितम् भवति । ३-२८-३४

६२६. रासो अवश्य तापादकः । ३-२-१५

६२७. न संबंधित्वमात्रं किन्तु प्रतिक्षणं अनुग्रह भाजतः भक्तं दृष्टवा भगवद अनुग्रहस्य तरंगा उदगच्छति । ३-४-१४

६२८. अंतिमे जन्मनि अनुग्रहो जात इति, फलं आवश्यकं । किंच न योग्यता मात्रम् किन्तु फलमुखमेव तत् जातं इति आह । ३-४-१३

६२९. ननु कथया कथं क्षुतपिासादिकं निवर्तते । कथं निवर्तकम् इति तत्राह । सुधयेति अमृतरूपा हिसा भगवद् वियोगेऽपि भगवद् कथया स्थित इति ।३-४-२७

६३०. सन कादिषु क्रोधः ब्रह्मपुत्रा अपि भूत्वा मानुषभावमापन्नाः । ३-१२-१४

६३१. भगवद् प्रसादेऽपि कथायाः व्यापार रूपत्वात्न भीन्न तया साधकत्वम् । ३-१४-६

६३२. अन्य विषयमक कथा श्रवणं वैकुंठ गमने साधने सति अपि प्रति वंधकम् । ३-१५-२२

६३३. स्मितस्य सुधात्वं । तस्य अमृतत्वं । ३-१६-११

६३४. प्रथम प्रवृत्तानां यावद् भगवदीया भवंति । पश्चात् पापमेव न उत्पद्यते ।

३-१६-३१

६३५. भगवद वाकयं निरंतर अमृत उत्पति रूपमिति वाक्यश्रवणेन अपि पुष्टि प्रतिपादना अमृत कलत्वेन निरूपितम् । ३-२१-४५

६३६. महापुरूषाणां दर्शनमेव स्वतंत्र फलमिति । ३-२२-६

६३७. भगवददत्त अधिकार हि कालो न आयुः गणनायां प्रविशति । ३-२२-३७

६३८. चरणस्य व्यसन नाशकत्वम् सिद्धम् । ३-२३-४२

६३९. भावोनाम् अन्तःकरण धर्मः । ३-२५-२२

६४०. शब्दो मनः च इति । ३-२६-३०

६४१. एवं जलम् अपि स्व अन्तर्गतं रसरूपं नद्यादौ प्रकटीकृत्य प्रदर्शयति। ३-५१-४६

६४२. मनोरथ अनुसारेण स्वप्न पश्यति । ३-९-१०

६४३. यत्र भगवति अर्पितः समर्पितो धर्मः कदाचिद अपि न द्रियते न विदिर्णम् भवति । ३-९-१४

६४४. स्नेहो माहात्म्य च मिलतं भक्तिः भवति । ३-९-३१

६४५. ननु तपसा दर्शनम् । तपस्तु अनुग्रह एव सूचकम् । ३-९-३८

६४६. वाक् तु वैदिक सृष्टौ प्रविशति । ३-१०-१

६४७. भगवद् प्रसादः एव विश्वप्रसादः । ३-१४-४७

६४८. यस्तु भगवदीयो भूत्वा भगवदीयमेव देहादिभिः करोति जानाति स भागवतः । ३-१४-४९

६४९. पंचमं पुरूपार्थरूपम् भगवद स्नेहम् अलौकिक साधनत्वेन आह । ३-१४-४८

६५०. पावित्र्यं नाम एकं भगवदस्वरूपम् सर्व पदार्थेषु सहजं तिष्ठति । ३-१६-१०

६५१. न हि भक्तिरस कामरसः प्रविशति । १०-१६-२१

६५२. सर्वेपु पदार्थेषु संवि रसाः रसज्ञम् प्राप्य अभिव्यक्ता भवंति हि । ३-२०-७

६५३. पीयूष तस्य श्रवणेन भगवद वाक्यं निरंतर अमृतो उत्पत्ति रूपमिति वाक्य श्रवणेन अपि पुष्टिः एव उक्ता स्यात् । ३-२१-४५

६५४. अस्मिन् प्रविष्टे यथा तव मनोरथः तादृश तव शरीरम् भविष्यति । ३-२३-२४

*****

५४३. अंश एव स भवति । अवतरणं वैकुण्ठ त अत्र आगमनम् ॥ १०, १, २ ॥

५४४. भगवानेव संसारे स्थितः न बद्ध्यते। भगवानेव स्वतन्त्रतया यदि हितं न कुर्यात तदा अन्यः अन्याश्रयः प्रसज्येत ॥ १०, १, ३ ॥

५४५. तृष्णा अन्तःकरण दोषः उपलक्षिका। न हि अल्प दोषवता अपि भगवद् गुणा गातुं शक्याः। अत उपकारस्मरणाद् गानम् । औषधं हि रोगनिवृत्तौ न पुरुषव्यापारम् अपेक्षते अन्तः प्रवेश न अतिरिक्तम् । अत्र च अ.ः प्रवेशः श्रवणद्वारा । तृष्णाभावेन धन अर्पण दोषः । गानेन शब्दमाधुर्यम । जन्म मरण दुःखस्य बहुधा न भूतत्वात् तन् निवारकम् औषधम् अति आदरेण सेव्यम। या अपि स्त्रियः श्रवणादि आसक्ताः ता अपि निमित्तवशाद् एव स्त्रियः, स्वभावतः पुरुषा एव। ॥ १०, १, ४ ॥

५४६. एवमेव पूर्वपूर्व संसारमपि शोषयित्वा भगवत्सेवामात्रं संसार पदार्थ .ग्रिहं स्थापयित्वा पारस्थितं भगवन्तं भगवदाश्रयाः प्राप्नुवन्ति इति उक्तम् ॥ १०, १, ५ ॥

५४७. अनेन भगवता अत्र अवतारे रूपद्वयं प्रदर्शितम-मूलरूपम्, अवताररूपं च। अन्तर्मुखास्तु अमृतमेव। ॥ १०, १, ७ ॥

५४८. साधवः पदार्था भगवद् सम्बन्धिनः अस्मिन् उच्यन्त इति पापस्य प्रतिबन्धकत्वात् न अत्र श्रद्धा भविष्यति इति आह ॥ १०, १, १४ ॥

५४९. श्रोतॄणाम् अपि विद्यमाने पापे भगवत्प्रवणं चित्तं न भवतीति। ॥ १०, १, १६ ॥

५५०. ततः भक्तानां भगवत् समीप गमनम् । निवेदनार्थम् स्तोत्रम् । ततः भगवद् वाक्यनिवेदनम् । ॥ १०, १, १७ ॥

५५१. न अपि वस्तुतः देह अध्यास व्यतिरेकेण देहिनः स्वतः जन्माऽस्ति। देह अध्यासः च अज्ञानाद् इति ज्ञानेन निवर्तते ॥ १०, १, ३७ ॥

५५२. अलौकिक स्फुरणात् तस्य अङ्गीकारः ॥ १०, १, ४७ ॥

५५३. न हि मया समर्पित इत्येव म्रियते ॥ १०, १, ५१ ॥

५५४. पुत्रास्तु देह सम्बन्धिनः । सत्यं तु भगवत्सम्बन्धि ॥ १०, १, ५७ ॥

५५५. न हि भगवद् भक्तानाम् अन्यनिग्रा अपि उचिता ॥ १०, १, ६० ॥

५५६. सर्वैः सह गीर्भिः स्व अनुकूल वाणिभिः वृषणं कामवर्षणं वृषं धर्मम् वा नयति इति । ॥ १०, २, २४ ॥

५५७. आधिदैविकं सत्यं भगवानेव। प्रमाणं वेदः। प्रमेयं भगवद् धर्माः ऋतं। सूनृता वाणी ॥ १०, २, २५ ॥

५५८. अक्षरम् अत्र फलम् तस्य तत्वानि अंशाः ॥ १०, २, २६ ॥

५५९. अल्पेन हि ग्राहकेण अल्पमेव गृह्यते। सर्व वस्तु ग्रहणार्थम् चित्तं पुष्कलम् एव भगवत् सृष्टम्। ॥ १०, २, २७ ॥

५६०. आनन्द रूपेण प्रकटस्य च जन्मानि, तैः एव च नामरूपे। नामरूप अभावे ध्यानं मन्त्रः च न भवेताम् ॥ १०, २, ३५ ॥

५६१. अयमेव भगवान् तत् तद् जाति अनुकार रूपेषु अवतारम् कृत्वा पाति। अधुना ततः अपि अधिकं विज्ञापयन्ति ॥ १०, २, ३९ ॥

५६२. लीलाया रसालता च न स्यात्। ॥ १०, ३, १ ॥

५६३. प्रत्यक्ष व्यवहारादयः च धर्मा अंशेन समर्थिता। इन्द्रियाणां प्रत्यक्षता तु नास्ति। न हि चक्षुषः सामर्थ्येन इदानिम् अत्रापि भवान् दृश्यते, किन्तु स्वेच्छयैव॥१०,३,१३,१७॥

५६४. केवल चिदानन्दरूपः द्रष्टव्य इति प्रथमम् आह ॥ १०, ३, १८ ॥

५६५. ईश्वरे निवेदन मात्रं सेवक कार्यम् ॥ १०, ३, २२ ॥

५६६. व्यभिचारिण्याः स्त्रियाः तु न मुक्तिः ॥ १०, ३, ४३ ॥

५६७. उपाय सहस्रेण अपि सर्वम् तमः न गच्छति। उदिते तु सूर्ये स्वत एव गच्छति ॥ १०, ३, ४९ ॥

५६८. स्वरूपे ज्ञाते देह अध्यासः न भवति। अध्यासे पुनः स्वरूप अज्ञानम् इति तद् अभिमानी अज्ञ एव भवति ॥ १०, ४, २२ ॥

५६९. श्रवणादि गमनपर्यन्तम् आत्म अलंकारो यावता भवति तावत् कृत्वा। गोपिकानाम् भगवत् स्मरणेनैव भगवदावेशो जातो, गोपानां तु भगवत्सन्निधाने भगवद्धर्म प्राकट्य आवेश इति ॥१०,५,९,१४॥

५७०. प्रियतमः तु व्यवहारे स्निग्धः भवति ॥ १०, ५, २१ ॥

५७१. प्रथमं वाक्यात् उत्पन्नम् अन्तर्भयं भगवद् स्मरणेन नाश्यत इति आह ॥ १०, ६, १ ॥

५७२. स्वधर्मा भगवद् श्रवणादि अभावे पूर्णा एव न भवन्ति ॥१०, ६, ३॥

५७३. तत्रापि साधारणरूपेण पूजितः साधारणमेव फलं प्रयच्छति। ॥ १०, ७, ३४ ॥

५७४. कृषिर्भूवाचकः शब्दो णश्च निर्वृत्ति-वाचकः। तयोः ऐक्यम् परंब्रह्म कृष्ण इति अभिधीयत ॥ १०, ८, १४॥

५७५. नामप्रसङ्गे रूपकथनं व्यर्थम् स्यात् ॥ १०, ८, १६ ॥

५७६. भगवद् सन्निधाने नामद्वारा सम्बन्ध अनन्तरम् एव ॥१०, ८, २२॥

५७७. रामावतार भक्ताः तेषु अपि तृप्तेषु स्वयम् अध्यात्मा स्वीकृतभावो भुङ्क्ते ॥ १०, ८, २९ ॥

५७८. देह सम्बन्धः दुर्गतिः, अनायासेन तरणं भक्त्यैव ॥ १०, ८, ५० ॥

५७९. एवं गानपरतया मथने क्रियमाणे गानस्य अमृत रुपत्वाद् दधिमथनं न भवति इति गानस्य गौणभावम् सम्पाद्य भगवद् भजनौपयिकं देहमपि पीडयित्वा भगवद् उपभोग्यं रसमपि निरुध्य तद् देवतामपि निवार्य भौतिकीं क्रियां श्रमजनिकां भक्तिमपि पीडयन्तीं मुक्तानामपि क्षोभजनिकां क्रियां कृतवती त्याह ॥ १०, ९, ३ ॥

५८०. न हि अत्र बन्धनं निरूप्यते किन्तु वश्यता ॥ १०, ९, २१ ॥

५८१. मद् अंशः गुप्त एव तत्र अपि वर्तते अग्निवद् अत्र अहम् चेत प्रसन्न ॥ १०, १०, २२ ॥

५८२. एवमवतारेषु भगवद् ज्ञानं अनुमानिकं न प्रत्यक्षं इति उक्तम् । न हि प्रलय अग्निः सेवितुं शक्यते, किञ्च भागाः कलाः, कलयावतीर्णः, यदि मूलभूतः कलारूपेण आविर्भवति तदैव च सर्वाः कलाः पूर्णा भवन्ति ॥ १०, १०, ३४, ३५ ॥

५८३. वाग्भिः इति वचन मात्रं तेन उक्तम् ॥ १०, १०, ४१ ॥

५८४. यत् साधनानि भगवता दत्तानि ज्ञानकरणादीनि तानि अन्यथा व्यर्थानि स्युः ॥१०, ११, १२ ॥

५८५. फलादि अभावात् च वाचनिकीमेव सेवां कुर्वन्ति ॥ १०, १२, ६ ॥

५८६. सा अपि चेद् वाणी अलौकिकी न भवेत् तदा अलौकिकं फलं न प्रयच्छेद् इति । शृङ्गाररसे चकोरवद् भगवतो वाग्व्यापारः निरूप्यते । ॥ १०, १२, १३ ॥

५८७. श्रवणे प्रविशति कथा पुरो हृदयं ततः सर्वमेव दोषम् आलोड्य मुखतो निःसरति, एवं कियत्कालपर्यावृत्त्या सर्वथैव शुद्धो भवति । ॥ १०, १२, ४१ ॥

५८८. गते हि तापे रसास्वादनं । घनीभूतं च पातुं न शक्यं । रसस्तु गोपिकाभिरेव भुक्तः, त एव हि रसं जानन्ति ये तद् एक उपजीविनो भवन्ति । न तेषाम् अन्यद् देह निर्वाहकम् अपि अस्तीति विषयान्तर सम्बन्धः नास्ति एव, केवलम् अन्यत्र परिभ्रमणमात्रं । पानं बहिः स्थितस्य द्रवद्रव्यस्य अन्तर्निवेशनं । मुख एव रसः ॥ १०, १२, ४३ ॥

५८९. आत्मनिवेदिनां न पृथक् स्थातुम् उचितं ॥ १०, १३, १० ॥

५९०. प्रिया एव हि रक्षणीयाः । १०, १३, २० ॥

५९१. अन्तवती रूपसृष्टिः अनन्ता नामसृष्टिः, स्थूला रूपसृष्टिः सूक्ष्मा नामसृष्टिः, विकृता रूपसृष्टिः कूटस्थ अविकृता नामसृष्टिः, जडरूपा रूपसृष्टिः विपश्चिद् बोधरूपा नामसृष्टिः ॥ १०, १३, ४३ ॥

५९२. मुखम् अपि अग्निः इति । ॥ १०, १४, २४ ॥

५९३. नाथत्वे अपि तद् एक निष्ठता अति दुर्लभा ॥ १०, १६, १० ॥

५९४. पुष्टिमार्गे हि मर्यादामार्गः तत्र न शोभते ॥ १०, १७, ८ ॥

५९५. यथा यथा पाप आधिक्यं तथा तथा वेद विरुद्ध मार्गे रुचिः ॥१०, १७, ८ ॥

५९६. भगवदीयैव सम्पत्तिः गुप्तं भगवदीयं प्रकटी करोति इति ॥ १०, १७, १८ ॥

५९७. तद् गुणेषु प्रसक्ता हि तदा आसक्ता भवन्ति हि। आसक्तिः प्रेमपूर्वैव प्रेमापि हरिणा कृतम् । उद्बोधकं च हरिणा कृतं न अन्येन केनचित्। ॥ १०, १८, १ ॥

५९८. नाम लीलारूपं वेणुनादं । अतः श्रोत्रपेयैव सा, सा हि सर्वेषां भगवदीयत्वं सम्पादयति, आनन्द एव सा प्रकटा द्रवीभूता, ब्रह्मानन्दाद् अपि अधिका, आनन्दसारभूता । सा न कथंचित् साधनताम् आपद्यते स्वतः । भगवद् भोग अनन्तरमेव भगवान् भोग्यो भवति। परं ज्ञात्वा पाने महान् रस इति । स्त्री भावो गूढः पुष्टिमार्गे तत्त्वम् इति कृष्णपदार्थः क्वचिद् विवृतः। ॥ १०, १८, ५ ॥

५९९. तत उक्त सुधायाम् अन्तः पूर्णायाम् अति आधिक्येन पतितः गलनरूपम् वर्णनमिति पश्चात् तद् उक्तम् ॥ १०, १८, ६ ॥

६००. वस्तु निर्देश मात्रेण श्रोतॄणां काव्यवद् रसः । रसवद् फलबोधाय प्रथमं पल्लवो मत ॥१०, १८, ८॥

६०१. अधरसुधा गोपिकानां सम्बन्धिनी न अन्यत्र तद् भोगो लोके प्रसिद्धः। साधनबल निश्चयेन फल अभावः पूर्वपक्षः, फलबल विचारेण साधन अभावः सिद्धान्तः॥ १०,१८,९ ।

६०२. हरेः चरणयोः प्रीतिः स्व सर्वस्व निवेदनात् । उत्कर्षः च अपि वैराग्ये हरेः अपि हरिर्यदा। भक्त्या च तादृशत्वं च सा सेवा सेवकः उचिता ।। १०, १८, ११ ॥

६०३. नितराम् इक्षणं दिव्य दृष्टया, स्वजातियः उद्धार अर्थम् आगत इति विशेषः। भगवद् अनु उपयोगे अन्यस्य

अपि रसः न उत्पद्यताम् इति रसाभासः वर्णितः ॥१०, १८, १२॥

६०४. सदानन्दः वाच्यः सुखम् वागधिपतिः निर्गमनम् वाक्। तासां न बहिः संवेदनं यतः अन्तर्भगवन्तं स्पृशन्ति ॥ १०, १८, १३ ॥

६०५. यावत् जन्म यः भक्त्यैव वर्धते सो अन्ते कृत आत्म निवेदो भवति। ॥ १०, १८, १६ ॥

६०६. वाक् स्थाने कन्दमूलानि, सर्व अभावे वार्ता गणना ॥ १०, १८, १८ ॥

६०७. गुणानां भगवतः च मिश्रणे कोटिशः प्रस्तारा भवन्ति ॥ १०, १८, २० ॥

६०८. भगवति समर्पिता सर्वा सामग्री भगवदीया जाता, कोटि सूर्याधिकज्ञान अग्निरूपः भगवान् तत्र सर्वम् बुद्धि अधीनमिति बुद्धिः चेत् समर्पिता तदा सर्वमेव समर्पितमिति बुद्धि समर्पणम् एव आह मय्यावेशितधियामिति ॥ १०, १९, २६ ॥

६०९. स्वातन्त्र्ये रसः गुप्तः भवति। १०, २०, २२ ॥

६१०. प्राणे गते शरीरं दह्यत एव तथा जन्मादीनां प्राण भूता भक्तिः तद् अभावे दाह एव उचितः ॥ १०, २०, ३९ ॥

६११. वस्तु तस्तु वाचा अलम् पूर्णम् यत्र यत्र वाङ् न प्रवर्तते स पूर्णः सर्ववेदकर्ता सर्वथा न आश्रितः किन्तु उप समीपे अलम् एव आश्रित इति ॥ १०, २२, ५ ॥

६१२. भक्तिमार्गम् त्यक्तवन्तः अन्यथा भगवद् रक्षार्थम् एव यत्नं कुर्युः न तु स्वरक्षार्थम् भगवन्तम् प्रार्थयेयुः। ॥ १०, २२, १२ ॥

६१३. लीलायां क्लेशो रसाय भवति। ॥ १०, २२, १९ ॥

६१४. दीपवद् विषयैः अनुग्रहोपि न स्थिरो भवति। १०, २४, १६ ॥

६१५. तद् इदानीम् स्वामि दर्शनात् जाते फले साधन अभावे अपि सफल जन्मत्वं। समर्थो भवान् साधन अभावे फलं दातुं साधनता अपि स्वकृतै वा इति। त्वद् सेवकानाम् एव अलौकिक कर्तृत्वम् यत्र त्वयि तत्र किं वक्तव्यम् इति ॥ १०, २५, ५ ॥

६१६. स्वानंद अनुभवार्थम् हि योग्यता अपि निरूपिता ॥१०, २६, १॥

६१७. पुरुषो अपि यदि अनुरागेण स्पृशति, तदा सुखं भवति। चर्षण्यः सर्वत्र परिभ्रमण शक्तयः। ताः

सर्वत्र परिभ्रान्ता अपि न क्वापि परमानन्द सम्बन्धिन्यः जाताः। यदि वा कश्चिन् मुच्येत, तथापि ता न प्रवेशम् लभन्ते। चर्षणी सहितानां जीवानां वा ॥१०,२६,२॥

६१८. दुःसहो यः प्रेष्ठविरहः स एव महान् अग्निः, तस्य यः तीव्रतापः। फलभोगे कर्म क्षीयत इति अविवादम् ॥ १०, २६, ११ ॥

६१९. ततः मर्यादायाम् ज्ञानेनैव मुक्तिः, पुष्टौ भक्त्या ज्ञानेन वा।१०२६,१२

६२०. यतः यः कश्चन येन केन अपि उपायेन भगवति सम्बन्धं प्राप्नोति स एव मुच्यते। द्वेषादयो अपि भगवतैव उत्पादिताः।।१०,२६,१३॥

६२१. देहादि भजनद्वारा भजनीयो भविष्यति इति अपि न, यतः निर्गुणः, निर्गता गुणा यस्मात्॥१०,२६,१४

६२२. कर्मवशात् च न अन्ते भगवतः स्मरणम् अन्यस्य एव, प्रपञ्च विरोधित्वाद् भगवतः। अतः नित्यं ये विदधते, ते तन्मयतां प्राप्नुवन्ति। ताः शब्द श्रवणात् समागता इति शब्देन निवारणीयाः। अतः हृदयगाम्यस्य वचनं भवति॥ १०, २६, १७ ॥

६२३. स्त्रीणां स्त्रीशरीरं प्राप्तानां व्यभिचार अभावाय भगवानेव सेव्यः ॥ १०, २६, २४॥

६२४. स्नेहस्तु भगवद् विषयकः अलौकिकः। स च उत्पन्नो भावः अनुकीर्तनात् स्थिरो भवति।१०,२६,२७॥

६२५. न हि फलम् कश्चित् साधनं भवति। भगवान् हि वाक्येन निराकरोति, न तु स्वरूपतः। ईश्वरवाक्यनिराकरणे यतो वाणी बिभेति। यत्र रागः स्वल्पः अपि, न तत्र भयम् ॥ १०, २६, ३० ॥

६२६. यथा जीवानाम्। ते हि सर्वम् कर्तुं वाञ्छन्ति, न भगवद् भजनम्। अतः फलद्वारा भजनम् ॥ १०, २६, ३१ ॥

६२७. बहिर्मुखा हि धर्म शास्त्रज्ञाः, शारीरं एव धर्मम् स्वधर्मम् आहुः। न तु आत्मधर्मम् भगवद् धर्मम् वा। न च भगवद् वाक्यम् अनुवादकम्। नापि सेवा व्यतिरेकेण अयम् धर्मः स्फुरति। अन्यथा वचन मात्रेणैव गतं स्यात्। अतः उपदिष्टस्य सिद्ध्यर्थम् सेवां कारय। उपदेशस्य पदम् आश्रयः कर्तैव भवति। धर्मो धर्मिमूलः। प्रेष्ठाय च देयम् प्रियम् वस्तु। धर्मि विचारो धर्माद् अपि अधिकः॥१०,२६,३२॥

६२८. निरुद्धानि इन्द्रियाणि आत्मगामीनि भवन्ति। तत्र अपि आत्मगामीनि तदैव भवन्ति, यदि स्वद् अर्थम् उपयुक्तानि भवन्ति। प्रियस्य

हि सेवा कर्तव्या, स चेत् प्रियः काल परिच्छेदो न भवति, स भगवानेव। त्वद् अप्रसादात् एव लोका भ्रान्ताः दुःखहेतुष्वपि प्रवर्तन्ते। क्लेश एव साधनम् तपोवत् ॥ १०, २९, ११ ॥

६२९. न हि साक्षात् परमानन्दे सति-कश्चित् परम्परया पाक्षिकं साधनं गृह्णाति। आशा अभावे सर्वत्रैव लोपात् ॥ १०, २९, ३४ ॥

६३०. स च अग्निः त्वयैव उत्पादित इति। हृदयगामि च त्वद् अधरामृतम् एव। पूरो हि वस्तु प्रवाहयति। अलौकिकः च अग्निः अलौकिकेनैव शाम्यति। अतः अतिगुप्तेनैव अधरामृतेन तस्य जीवनम् ॥ १०, २९, ३५ ॥

६३१. साक्षात् चरणस्पर्शो दुर्लभः। सर्वदैव स्वप्ने त्वत् सम्बन्धं प्राप्नुमः॥ १०, २९, ३६ ॥

५३२. सर्व एव भक्ताः त्वत् चरणरजसैव सम्पादित देहवन्तः। तद् रजः प्राप्तिः येषाम्, ते त्वत् सेवका एव भवन्ति ॥ १०, २९, ३७ ॥

६३३. भगवद् कृपा अभावे तादृशेनैव सम्बन्धो भवेद् इति। कृपा हि सर्वतो अधिका ॥१०, २९, ३८॥

६३४. ब्रह्मानन्दे प्रविष्टानां न भक्ति विलासः। अनुभव रसः हि भिन्नतया स्थितो भवति। अतो भक्तिरूपसुखस्य इष्टत्वात् दास्यमेव फलम्, न मोक्षः ॥ १०, २९, ३९॥

६३५. भगवत् सम्बन्धात् अविद्या तु न बाधते, परमन्य एव बाधकाः। तेषां बलं ते इति, त्वदीया इति। स्त्री तु देह एव ॥ १०, २९, ४० ॥

६३६. स्व अवतार प्रयोजनं विचार्य अस्मासु कृपा कर्तव्या। यत्र स्वरूपम् एव अन्यथा करोति, तत्र वाचम् अन्यथा करोति इति किम् वक्तव्यम् ॥ १०, २९, ४१॥

६३७. आत्मानम् एव पूर्णम् मेनिरे, न तु भगवन्तम् पूर्णम्, तेन वा स्वपूर्णताम् ॥ १०, २९, ४७ ॥

६३८. मूढा अपि वैष्णवा एव हि विष्णुगतिं जानन्ति, न तु अत्यन्तं निपुणा अपि अवैष्णवाः ॥ १०, ३०, ४ ॥

६३९. सजातीयो हि सजातीयं मार्गस्थं दृष्ट्वा गच्छति ॥ १०, ३०, ७ ॥

६४०. भगवति हृदि समाविष्टे लीलाभिः सहिते ॥ १०, ३०, १४ ॥

६४१. भगवद् वशीकरणान्ता च लीला। ॥ १०, ३०, २३ ॥

६४२. भगवद् आवेशे हि सर्वज्ञता भवति। तेषां च कार्यम् भगवद् पद दर्शनम् ॥ १०, ३०, २४ ॥

६४३. भगवद् अनाराधकैः अपि फलत्वात् भगवतः सम्बन्धात् । अवरोधिते तु फलं स्ववशे भवति । सामग्री भेदात् कर्माणि सर्वत्र विलक्षणानि भवन्ति । तद् अवान्तर वैलक्षण्यं स एव जानाति । ॥ १०, २७, २८ ॥

६४४. न हि ताः शास्त्रेण भगवदीया जाताः, किन्तु स्वभावेन । स्वदोष परिज्ञानं च भगवद् कृपयैव भवति, न स्वत इति ॥ १०, २७, ४१ ॥

६४५. न हि भगवदीया अंधकारं प्रविशन्ति ॥ १०, २७, ४२ ॥

६४६. सर्वा एव तस्मिन् भगवति एव आलापो यासाम् । अतः अन्यतः अपि न स्मरणम् । अत आत्मत्वेन भगवानेव स्फुरति इति न देहादि स्फुरणम् ॥ १०, २७, ४३ ॥

६४७. दोषनिवारणे हरिगुणगानमेव साधनम् इति ॥१०, २७, ४४॥

६४८. उदरस्थिता श्रीश्चेद् बहिरानीता, तदैव म्रियते, अपुष्टत्वात् आमगर्भवत् ॥ १०, २८, २ ॥

६४९. निज जनानाम् स्मयदूरी करणार्थम् परित्यागो न उपाय, किन्तु तद् अर्थम् स्मितम् एव कर्तव्यम् । निजजनानाम् अपि धर्म एव दुष्टः न तु धर्मी । अन्यथा निज जनत्वमेव न स्यात् ।
॥ १०, २८, ६ ॥

६५०. न हि अमृते पीते कस्यचिद् दोषः तिष्ठति इति युक्तिः । न हि धर्मिणि हृते धर्मः तिष्ठति ॥ १०, २८, ६ ॥

६५१. मोहो हि मायारूपः । स भगवद् स्वरूपेणैव निवर्तते सच्चिदानन्द रूपेण । तत्र तव वाणी आनन्द रूपेति आह मधुरयेति । वक्तव्याः दृष्टव्याः पाययितव्या इति । अति गोप्यान् वा रसान् पाययन्ति । ॥ १०, २८, ८ ॥

६५२. तस्मात् स्वरूपतः धर्मतः च भगवद् सदृशी भवत् कथा इति, तया कृत्वा जीवनम्, न तु स्वतः । भगवान् स्वतन्त्रः, कथामृतम् परतन्त्रम् इति एतावान् विशेषः रसोपण्डयोः इव तव कथायाश्च विशेषः ॥ १०, २८, ९ ॥

६५३. वेणुः च परमभक्त इति तेनापि चुम्बितम् एव । न तु पितम् ।
॥ १०, २८, १४ ॥

६५४. मूर्खो ब्रह्मा तादृशीनां पक्ष्मकृत् ।
॥ १०, २८, १५ ॥

६५५. भक्तानां दैन्यम् एव एकं हरितोषण साधनम् ।
॥ १०, २९, १ ॥

६५६. द्रवद्रव्यस्य अन्तर्निवेशनम् पानम्। न हि पूर्णे आनन्दे कश्चन कामोस्ति ॥ १०, २९, ८ ॥

६५७. भगवदानन्दो मनोरथान्तो भवति। अलौकिकः वेद अर्थः। अलौकिका वेदशब्दाः। लोके च न संकेतः ॥ १०, २९, १३ ॥

६५८. साधनैः निवर्तितो अपि दोषो न सम्यक् निवर्तते, यावद् भगवान् न निवर्तयति इति ॥ १०, २९, १५ ॥

६५९. भगवान् फलरूप इति सर्वेषाम् एव उपयोगः। तत्र अहं चेत् साधनत्वेन प्रविशामि, तदा भजनमेव नाशयामि ॥ १०, २९, २० ॥

६६०. तद परोक्ष भजनेन सिध्यति इति मया परोक्षम् भजता तिरोहितम्। अनन्याः पालनीया इति॥ १०, २९, २१ ॥

६६१. सत्य भजनं तु ब्रह्मणो अशक्यमेव, जीवधर्मत्वात्। साधवः हि महत् कर्म कृत्वा स्वयमेव तुष्यन्ति, न तु प्रत्युपकारमपेक्षन्ते ॥ १०, २९, २२ ॥

६६२. उत्सवो नाम मनसः सर्वविस्मारक आल्हादः। उत्सवस्य सम्पादनाय सजातीय अनेक रसः उत्पादनार्थम् विशेषम् आह ॥ १०, ३०, ३ ॥

६६३. उद्गतो अग्निः सर्वत्रैव अग्निम् लीनम् जनयितुम् शक्नोति ॥ १०, ३०, ४ ॥

६६४. गण्डे हि केवलः रसः। पेयो रसः ततः एव पीयत इति ॥ १०, ३०, ८ ॥

६६५. उत्पन्नस्य नादस्य अमृतमयत्वाय भगवता अपि नादः कृतः ॥ १०, ३०, ९ ॥

६६६. मोक्षदानार्थमेव उपनिषदि स्वनादं पूरितवान् ॥ १०, ३०, १० ॥

६६७. चर्वितम् इति साधन प्रयास अभावेन सिद्धदानम् ॥ १०, ३० १३ ॥

६६८. अत एव सर्वस्त्रीणां मूल भूतायाः श्रिय एकान्ततः वल्लभः परमः प्रियः ॥ १०, ३०, १५ ॥

६६९. न हि कस्यश्चित् पतिः परमानन्दो भवति। न हि निरानन्देन आनन्दो दातुम् शक्यते। न हि जीवो विशेष क्रीडां जानाति ॥ १०, ३०, १९ ॥

६७०. भगवता कृतानि पाप निवर्तकानि पुण्यजनकानि च ॥ १०, ३०, २२ ॥

६७१. सहज एव अन्तः स्थितः रस आविर्भूत इति भ्रमरणाम् अनुद्रवणम् ॥ १०, ३०, २५ ॥

६५६. द्रवद्रव्यस्य अन्तर्निवेशनम् पानम्। न हि पूर्णे आनन्दे कश्चन कामोस्ति ॥ १०, २९, ८ ॥

६५७. भगवदानन्दो मनोरथान्तो भवति। अलौकिकः वेद अर्थः। अलौकिका वेदशब्दाः। लोके च न संकेतः ॥ १०, २९, १३ ॥

६५८. साधनैः निवर्तितो अपि दोषो न सम्यक् निवर्तते, यावद् भगवान् न निवर्तयति इति ॥ १०, २९, १५ ॥

६५९. भगवान् फलरूप इति सर्वेषाम् एव उपयोगः। तत्र अहं चेत् साधनत्वेन प्रविशामि, तदा भजनमेव नाशयामि ॥ १०, २९, २० ॥

६६०. तत्र परोक्ष भजनेन सिध्यति इति मया परोक्षम् भजता तिरोहितम्। अनन्याः पालनीया इति॥ १०, २९, २१ ॥

६६१. सत्य भजनं तु ब्रह्मणो अशक्यमेव, जीवधर्मत्वात्। साधवः हि महत् कर्म कृत्वा स्वयमेव तुष्यन्ति, न तु प्रत्युपकारमपेक्षन्ते ॥ १०, २९, २२ ॥

६६२. उत्सवो नाम मनसः सर्वविस्मारक आल्हादः। उत्सवस्य सम्पादनाय सजातीय अनेक रसः उत्पादनार्थम् विशेषम् आह ॥ १०, ३०, ३ ॥

६६३. उद्गतो अग्निः सर्वत्रैव अग्निम् लीनम् जनयितुम् शक्नोति ॥ १०, ३०, ४ ॥

६६४. गण्डे हि केवलः रसः। पेयो रसः ततः एव पीयत इति ॥ १०, ३०, ८ ॥

६६५. उत्पन्नस्य नादस्य अमृतमयत्वाय भगवता अपि नादः कृतः ॥ १०, ३०, ९ ॥

६६६. मोक्षदानार्थमेव उपनिषदि स्वनादं पूरितवान् ॥ १०, ३०, १० ॥

६६७. चर्वितम् इति साधन प्रयास अभावेन सिद्धदानम् ॥ १०, ३० १३ ॥

६६८. अत एव सर्वस्त्रीणां मूल भूतायाः श्रिय एकान्ततः वल्लभः परमः प्रियः ॥ १०, ३०, १५ ॥

६६९. न हि कस्यचित् पतिः परमानन्दो भवति। न हि निरानन्देन आनन्दो दातुम् शक्यते। न हि जीवो विशेष क्रीडां जानाति ॥ १०, ३०, १९ ॥

६७०. भगवता कृतानि पाप निवर्तकानि पुण्यजनकानि च ॥ १०, ३०, २२॥

६७१. सहज एव अन्तः स्थितः रस आविर्भूत इति भ्रमरणाम् अनुद्रवणम् ॥ १०, ३०, २५ ॥

६७२. यावत् पुरुषः रसे गौणभावं न प्राप्नोति, तावत् न रसिकः भवति इति ॥ १०, ३०, २६ ॥

६७३. तथा सर्वम् पिबन् सर्वत्र प्रविशन् सर्व सम्बन्धः तत् तत्कारी भवति ॥ १०, ३०, ३० ॥

६७४. तदीश्वरस्यैव शोभाकरम्, येन नीलकण्ठः भवति । तथैव गोपीजनवल्लभ इति ॥ १०,३०,३१ ।

६७५. ईश्वराणाम् वच एव तथ्यम्, न तु आचरितम् ॥ १०, ३०, ३२ ॥

६७६. न हि सर्वेषाम् एव जीवानाम् समान कर्मणा समानं फलम् उपलभ्यते ॥ १०, ३०, ३५ ॥

६७७. भक्तानाम् अनुग्रहार्थम् एव भक्त-समान रूपं देहम् आस्थितः । विजातीये तेषाम् विश्वासो न भवेद् इति ॥ १०, ३०, ३७ ॥

६७८. गुरु सेवया हि ज्ञानं सिध्यति । सा सेवा तदा पुष्टा भवति इति निश्चीयते, यदि स्वयं पदा स्पृशति गुरुः ॥ १०, ३१, १४ ॥

६७९. भगवद् सेवार्थम् हि संसारे उत्पाद्यन्ते । ते सर्वे संसारगत मायया विपरीता एव भवन्ति । तथापि 'कृष्ण तवास्मि' इति उक्तः सर्वम् एव भयं दूरी करोति । शरणागतस्य सर्वे अपराधा निवृत्ता भवन्ति इति ॥ १०, ३१, १७ ॥

६८०. सर्वा एव श्रुतयो लौकिकाः कर्तव्या इति पाषण्डिनां बुद्धिः ॥ १०, ३१, २५ ॥

६८१. अन्तः प्रविष्टो भगवान् मुखाद् उद्धृत्य कर्णयोः । पुनः निवेश्यते सम्यक् तदा भवति सुस्थिरः ॥ १०, ३२, १ ॥

६८२. यतः श्रुत्वापि विरह जनित क्लेशम् एव प्राप्नुवन्ति, न तु परमानन्दम् ॥ १०, ३२, ३ ॥

६८३. हृतचेतसः दूराद् एव भवन्ति ॥ १०, ३२, ५ ॥

६८४. अन्यथा वेणुनाद अभिज्ञता तत्र च स्वनाम संकेतो न स्यात् । अतः तद् द्वारा भगवान् प्रविष्ट इति अग्रे अपि तथात्वं युक्तमेव। यत्र हि भगवान् निवेशते, तत्र अत्रान्तर फलम् परमफलम् च भवति । मधुधाराः स्वस्मिन् विद्यमान आनन्दम् भगवद् अर्थम् बहिः प्रकटितवत्यः ॥ १०, ३२, ९ ॥

६८५. बहिः व्यापार रहिता भजने सर्वोत्तमाः । बहिः व्यापारेषु च नेत्रे वाक् च नियम्याः । यस्यै तद् द्वयं नियतम्, वाक् न अन्यं वदति,

चक्षुः च न अन्यत् पश्यति ॥ १० ३२, ११ ॥

६८६. अतः अयं ब्रह्मा यं प्रकारं न जानाति, तं एव प्रकारं कृतवान् । न हि प्रकाश्याः प्रकाशक स्वरूपं विदुः ॥ १०, ३२, १५ ॥

६८७. निष्कण्टक भूमौ भोगः सिध्यति ॥ १०, ३३, ३५ ॥

६८८. अत एव गूढः विद्यमानम् अपि न कोपि जानाति । अग्नेः स्वरूपम् उभयथा प्राप्नोति ॥१०,३४,१२॥

६८९. पूर्वं संचित पुण्यराशिः, सर्वम् एव भाग्यम् अद्य फलोन्मुखं जातम् इति अर्थः ॥ १०, ३५, २ ॥

६९०. कदाचिद् अनुग्रहम् करोति लौकिकं विषयादिद्वारा । स हि सर्व दुःख हर्ता सम्बन्ध मात्रम् अपेक्षते ॥ १०, ३५, ७ ॥

६९१. महतां सेव्य एव महान् भवति इति ॥ १०, ३५, २५ ॥

६९२. दयया सुखदानं प्रत्यक्षत एव स्मितेनैव परमानन्द ज्ञानमिति ॥ १०, ३५, ३० ॥

६९३. भगवद् परिपालितानां रसो भगवतैव भोक्तव्य इति ॥१०,३६,३३॥

६९४. सर्व एव सङ्कर्षणस्य भक्ता इति सर्वे दैत्याः ॥ १०, ३६, ४४ ॥

६९५. निर्मल अन्तः करणाः ते भगवत् पराः न तु भोगपराः॥१०,३६,५४॥

६९६. आन्तरी साक्षाद् देवतायै द्रव्य समर्पणादि रूपा ऋचा क्रियते । ॥ १०, ३७, ५ ॥

६९७. सत् सेवारुचिः भगवद् स्वरूप ज्ञानेच्छा भगवद् शास्त्रपरत्वं चअन्तिम जन्मज्ञापकम् ॥१०,३७,२८॥

६९८. सर्वम् निवेद्य दासो जातः, स चेत् भगवता दासत्वेन स्वीक्रियते तदा दासः सम्पद्यते दासत्वमिति, तस्य हि सर्वम् कार्यम् स्वामिनैव कर्तव्यम् इति ॥१०, ३८, ४८॥

६९९. त्वया हि चित्तं मदीयम् उन्मथितं येन चेतना गता, मथनं कृत्वा हि तत् फलम् नवनीतमिव भोक्तव्यम् ॥ १०, ३९, १० ॥

७००. शब्दस्य हि बलम् पूर्णम् सप्तभिः विनिरूपितम् । अर्थस्य अपि बलम् शेषे तावद्भिः विनिरूप्यते ॥ १०, ४०, १ ॥

७०१. भगवांस्तु भक्त्यैव वश्य इति करात् विगलितः जात इति आह ॥ १०, ४०, ६ ॥

७०२. अतः साधने क्षीणे अपि न निवृत्तः, किन्तु साधनक्षयः शेष हेतुः एव जात इति ॥ १०, ४०, १२ ॥

७०३. स हि पूर्वम् एव असमर्थः अप्रयोजको जीवः, यतः पाने अपि उभय सापेक्षः ॥ १०,४०,१५॥

७०४. भक्तिरसः अपि रसदृष्टिवत् निपुणैः अभिनेय इति ॥ १०,४१,१७ ॥

७०५. अतः सुखम् अपि नीतवन्त इति । इयमेव तदासक्तिः यदन्तर्बहिः स एव दृश्यते ॥ १०, ४०, २० ॥

७०६. चक्षुर्भ्याम् पिबन्त इव जाताः । यथा पान समये जलम् अन्तर्बहिः व्याप्तं तिष्ठति, तथा भगवान् जात इत्यर्थः । ज्ञान प्रेमात्म व्यवहारेषु सिद्धेषु सख्यान्तम् आत्मसमर्पणान्तम् वा भक्ति साधनानि क्रियन्ते तथा कृतवन्तः ॥ १०, ४०, २१ ॥

७०७. अवतारो हि ये उद्धर्तव्याः तेषां मध्ये अवतरणम् ॥१०, ४०, २३॥

७०८. गुप्तत्व अर्थम् गुप्तत्वे वा न व्यवहृत इत्यर्थः ॥ १०, ४०, २४ ॥

७०९. सुखं हि परमानन्द रूपम् ॥ १०, ४०, २८ ॥

७१०. कर्मज्ञान भक्ति मार्गेषु श्रमः अपि अस्ति अन्ततः । अत्र तु श्रम अभावः । किञ्च । नौकया नद्यादि तरणे श्रम अभावः अस्ति । अत्र तु मुदा इति अधिकम् ॥ १०, ४०, २८ ॥

७११. गोचारणे हि श्रमे दुग्धपानं स्वतः सिद्धम् ॥ १०, ४१, ३४ ॥

७१२. स्निग्धे स्नेहस्य अयं गुणः यत् समर्थे अपि असमर्थ बुद्धिः इति । दशविधा वा लीलया, सगुणा नव विधा एक विधा निर्गुणा इति ॥ १०, ४१, ६ ॥

७१३. पद्मकोशः हि जलाद् उद्गतो भवति, न कदाचिद् जलम् स्पृशति, यथा जलम् वर्धते तथा तद् नालम् अपि वर्धत इति तस्य जलव्याप्तिः असंभाविता । तथा भगवतः अपि श्रम जल सम्बन्धः असंभावित इति अर्थः ॥ १०, ४१, ११ ॥

७१४. अनुराग मात्रेण न भक्तिः भवति उत्कट भाव अभावात्, लौकिक प्रेमवतां धर्ममार्गेपि तथात्व आदित्यत आह अश्रुकण्ठय इति ॥ १०, ४१, १५ ॥

७१५. सस्मितं मुखं पश्यन्ति । अन्तरानन्दम् आविर्भावयत् । अवलोकनेन सर्वस्वदानमिति ॥१०, ४१, १६ ।

७१६. अलौकिकी शिक्षा तदीयोक्ता ॥ १०, ४१, २६ ॥

७१७. पाने हि दुःख निवृत्त्या सुखेन च विषय मावण्यात् सर्व विस्मारणम् सिद्धम् ॥ १०, ४१, ३९ ॥

७१८. अलौकिकम् सामर्थ्यम् भगवद् शब्दाद् अवगम्यते ॥१०,४१,४९॥

७१९. कृत्रिमो हि न सुखदायि ॥ १०, ४२, ४ ॥

७२० अतः परतन्त्रयोः अशक्या सेवा ॥ १०, ४२, ९ ॥

७२१. मनुष्यत्व मात्र प्रदर्शनं मायिकमिति न भगवति काचित् क्षतिः। मायिकेषु तु सर्वमेव मायिकम् ॥ १०, ४२, १० ॥

७२२. नराः तु भूमिष्ठा एव स्थूल संघाता अभिमानिनः, देवाः तु सूक्ष्मेन्द्रिय आद्य अधिकारिणः। भगवान् 'भर्ता सन् भ्रियमाण' इति श्रुतेः भरणीयो अपि भवति ॥ १०, ४२, १४ ॥

७२३. आध्यात्मिकादि तापा मुक्तानाम् अपि भवन्ति इति ॥१०,४२,१७॥

७२४. रूपादि अपेक्षार्थम् अन्यासक्तिः स्यात् ॥ १०, ४२, १८ ॥

७२५. स्मरणमात्रमेव मूर्च्छाहेतुः। श्रेष्ठत्वात् स्मरणम् आवश्यकम्। मत्स्मरणे मूर्च्छा मद् धर्म स्फुरणे तु कातरत्वम् इति उभयं मत्सन्देशो निवारयिष्यति ॥ १०, ४३, ५ ॥

७२६. त्वयि न सन्देहः ताः पुनः मे मदीयाः न हि मदीयानाम् अन्यत्र मनो भवति, मत् सम्बन्धस्यैव तथा सामर्थ्यात् ॥ १०, ४३, ६ ॥

७२७. यो हि यत् स्मरति सर्वदा स तद् अभिलाषी सन् तत्र गच्छति, अतो अत्र अपि सम्भवना ॥ १०, ४३, १९ ॥

७२८ भगवतः स्थाने गमनं प्रेम्णा भवति ॥ १०, ४३, २१ ॥

७२९. यत्र यत्र भगवता स्वानुभावः स्थापितः तद् दर्शनेनैव मनस्तदात्मतां भगवदावेशमेव प्राप्नोति तेन सुतरामेव गमनाभावः ॥१०,४३,२२॥

७३०. महत्वाद् वस्तु सामर्थ्येनैव मनः तदात्मकं भवति इति ॥ १०, ४३, २३ ॥

७३१. चित्तस्य स्मरणं बुद्धेः अनुरागः मनस उत्कण्ठा, मनः च वाचः पूर्वरूपम्, तत्र अनुरक्त बुद्धया, औत्कण्ठयेन च ज्ञानक्रिया रूपाभ्यां शब्दः उत्पत्ति प्रतिबन्धात् तूष्णीम् अभवत् ॥ १०, ४३, २७ ॥

७३२. भक्तानपि परमप्रेम सर्वोत्कृष्टम्, प्रमाणात् तु प्रमेय बलम अधिकं तेन स्वतन्त्रं भक्ति अपेक्षयापि इयं प्रमेय भक्तिः रसाला ॥ १०, ४३ ३० ॥

७३३. धर्मि उत्कर्षेण धर्मो उत्कर्षेण च माहात्म्यं द्विविधम् इति ॥ १०, ४३, ३१ ॥

७३४. प्राण वियोग काले सर्वे इन्द्रिय विकले अशुद्ध अवस्थायां क्षणं चित्तं समावेश्य, न तु बहु कालम्,

न अपि वाक् देहयोः अनुवृत्तिः। तद् अपि रूपं सर्वं फलसाधकम् इति विशुद्धम् इति उक्तम् ॥ १० ४३, ३२ ॥

७३५. आधार व्यतिकरेण अन्नादि क्रियाणां स्थिति असम्भवात् ॥१०, ४३, ३७ ॥

७३६. स्वयं निर्गुण एव मूलभूतानेतान् क्रीडन् भजते ॥ १०, ४३, ४०॥

७३७. साक्षात्कारः तु तदिच्छया भविष्यति ॥ १०, ४३, ४१ ॥

७३८. भगवान् सर्वेषामेव सर्वं रूपो भूत्वा तथा त्वं बोधयति । तथा सति यदि कोपि न मन्यते तदा तेषाम् अभाग्यम् ॥१०,४३,४३॥

७३९. लौकिको दोहः त्रिवारम्, वैदिको द्विवारम् त्रिवारम् इति एके ॥१०, ४३, ४४ ॥

७४०. यथा अपेक्षा स्मारिका एवं स्नेहोपि । यथा देह परित्यागे दैहिकेषु स्नेहो गच्छति एवम् आकांक्षा परित्यागे अपि यावद् देह सम्बन्धः तावद् न ज्ञानादिना अपि स्नेहो निवर्तयितुं शक्यते ॥ १०, ४४, ५ ।

७४१. अनेन भगवति एव निवेदिता वाक् न अन्यतः सङ्कोचं लभत इति उक्तम् ॥ १०, ४४, १० ॥

७४२. मधु मादकं च यः पिबति स न स्पृश्यो भवति । तद् भगवदीयस्य-न अन्य पुष्पेषु मकरन्दार्थम् गमनं मृग्यत इति । अन्य उपभुक्तस्य अन्येन ग्रहणं देवव्यतिरिक्ते वाच्य आपादकम् । कालकृतः धर्मः भगवदीय कृताद् हीन इति वा। न हि धर्मे उत्कृष्टे तद् आधारः श्यामो भवति । पुष्टिमार्गे हि दक्षिणायनस्यैव प्राशस्त्याव ॥१०, ४४, १२ ॥

७४३. मोहिका च सा, सुधात्वात् पीता। बहुवारम् चेत् पाययेत् तत् च अपि अन्ततः सुखं भवेत् । अतः पाययित्वा भगवान् गतः, पीत्वा च भ्रमर इति ॥ १०, ४४, १३ ॥

७४४. भगवदीयस्यैव परम पुरुषार्थः। न हि भगवदीयान् भगवान् त्यजति । त्यक्ताः च न भगवदीयाः ॥ १०, ४४, १३ ॥

७४५. स्थानान्तरे न गानं। भगवत्समीपे गानं युक्तम् इति। स्थिते स्वरूपे तु भगवान् कदाचित् प्राप्येता अपि। स हि ऋतुभेदेन कोकिलादि शब्दैः वेदैः च भगवन्तम् स्मारयति । ते च शब्दाः भगवद् सहितानां ज्ञानिनां धर्मपराणां वा, उदासीनानां भक्तानां

वा भगवति मिलितानां सुखदा भवन्ति। न तु अस्मद् सदृशीनां सर्वत्र आसक्ति रहितानां धर्मिणं एव अपेक्षमाणानां कालादि निरपेक्षाणां तैः शब्दैः सुखं भवति॥ १०, ४४, १४॥

७४६. अति गुप्ततया रमणं रसाद्गीणाम् ॥ १०, ४४, १५॥

७४७. स्वामि विरुद्ध वाक्यत्वात् दूतस्त्वं वञ्चक एव। बहिः स्थिता अस्माभिः एव त्यक्ता अस्मदीया, अन्तः स्थिताः च तेनैव त्यक्ताः ॥ १०, ४४, १६॥

७४८. सा अपि भगवानिव चेत् स्वयं त्यक्ष्यति तदा त्यजतु नाम, न तु अस्माभिः त्यक्तुं शक्येति अर्थपदम्। कालेनापि भगवद्धर्मा बोध्यन्ते श्रवणादयो धर्मत्वेन, तत्रापि सख्यम् आत्मनिवेदनं च बोध्यते ॥ १०, ४४, १७॥

७४९. तादृश विरक्तस्य अपि नित्यम् आत्म अनुसन्धान युक्तस्य यदि न आत्म स्फूर्तिः किम् तस्य उपनिषदा गुरुभिः वा भविष्यति, तस्मात् सख्यादिकम् अनभिप्रेतम् एव, तथापि वैदिकत्वेन मान्यम् अन्यथा पाषण्डित्वं स्यात् ॥ १०, ४४, १७॥

७५०. न हि भगवद् गुण तत्परा भगवद् दोषान् कथयन्ति। यथा भगवान् तथैव तत् कथा अपि, ततोऽप्यधिकापि। निमीलिताक्षेणापि कर्णामृतं पातुम् शक्यम्। बहुपाने तु को वेद किं वा भवेत्, किन्तु तस्य अमृतस्य विप्रुट् बिन्दुमात्रम्। एवं स्वधर्मम् परित्यज्य परधर्मम् ग्राहयति दुःखितांश्च करोति तान् तत् सम्बन्धिनश्च। पुष्टिमार्गे श्रुतीनामपि भगवन्मर्यादा श्रुतयोपि न अत्यन्तं द्वेष्याः। किन्तु ग्राह्या एव परं न अभिप्रेता इति॥ १० ४४, १८॥

७५१. वाद कथायां लौकिक कथायां वा, स पूर्व स्वामि नः अस्माकं सर्वासां कथामपि स्मरति। १०,४४,२१॥

७५२. व्यभिचारिण्योपि यदि पतिम् भजन्ति तदापि पूर्वं दोषम् परित्यज्य कृतार्था भवन्ति॥ १०, ४४, २६॥

७५३. न हि को अपि परस्तोत्रं कुर्वन् आत्मनः गुण भावं अङ्गीकरोति ॥ १०, ४४, २७॥

७५४. वियोगः स्वाभाविकः, औपाधिकः, अज्ञानतः चेति त्रेधा भवति॥१०, ४४, २९॥

७५५. अथ देहभावेन आत्मा गौण इति देहेन

सह वियोग आविर्भूतस्य उच्येत ॥ १०, ४४, ३० ॥

७५६. कर्ता भगवान्। कार्यमपि स्वयमेव। अहमेव तत्रापि करोमि, परं मन्मायाा अनुभावेन लोको अन्यथा मन्यते ॥ १०, ४४, ३१ ॥

७५७. आत्मनैव अहं प्राप्तव्यः न तु देहसहितेन। न हि उत्तमः पदार्थः स्व उपभोग्यः अधमैः सह भोगम् अर्हति। अतः अस्मात् संघाताद् आदौ निवृत्ता भवत पश्चात् मद् उपभोगं कुरुतेति तात्पर्यम् ॥ १०, ४४, ३२ ॥

७५८. यथा स्वप्नः सूचकः ध्यायमानं मनोपि जन्मान्तरं सूचयति ॥ १०, ४४, ३३ ॥

७५९. गोपिकानां धर्मादयो भगवानेव। बहिः भगवति गोपिका दृष्टिम् प्रक्षिपन्ती स्वधर्मान् दृष्टिधर्मान्वा योजयति न तु स्वयं भगवद् धर्मान् गृह्णाति, मनसि तु भगवति समागते मनो भगवद् धर्मान् गृह्णाति, एतत् तु हिताचरणं प्रियस्य कार्यम्। अनेन योगादि अपेक्षया अपि इयम् अवस्था समीचीनेति। विरहेण स्मरणे तु बलाद् आगत इति भगवानेव स्वधर्मान् स्थापयति। मनसा हि आत्मा सम्बन्ध इति च। न केवलं सन्निकर्षमात्रं फलम् किन्तु अन्यद् अपि अस्ति इति आह, मद् अनुध्यान काम्ययेति ॥ १०, ४४, ३५ ॥

७६०. मम अनुध्यानमेव मम अभिप्रेतम्, गोपिकाः चेत् मद् अभिध्यानं कुर्वन्ति तद् अहं तासु रतिं करोमि न तु अन्यथा ॥ १०, ४४, ३५ ॥

७६१. अयमेव गोपिकानां धर्मः यथा सर्वदा मां स्मरन्ति, मम अपि अयं धर्मः यथा ताभ्यः आनन्दं प्रयच्छामि। अर्थः अपि भगवानेव परम् गुप्त तया संरक्ष्यः, तमेव हि गोपायति यत्र निरन्तरं मनस्तिष्ठति, अन्यथा क्षणम् अपि प्रमादे अर्थो गच्छेत्। अत एव अक्षि गोचरे न चेतः प्रवर्तते, बलिष्ठं च चेतः, अन्यथा प्रत्यक्षे विषये अन्य चित्तता न स्यात ॥ १०, ४४, ३६ ॥

७६२. अहं हि कृत्स्नः प्रसादेनापि प्राप्तः कृत्स्नेनैव साधनेन प्राप्तुं योग्यः ॥ १०, ४४, ३७ ॥

७६३. बलान्मयि मनो निवेशनं कृत्वा पश्चात् शीघ्रमेव अहं प्राप्तव्यः। मनोद्वारा आत्मापि स्मरति। मनोद्वारा स्वयं भगवति प्रविष्टाः स्मरणद्वारा च भगवांस्तासु प्रविष्ट इति ॥ १०, ४४, ३७ ॥

७६४. उत्सवे प्रियस्मरणं दृढं भवति इति ॥ १०, ४४, ३९ ॥

७६५. ब्रह्मानन्दरूपस्य ‍ खि आनन्दो अति अधमः ॥ १०, ४४, ४१ ॥

७६६. अनुबन्धो नाम निरन्तरं वर्द्धमाना प्रीतिः । अभिनिविष्टो हि रसः स्व अनुभावं जनयति ॥ १० ४४, ४२ ॥

७६७. कालदेशयोः विद्यमानत्वेपि रमणाभावात् पुनः पुनः स्मरणम् । तदा वा वयं प्रियाः अधुना तु शिष्याः । क्वचिद् दोषः अपि अन्यत्र गुणः ॥ १०, ४४, ४४ ॥

७६८. सकाममरणे तु न शुद्धिः ॥ १०, ४४, ४५ ॥

७६९. अन्येषामपि कामानां फलदाता स्वयं कथं पूर्णकामो न भवेत् ॥ १०, ४४, ४७ ॥

७७०. उत्तमैः श्लोक्यत एव न तु सम्बन्धम् अभिप्राप्नुवन्ति । सर्वैः एव श्लोक्यत इति दुलभम् भगवद् स्मरणम् । इच्छामात्र अभावे काम अभावः सुतरां सिद्धः, तादृशे हि स्त्रियो विरक्ता भवन्ति ॥ १०, ४४, ४९ ॥

७७१. कृष्णेन सदानन्देन अस्मद् अर्थम् एव आविर्भूतेन स्मारणार्थम् एव तादृक्कर्त्रा ॥ १०, ४४, ५० ॥

७७२. वाक् प्रधानां तु गीर्दृशतिं सजातीय हारिणी स्त्री स्त्रियं चेद् हरेत् न को अपि प्रतिबन्धकः भवति ॥ १०, ४४, ५२ ॥

७७३. इंद्रिय अध्यासात् संघात आत्मबुध्या च भगवान आत्मत्वेन न प्रतीतः, तद् अपगमे प्रतीत इति । शब्दमात्रे तु विरहाभावः आत्मत्वात् न भेदेन प्रतीतिः । पूर्वम् भगवन्तम् भिन्न तया ज्ञातवत्यः, इदानीम् आत्मत्वेन ॥ १०, ४४, ५४ ॥

७७४. पुनः पुनः पूर्ववासनया भेदः स्फुरति, स्फुरणमात्रे च क्लेशः भवति, तद् दूरीकरणार्थम् स्थितिः ॥ १०, ४४, ५५ ॥

७७५. लौकिकाः कथामात्र एवासक्ता भवन्ति सर्वे, लीलायां कथायां मुक्ताः, भक्ताः च कृष्णकथायाम् इति योगसमुदायाभ्यां प्रतिपाद्यते ॥ १०, ४४, ५५ ॥

७७६. बहिः संवेदने हि दिनादिगणना ॥ १०, ४४, ५६ ॥

७७७. सत्सङ्गस्य प्रसंगाद् अपि आगतस्य फलमाह व्रजौकसामिति ॥ १०, ४४, ५७ ॥

७७८. तनुभृतः चेद् एता एव, न अपि ज्ञानिनः, न अपि लौकिका, न

अपि भक्ताः, तत्र लौकिकाः तु व्यर्थ जीवना एव । न हि रज्जवा बद्धः पाशी भवति, स्व आधीन पाश एव तथा । एवं तनुभृतः अपि येषां स आधीना तनुः । ज्ञानिनां तु ज्ञान प्राप्ति पर्यन्तम् एव साधनत्वेन शरीर उपयोगाद् अग्रे व्यर्थ एव देहः अनपेक्षितं भारवद् वहन्तीति । भक्ता अपि मौढ्याद् देहम् एव आत्मानं मन्यमानाः तत्रैव पर्यवसितमतयो बहिर्मुखत्वात तनुरूपा एव न तु तनुभृतः। कालान्तरे परं सत्फलम् अस्मदादयः तु भक्ता अपि प्राप्त ज्ञाना अपि मन्दभावं प्राप्ता न उत्कर्षेण तनुभृतः । एतादृशीम् अवस्थां प्राप्य न कोपि एवंविधो जात इति आश्चर्यम् । अनन्त कथायां रसयुक्तस्य पूर्वोक्तः प्रज्ञ जन्मभिः न कोपि पुरुषार्थः साधनीयः ॥ १०, ४४, ५९ ॥

७७९. भगवता स्वार्थम् उत्पादिताः मध्ये-कालविलम्बे अन्यान् गोपालान् प्रमाद पतिबुद्ध्या गृहीत्वा व्यभिचारं कुर्वत्यः, तेन दुष्टा अपि जाताः पुत्रादि उत्पत्त्या, अतो जाते दोषे अयम् भावो निर्वर्तितुं योग्यः, यथा भर्त्रा व्यभिचारिणी त्यज्यत इति । तथापि भगवद् भाव उत्पन्न एव इति आश्चर्यम् इति आह कृष्णे क चैव इति । केचित् तु निवेदन अनन्तरम् पुनः गोप संपन्पात् व्यभिचारम् आहुः । न हि सदानन्दे फलरूपे भावो दोषाय, तथा सति फलार्थम् कर्म कोपि न कुर्यात् । उद्धारार्थम् वा परमानन्दः प्रकट इति ॥ १०, ४४, ६० ॥

७८०. अनुभजतः स्व अनुरूपमेव श्रेयः करोति । न तु सेवकानुरूपम् ॥ १०, ४४, ६० ॥

७८१. अमृतं हि प्रमादाद् अपि उपभुक्तं प्रसादं संपादयति एव, प्रमाद् अग्नि स्पर्शोपि दाहहेतुर्भवति ॥ १०, ४४ ६० ॥

७८२. अनेन मन्त्रादिद्वारा भजनं तु अनुरूपमेव फलति इति सूचितम् १०, ४४, ६० ॥

७८३. एकान्ततः रतिः यस्यां तादृशी लक्ष्मीः, तस्याम् अपि निरन्तरम् रतिम् प्रयच्छन्नपि न प्रसादम् दत्तवान् । स कः प्रसाद इति आकांक्षायाम् आह रासोत्सव इति ॥ १०, ४४, ६१ ॥

७८४. अतो यो यस्य चरणरजो वाञ्छति स तद्भवति तदीयो वा भवतीति वा, अल्पायुः चरणरजः प्राप्ति योग्यं जन्मअभिलषितम् ॥ १०, ४४, ६२ ॥

७८५. तेषु हस्त संबंधः तदीयानां भगवत्संबंधः शिरः संबंधश्च भवेदिति व्याजेन उत्कर्ष प्रार्थनं भवेत् ॥ १०, ४४, ६२ ॥

७८६. वस्तुतस्तु । भगवानेव स्वजनः आर्यमार्गश्च । अन्यथा फले व्यभिचारः च । अन्यथा बहिः संवेदने स्वास्थ्यम् भवेत् ॥१०, ४४, ६२॥

७८७. यो हि यन्मार्गे गच्छति स तावति धर्मे तत्तुल्यो भवति, तत एता अपि मोक्षदात्र्यो जाताः, तथा वयमपि भविष्याम इति भगवद् भजन अपेक्षयापि एतद् उत्तमम् इति भावः। श्रुतयोपि वक्तुं विचारयन्ति परम् इदम् इत्थितया वक्तुं न जानन्ति। दृष्टान्त अपरिज्ञानात्। इदानीम् एव हि गोपिका भगवता दृष्टान्तीकृताः, भगवद् अभिप्रायः श्रुतीनाम् अपि ज्ञातुम् अशक्य इति न सर्वज्ञत्वादिनापि दूषणम् ॥ १०, ४०, ६२ ॥

७८८. तापे हि पूज्यस्पर्शोपि निषिद्धः पूजार्थमपि ॥ १०, ४४, ६३ ॥

७८९. हरिकथा अपेक्षयापि हरिकथया वा सह त ऊर्ध्वम् गीनम् यासां संपन्धि गीतं भुवनत्रयम् एव पुनाति ॥ १०, ४४, ६४ ॥

७९०. दैस्येषु एव देयानाम् उत्पत्तेः । द्वयं प्रार्थितं संघातस्य भगवति विनियोगः आत्मनः च भगवति स्नेह इति ॥ १०, ४४, ६७ ॥

७९१. भगवान् स्वयम् एव रेमे तावत् फलम् स्वयम् एव अधिकं दत्तवान्, न तु कर्मणा जातमिति तथोक्तम् ॥ १०, ४५, ६ ॥

७९२. दातरि समर्थे प्रसन्ने अपि अल्पयाचनम् भाग्य अभावाद् एव भवति । यद्यपि स्वरूपतः महान् तथापि कालेन परिच्छिन्नः फलत्वात् न साधनताम् आपद्यते अतः दुर्भगैव ॥ १०, ४५, ८ ॥

७९३. अत एव भगवन्तम् प्राप्य स्वयं न किञ्चित् प्रार्थनीयम् । भगवानेव यत् करिष्यति तत् करोतु, अन्यथा स कुमनीष्येव भवतीत्याह ॥ १०, ४५, ११ ॥

७९४. आश्रयो हि स्वाधीनं सर्वमेव यच्छति । मनः तु क्षणिकम् इति सर्वे पदार्थे अभिलाषि भवति इति कदा वा किम् प्रार्थयेद् इति सत् तत् साधनेषु अशक्तः हि प्रपत्तिमार्गम् अवलम्बते ॥१०,४५,२६॥

७९५. लोका हि फलार्थम् सेवमानाः सेवायाम् अशक्ताः चेत् न फलम् प्राप्नुवन्ति, भजन अनुरूपं च प्राप्नुवन्ति न हि प्रभुः तस्य क्लेशम् मन्यते ॥ १०, ४५, २६ ॥

७९६. प्रसन्नो हि स्वधर्मान् आविष्करोति सेवक धर्मांश्चातो भाग्यं मोहनाशं च प्रकाशितवान् इति अर्थः। आगमनेन प्रसादः निरूपितः, साधनान्तरम् व्यावर्तयति ॥ १०, ४५, २७ ॥

७९७. ननु शास्त्रे देवा एव सेव्या न तु अन्य इति चेत् तत्र आह देवाः तु स्वार्थाः स्वार्थम् ज्ञात्वैव हितं कुर्वन्ति। साधवस्तु नैवम्। अतो देव भजन अपेक्षयापि साधु भजनम् एवोत्तमम् ॥ १०, ४५, ३० ॥

७९८. तीर्थेषु स्नात्वा तद् अधिष्ठातृ देवता पूजनम् कर्तव्यम् तदा तीर्थम् कृतम् भवति ॥ १०, ४५, ३१ ॥

७९९. आज्ञासिद्धौ भगवत्त्वं हेतुः। आज्ञापने हरित्वम्, स्वतः आगमने इश्वरत्वम् ॥ १०, ४५, ३६ ॥

८००. व्यवहारे नाममात्रेण सम्बन्धिनः ॥ १०, ४६, १० ॥

८०१. सूनृता सत्यरूपा सतां मनसि यद्यपि तिष्ठति मनसो हि भार्या सा। तथापि चञ्चले मनसि वेश्यारते भर्तरीव हृदि चञ्चले सति न स्थीयते॥ १०, ४६, २७ ॥

८०२. भगवतः संसारः अनन्ता ममतास्पृक्ः न लौकिकवत्। इच्छया सर्वम् जायत इत्यतो लीलार्थम् इति अध्यवसीयते ॥ १०,४६,२९॥

८०३. औषधं हि रोग निवृत्तौ न पुरुष व्यापारम् अपेक्षते अन्तः प्रवेशनातिरिक्त। अत्र च अन्तः प्रवेशः श्रवणद्वार। १०-१-३

८०४. तृष्णा भावेन धन अर्पण दोषः। १०-१-३

८०५. भक्तानां भगवद् समिप गमनं निवेदनार्थम् स्वोत्रं ततो भगवद्वाक्य निवेदनं शब्दतः। १०-१-१७

८०६. न हि भगवद् भक्तानां अन्यनिष्ठा अपि उचिताः। १०-५-२६

८०७. अत एव शब्दब्रह्मणः जलरूपता कचित् प्रकटीकृता तत् कार्यम् दुदम् अग्रे च वक्ष्यति अतः अक्षरात्मकात् एतान् ब्रह्महृदेनीत्वा स्नानं कारितवान्। १०-२५-१६

८०८. अत एव शब्दब्रह्मणः जलरूपता कचित प्रकटीकृता तत् कार्यम् इदम् अग्रे च वक्ष्यति अतःअक्षरात्मकात् एतान ब्रह्महृदेनीत्वा स्नानं कारितवान्। १०-२५-१६

८०९. येन केन उपायेन भगवति संबंध प्राप्नोति तस्यैव मुक्तिः भवति इति आह। १०-२६-१५

८१०. बहिर्मुखा हि धर्म शास्त्राज्ञा शरीरमेव धर्मम् स्वधर्ममाहु: न तु आत्मधर्मम् भगवदधर्मम् वा । १०-२६-३२

८११. भगवद् आवेशे हि सर्वज्ञता भवति। १०-२७-२४

८१२. श्रमजल संबंध: माम् आद्यं च सिद्धमिति ।१०-३५-१७

८१३. तासां स्पर्श एव मुख्य इति।१०-२७-१

८१४. अत: सत् सेवा रूचि: भगवद् स्वरूप ज्ञानेच्छा, भगवद् शास्त्र परत्वम् च अंतिम जन्म ज्ञापक: । १०-३७-२८

८१५. न हि फलं कचित् साधनं भवति । १०-२६-३०

८१६. भगवंतं द्रष्टुम् स्त्रिय एव जानंति। १०-३८-३१

८१७. यत्र राग: स्व अल्पोपि न तत्र भयम् । १०-२६-३०

८१८. धर्मि विचार: धर्माद् अपि अधिक: । १०-२६-३२

८१९. स्त्रियो हि भगवत: कृपापात्र मिति तत्र भगवतो न अत्यन्तम् प्रयास: कालेनैव ता : भगदीया: कियंते तत् प्रियार्थं संभवतु । १०-२९-१

८२०. न हि स्त्रिभि: प्रार्थित: कृष्णो विलंबं करोति इति ।। १०-३९-११

८२१. स लावण्यारस: केवलं भगवति एव सिध्ध: अन्यथा भग्निये अपि भाग्ययुक्ता भवेयु: । १०-४१-१४

८२२. स्नेह एव मयि न तु कृतिरिति । १०-२६-२३

८२३. तादश अमृत पानं तपसा विना न भवति इति अवश्यम् तपस्तु तासु सिद्धम् दुरादअपि पातुं शक्यते । १०-४१-१४

८२४. नित्यं नूतनानां वस्तु तस्तु रसस्यैव अयं स्वभाव: १०-४२-८

८२५. स्मितं भक्ति स्थानिम्।१०-४२-१८

८२६. न हि मदीयांनां अन्यत्र मनो भवति मत् संबंध स्यैव तथा सामर्थ्यात् । १०

८२७. स्नेहेन हि क्रिया भवति । १०-२६-३२

८२८. इन्द्रिय सुखार्थम् भगवान दष्टव्य इति । १०-४३-२१

८२९. सर्वेहि दोषा: भूमौ भवंति न स्वर्गे नापि पाताले । १०-३२-४८

८३०. स्व दोष परिज्ञानंच भगवद् कृपयैव भवति न स्वत: इति । १०-२७-४१

८३१. सत्य भजनं तु ब्रह्मणो अशक्यमेव

जीवधर्मत्वात् । १०-२९-२२

८३२. अनुग्रहायेति । भक्तानां अनुग्रहार्थम् एव भक्तसमानरूपं देहमास्थितः विजातियेतेषां विश्वासो न भवेदिति । १०-३०-३७

८३३. रसम् आत्म स्वरूपम् । १०-३९-१

८३४. भक्तिरसः रसदष्टिवत् निपुणैः अभिनेय इति । १०-४१-१७

८३५. मुखांबुज सुधां पिबंति तथा जातः योहि आत्मस्वरूपं प्रयच्छति स का लातिक्रमं कास्यति एवा । १०-४२-१९

८३६. तत्रापि न सायुज्यार्थम् जीवभावे न गमनं किंतु ब्रह्मैव सन् तत्रापि प्राण वियोग काले सर्व इन्द्रिय विकले अशुद्ध अवस्थायां क्षणं चितं समावेश्य न तु बहुकालेनापि वाक् देहयोः अनुवृत्ति । तद्दपि रूपम् सर्वफल साधकं इति विशुद्धम् इति । १०-४३-३२

८३७. प्रथमं चक्षुः प्रीतिः उक्ता श्रवण व्यतिरेकेण प्रीतिः न भवति । प्रीति सिद्धर्थम मुहुः श्रवणं अपक्ष्यते । १०-३८-२८

८३८. भगवद् सेवामात्रं संसार पदार्थ परिग्रहम् स्थापित्वा पारस्थितम् भगवन्तम् भगवद आश्रयाः प्राप्नुवंति इति उत्तम । १०-१-५

८३९. भगवद एक निष्ठं करोति तदा सफलता गंगा च पुनः साक्षात्म भगवद सेवा उपयिकं शरीरम् उत्पादयति । १०-१-१६

८४०. स हि देवरूपेण अवतिर्णोन अधिकं कार्यम् करिष्यति । १०-१-१४

८४१. पुत्रास्तु देह संबंधिनः सत्यं तु भगवद् संबंधि । १०-१-५७

८४२. रूपातरेण कार्यम् न भवति इति गमनं आवश्यकं । रूपन्तर अभावे सर्व मुक्ति एव स्यात । लीलाया रसालता च न स्यात् । १०-३-१

८४३. अतः त्रिविधा जीवेषु त्रिधा भगवत् कृतिः ।१०-५-१

८४४. गोपिकानां भगवद् स्मरणेनैव भगवद् आवेशो जातः । १०-५-१४

८४५. सर्वथा रोग अभावस्तु भगवद सान्निध्यात् इतिः । १०-५-२६

८४६. स धर्मा भगवद् श्रवणादि अभावे पुर्णा एव न भवन्ति । १०-६-२

८४७. मम अणु स्मृतिः एव अनुग्रहः । १०-२४-१३

८४८. भगवान निरोध लीलाम् एतद् अर्थम्

कृतवान यत् सर्वकर्मसु स्वयं प्रविष्टः तानि कर्माणि स्वर्कमाणि कृत्वा तेभ्यो तान् मोचयति । १०-२५-२

८४९. अनिवेदिते भोगे दोषः च स्यात् । १०-२५-२

८५०. भगवद् स्पर्शेन दैत्य संबंधकृते दोषो निवर्तितः । १०-२५-८

८५१. शव्द ब्रह्मणः जलरूपता।१०-२५-१४

८५२. द्वेपस्य अपि मोक्ष साधकत्वां । १०-२६-१३

८५३. एवं सति येनकेन अपि उपायेन य एव संवंध्यते तस्यैव मुक्तिः भवति । १०-२६-१४

८५४. चुंवनादि अर्थम् उत्तमा अधर रसः च । अक्षर रसाद उत्तम इति उत्तम । १०-१६-३८

८५५. सर्व देवतात्मको भगवान इति वक्तुं सर्व अवयवाः देवतात्वेन निरूप्यन्ते यो अग्निः स ते मुखम् । अवनिः भूमिः । यः सूर्य स ते इक्षणं चक्षुः नभस्तु आकाश एतानि महाभूतानि अपि भवंति । १०-३७-१३

८५६. महतां श्रवण स्मरण कीर्तनादिभिः इंन्द्रिय आधातैः तद् छीद्र द्वारा स रसोहृद हृदये निविश्यते । स तु भक्तिरस अपेक्षयापि पुनः भक्तै इन्द्रियैः पावितात्वात् निर्मलित त तो अपि अधिकारसः । १०-३४-३

८५७. भूम्यादीनां अनुग्रहार्थम् न पाद्दुका ग्रहणं । पाल्यानां चर्म च न परिधेयं । १०-२८-११

८५८. ये संसारत् आत्मानम् पृथकभावं जानंति कर्तुम च शक्नुवंति ते हंसाः । ततोपि ये जीवानां गतिम् भगवदागतिम् च विवेचितुम् जानंति ते परम हंसाः । तेषां एव गतिगम्य इति । १०-३४-४

८५९. सर्वत्र ब्रह्मदृष्टिनांकः परः शत्रुः सर्वस्येव आत्मत्वात् । १०-२३-१९

८६०. स्वरूपे ज्ञाते देहादि अध्या सो न भवति । अध्यासे तु पुनः स्वरूप अज्ञानम् । १०-४-३२

८६१. संसारे सर्वम् अप्रियं दुःख दत्वात् तत्र प्रियदर्शनं दुर्लभम् एव प्रियस्य प्रीतिजनकस्य । १०-५-२४

८६२. आत्मा च संधात रूपा । १०-४३-४१

८६३. ध्यायमानं मनोपि जन्मान्तरम् सूचयति । १०-४४-३३

८६४. मनोद्वारा स्वयं भगवति प्रविष्ठा : स्मरणद्वारा च भगवान स्तासु प्रविष्ट इति । १०-४४-३२

८६५. संधातस्य भगवति विनियोगः आत्मनश्च

भगवति स्नेह । १०-४४-६५

८६६. मूलरूप लिला जगदरूप लीला वेदरूपलीला । १०-११-४९

८६७. संसारो हि चक भमात्मकः । १०-५-२४

८६८. प्रत्यक्षत्वम् स्फुरणमात्रेत्वेन पुरूषव्यापार इति । स्वत एव उद्गतस्य प्रकास इति स्फूरणं । १०-३-४०

८६९. प्रेमबध्ध इति प्रेम्ला अन्तःकरणे बद्धो विस्मर्तुम् अशक्य इति । १०-४१-२०

८७०. साक्षात् देह संबंधः सर्वभावेन यासां तत्रापि प्रेमलेति आन्तरः संबंध :। १०-४१-२८

८७१. तस्मात् अप्रकट भगवत् स्वरूपा : सर्वथा एव न सेव्याः । १०-३८-३९

८७२. भगवत् प्रसादेहि भगवान एव प्राप्स्यते । १०-९-३६

८७३. मार्गम् एव भगवतो न जानंति कुतः सेवां करिष्यति । अभिप्रेता हि सेवा कर्तव्या अभिप्रायस्तु दुर्गमः तदपि ज्ञात्वा सेवां कृतवत्य इति अलौकिकं वोध्यते । १०-१०-४४

८७४. कर्णमूलमिति अन्तः प्रवेशे मूल संबंधः । १०-११-४४

८७५. देवादयो रूपांतरेण उपभोगार्थम् आयान्ति । १०-१३-१९

८७६. अलौकिके भगवान एव साधनम् इति । १०-१५-५

८७७. उद्धारक रूपम् अवलंब्या आगत इति । तदा भगवान् योनितः एव तव उद्धार कृतवान्। १०-१५-५

८७८. यथा वस्त्र पावानार्थम् जले वस्त्रे प्रक्षिप्यते तथा देहादि भगवदधर्मे प्रक्षिप्ताः ।१०-१६-१७

८७९. अपेक्षिता सेवा इच्छानुसारीणि सेवा भवति । १०-१६-१०

८८०. द्विष्टानां साक्षात् मोक्षः न अस्ति इति। निरोधरूप एव मोक्ष निरूप्यते । १०-१७-१

८८१. सर्वथा आज्ञा उलंधने महान्तं व्याध्यादिकम् उत्पादयति । १०-२१-२६

८८२. तत्रापि मोक्ष इहैव अस्मिन् एव जन्मनि अंतिम जन्म एव भगवद् साक्षात्कारात् । १०-१५-२६

८८३. जीव भावात् कर्म संबंधः । १०-३४-१६

८८४. भगवदीय शरीरं तेनैव भवति इति । भगवदीयत्वेन परि समाप्त सर्व अर्था

इति । १०-३४-४३

८८५. सर्वो हि पुरूष: सोमात्मक: । लक्ष्मिश्च भगिनी । १०-२-२१

८८६. स्मितं भक्ति स्थानियम् । विक्षिप्तं ज्ञानरूपम् । १०-४१-१८

८८७. पिवंतो अक्षैरिति । मुखाम्बुनां सुधां पिवंत। १०-४१-१८

८८८. स्तनै: स्तनैनानिति कायिको गाढ आश्लेष: प्रणयेन अश्रुलोचना । अत: सर्वएव भगवदीया: भगवदीयाश्च भगवान् इति प्रमेयं भगवानेव निरूपितो भवति इति । १०-३३-१६

८८९. जीवधर्म अपेक्षया भगवद् धर्मा बलिष्टा इति जीवभावं परित्यज्य भगवद्भावं प्राप्ता इत्यर्थ:। १०-३३-३९

८९०. तस्मात् भगवद् सेवा एव परम पुरूषार्थ रूपेति । १०-३९-१३

८९१. दुःकर्म करणात् आयु: क्षीयेतैव । १०-१-२१

८९२. नापि गुरू प्रसादो मृग्यते यतो भगवान एव जगद् गुरू: । १०-३१-४३

८९३. प्रेम्ला समानितम् रदयानिंतं भवति । रदयम् अणुमात्रं । अहं च हृदयरूप एव तत् गृहणामि । १०-३२-३

८९४. नितिमार्ग अनुसारिणी साधन भक्ति: । पुष्टिमार्ग अनुसारिणी फल भक्ति: । १०-१९-१५

८९५. आत्मानं तेजोमयं कर्तुम् आज्ञा वेक्षणम् कृतवान् तेन सर्व एव लोक दृष्टया रोगादयो निवृत्ता भवंति । १०-२१-१३

८९६. भक्तेषु वात्सल्यं तिष्ठति इति न कदाचिद् अपि भक्ता: त्यक्तव्या: । १०-३८-१३

८९७. हसितं मंत्रात्मकं दृष्टि :।१०-३८-२७

८९८. रसप्रद इति रसम् आत्म स्वरूपम् । १०-३९-१

८९९. प्रमेय बलं अधिकं तेन स्वतंत्र भक्ति अपेक्षयापि इयं प्रमेय भक्ति रसाला । १०-४३-२८

९००. प्राण वियोग काले सर्वे इन्दिय विफले अशुद्ध अवस्थायां क्षणं चितं समावेष्य न तु बहुकालं नापि वाक् देहयो: अनुवृत्ति : तदपिरूपम् फलं शोधकम् विशुद्धं इति । १०-४३-३

९०१. मदीयानां हिमत् कृतम् कर्तव्यं किं लोकेन वेदेन वा । १०-१५-४२

९०२. दर्शॊनरसं अनअभिज्ञो जड एवेति ।

९२५. अतः उपदिष्टस्य सिध्यर्थम् सेवाम् कारय उपदिष्टस्य पदम् आश्रयः कर्तव भवति । १०-२६-३२

९२६. धर्मि विचारः धर्माद अपि अधिकः १०-२६-३२

९२७. त्वत् स्पर्शेन करौ सजीवो भवतः । १०-२६-३४

९२८. चुंबनादि अर्थम् उत्तमा अधर रसश्च अक्षररसादि उत्तम इति उक्तं । अक्षराद आधिक्य तु अधररसे स्पष्टमेव । १०-२६-३८

९२९. करस्पेर्शेन प्रीतिं जनयन् । १०-२७-८

९३०. भगवद् आवेशे हि सर्वज्ञता भवति । १०-२७-२४

९३१. स्वकीयानाम् अपराधम् अपि न मन्यते । १०-३२-१०

९३२. स्वस्य अनुग्रहाय मानुषो देहः प्रदर्शित : एवं गोपिकानां अपि अनुग्रहाय स्व आनन्दम् गोकुले दातुं ताद्दशीम् क्रीडाः भजते । १०-३०-३७ भगवदीय शरीर प्राप्ति अर्थम् पदा अस्पृशंत्।१०-३२-८

९३३. वैष्णवाः वेणुनादेन उद्गत प्रेमरसा जाता इति ।१०-३२-८

९३४. सृष्टि समय हि भगवान सर्वानेव विचारयति इमम् इत्थं करिष्यामि इति मन्यते ते तत्र जन्मानि अवधिमंति करोति तथा सति यदैवान् अंतिमं जन्म भवति स संसरण अप वर्ग उच्यते । १०-३७-२८

९३५. तथा तस्मिन् जन्मनि भगवति मति भवति । अतः सत् सेवा रूचिः, भगवद स्वरूप ज्ञानेच्छा, भगवद शास्त्र परत्वं रूचि च अंतिम जन्म ज्ञापकं । १०-३८-२८

९३६. तद् भगवदीयस्य न अन्य पुष्पेषु मंकरंदार्थम् गमनं मृग्यत। १०-४४-१२

९३७. क्रोधवसात् एव अन्यथा स्फूरति न तु अस्मासु दोषोस्ति इतिः । १०-४४-२६

९३८. यदा चित्तं भगवद् एकनिष्ठं करोति । तदा सफलता गंगाच पुनः साक्षाद भगवद सेवा उपयोगिक शरीरम् संपादयति । पूर्व संबंधिनम् पापवत् कार्य नाशचित्वा तथा भगवद् कार्य उपयोगि चित्तं यावत्या भवंतितावतीम् शुद्धिम् करोति इति अर्थः । १०-४५-६

९३९. अतो भगवद् व्यतिरेकेण न कोपि भगवान मतिं संपादयति । १०-२-५४

९४०. स्मितमेव सुधा महादेवेन दग्धम् अपि कामं जीवयति ।१०-११-९

९४१. सर्वेषां प्रथम एव भगवद् उपभोग अनन्तरम् पदार्थो त्यक्तः संभवा त अतः प्रश्चात स्वयं उपा युक्तो शिष्टस्य सेवक भामित्वात् । १०-२१-१३ वाक् देवता रूपा तेषां उत्पत्तिः तत्र ये भगवद योग्याः तेषां भगवदीयैव सामग्री तत्रैव वागादि व्यवहारः । १०-३१-३

९४२. चरण रजोहि भगवदीयत्यं संपादियति इति परम् शुद्धैव तथात्वं भवति इति पादरजसा गृहाणां पावनं कर्तव्यम् ।

९४३. निवेदन अनन्तरम् पुनः गोपसंधंधात् व्यभिचारम् आहुः भावेनैव तत् पतिनां रमणं । न तु ताभिः सह यथा नाश शंका स्यात् तां रतिम् न हिते तासकर्तुम् शक्ताः तासाम् एव अनुभावेन भगवताच्च भस्मसात् भवेयुः ।
१०-४४-६०

९४४. प्रियतमस्तु व्यवहार्ये स्निग्धो भवति ।
१०-५-२१

*****

दशम स्कंध (उत्तरार्ध)

८०३. भगवानः च तदीयाः च तद् शास्त्रं चेति स त्रिधा । वाक्यात् तदीया विज्ञेयाः तस्यैव न तु शास्त्रतः ॥ सु. उ. १०, १, १ ॥

८०४. स हि महान् भवति, कृष्णस्य च दोषं न पश्यति, ॥ सु. उ. १०, १, २ ॥

८०५. अत एव भगवान् स्वयं पुरुषरूपम् प्राप्य तत्र दोष रूपान् दैत्यान् हन्तुम् स्वयम् एव औषधरूप आविर्भूतः ॥ द. उ. १, १०. ॥

८०६. निधिपतित्वाद् अष्टौ निधीन् प्रेषित-वान् इति गम्यते । अष्टौ लोक-पालाः च कोशान् भण्डार वस्तूनि । निजस्य स्वस्य स्वस्य अभ्युदयांश्च । नहि तानि वस्तुनि स्वधर्म उपा-र्जितानि, किन्तु भगवता दत्तानि । यतः तद् आधिपत्यम् इश्वरेणैव हि आधिपत्यं दीयते ॥ द. उ. १, ५७ ॥

८०७. नग्नान् न मुक्तिः इति वैदिकः सिद्धान्तः ॥ सु. उ. २, २ ॥

८०८. बहिः निर्गमने ग्रासार्थम् स्थापिता विव मकरतुल्यौ वेदौ निरूपितौ ॥ सु. उ. २, ३ ॥

८०९. एतावतैव भगवद् व्यापारः निर्गुणः हि फले निमित्तम् इति ज्ञापयितुम्

निरूपितः ॥ द. उ. २, ९ ॥

८१०. काष्ठस्थितः वह्निः वह्नि स्पर्शेनैव प्रादुर्भूतः । अन्तः स्थितोग्निरिति सर्वव्यापारं दूरीकृत्य भस्मसादेव कृतवान् ॥ द. उ. २, १२ ॥

८११. अन्यथा भगवद् व्यतिरिक्तकथा न श्रोतव्येति क्षोष्टुर्णां विरक्तिः स्यात् ॥ द. उ. २, १४ ॥

८१२. स्नेहाग्नि स्थानाग्नि संयोगैः ॥ द. उ. २, २९॥

८१३. अनेन नारायणः पुरुष एव ज्ञातः न तु पुरुषोत्तमः । भगवद् वाक्यं गर्गवाक्य स्मारकत्वेन जातमिति न फलसिद्धिः ॥ द. उ. २, ४४॥

८१४. तादृशमपि प्राप्य भगवन्तं न भजति इति असन्मतिरेव । प्राप्त सामग्र्या अन्यथा उपयोगाभावात् ॥ द. उ. २, ४६ ॥

८१५. भगवतो ग्रासे षट् दोषाः अस्मदीया निमित्तभूताः । मृतदेहस्य त्रिधा विनियोगः ॥द. उ. २,५०॥

८१६. यदा भगवद् इच्छया भव अपवर्गो भवेत् तदा ससाधनेच्छायां जनस्य सत् समागमो भवेत । नानाविध-योनिषु भ्रमणजनितक्लेशः भगवद् कृपायां हेतुः उक्तः । अतः भक्त-व्यतिरेकेण न को अपि भगवन् मतिम् सम्पादयति ॥ द. उ. २, ५२ ॥

८१७. यो हि यं सेवते, स तत् सम्बन्धं लोकयोः प्राप्नोति । द.उ. २,५९।

८१८. अत्र भक्तिदानम् न अपेक्ष्यते, त्वयि भक्तिः सहजैवास्ति ॥ द. उ. २, ६१ ॥

८१९. ततो लीलार्थम् पुनरागमने आगमनमपि स्यात् । केवले पुरुषोत्तमे तु आगमन शङ्काभावः । अस्य च प्रमाणे श्रद्धा महति स्थितेति, पुष्टिमार्गे न योजितवान् ॥ द. उ. २, ६३ ॥

८२०. भगवद् अनुग्रह व्यतिरेकेण भगवद् वाक्ये श्रद्धा न भवति इति भगवद् अनुग्रहः कारणत्वेन उच्यते ॥ द. उ. ३, १ ॥

८२१. विवाहं कृतवान् न तु गोपिकावत् परिग्रह मात्रम् । राघवत्वे अभवत् सीता रुक्मिणी कृष्ण जन्मनी इति आदिवाक्यात् ॥ द. उ. ३, १६ ॥

८२२. तत्र अवगाहनं धर्म इति । फलयताम् एषां फलानि अपि उक्तानि ॥ द. उ. ३, २७ ॥

८२३. मदर्थमेव रूपं गृहीतम् इति मद् योग्यं एव भवितुम् अर्हति तव रूपम् ॥ द. उ. ३, ३८ ॥

८२४. न हि सिंहाय तद् भवतः निवेदितं शृगालो भक्षयितुं अर्हति ॥ द. उ. ३, ३९ ॥

८२५. न हि लक्ष्मी व्यतिरिक्ता भगवद् योग्या भवति । यथा देवी वाक् तथा वदति ॥ द. उ. ४, ३७ ॥

८२६. नित्यनूतनः भगवान् द्रष्टव्य इति ॥ द. उ. ४, ४२ ॥

८२७. कृष्णो वा अनुमोदताम न त कोपं करोतु, अन्यदेवता नमस्कारं वा अनौचित्येन न स्वीकरोतु ॥ द. उ. ४, ४६ ॥

८२८. पूर्व अवतार मुद्राम् वा सूचयति ॥ द. उ. ४, ५० ॥

८२९. न केवलं सर्वस्व निवेदनमेव कृतवान्, किन्तु वाक्यम् अपि उक्तवान्, अन्यथा वाचनिकम् न दत्तवानिति स्यात् ॥ द. उ. ५, २४ ॥

८३०. नित्यं हरिः श्रीसहितः ॥ द. उ. ५, ६० ॥

८३१. महानपि भक्तोपि विषयासङ्गात् प्राकृतः जातः । अतः तत् सम्बन्धात् तदीया अपि प्राकृता एव जाताः । द. उ. ७, २० ॥

८३२. कृष्ण एव रघुनाथः, तामेव सर्वां सामग्रीं गृहीत्वा समागता इति । स एव लक्ष्मणो बलः । सैव सीता रुक्मिणी । ते वानराया देवाः, सैवा आयोध्या द्वारका, सैव सरयूः गोमति इति ॥ द. उ. ७, २२ ॥

८३३. भक्तत्वाद् भगवतः न मारणीयः । भगवांस्त्वशक्ये एव ॥ द. उ. ७, २४ ॥

८३४. देवान्तर प्रसादापेक्षया भगवद् अपराधो महानिति ॥ द. उ. ७,३९॥

८३५. विद्यमाने भगवति भगवद् धर्माणां प्रयोजकता न स्याद् इति ॥ द. उ. ८, २ ॥

८३६. इयं लौकिकी भाषेति न अत्र को अपि विरोधः शङ्कनीयः । सर्वमेवोत्तरार्धम् न समाधिभाषेत्येके ॥ द. उ. ८, ३० ॥

८३७. अनेन निद्रायाम् आगतायां भक्तहृदये शयानः स्थित इति सूचितम् ॥ द. उ. ९, १२ ॥

८३८. यदि निषिद्धानां साधनानां प्रयोजकता न स्यात् भगवद् प्रसादे, तदा कस्यापि मोक्षो न स्यात् । अतः स्वतन्त्र भक्तिविषयं तादृश रूप दर्शन विषयं वा तद् वाक्यम् इति मन्तव्यम्॥ द. उ. ९, २१ ॥

८३९. सा च देवतारूपा अलौकिकी कन्या न कमपि भगवद् अंशं गृहीत्वा स्थिता ॥ द. उ. ९, ३२॥

८४०. भगवत् प्रसादे हि भगवानेव प्राप्स्यते, तथैव च काम्यते । रजसा हि भगवदीयं शरीरं भवति इति पूर्वमुक्तम् । तदा भगवान् निःसन्दिग्धं प्राप्यते । स्वतन्त्रा

भक्तिः वा भवति ॥ द. उ. ९,३७॥

८४१. अविद्या भगवन्तं न विषयी करोति ॥ द. उ. १०, ८ ॥

८४२. भगवान् न लौकिक साधनैः अलौकिकं जेतुं शक्य इति ॥ द. उ. १०, १५. ॥

८४३. भगवदीयम् एव भगवते दत्तम् ॥ द. उ. १०, २३ ॥

८४४. वाग्भिः सह अर्चितः अर्चन द्रव्यैः । वाग्भिः एव वा ॥ द. उ. १०, ३२ ॥

८४५. अदित्या भोगरूपं तत्राः ते । क्रियारूपा तु अंशेन देवकी जाता ॥ द. उ. १०, ३८ ॥

८४६. मार्गमेव भगवतो न जानन्ति, कुतः सेवां करिष्यन्ति । अभिप्रेता हि सेवा कर्तव्या । अभिप्रायस्तु दुर्लभः । तदपि ज्ञात्वा सेवां कृतकृत्य इति अलौकिकं बोध्यते ॥ द. उ. १०, ४४ ॥

८४७. निष्किञ्चना एव जनाः प्रिया येषाम्, निष्किञ्चन जनानां च स्वयं प्रियाः ॥ द. उ. ११, १४ ॥

८४८. वस्तुतस्तु भगवान् सर्व संसार निवारकः । सगुणाद् एव संसारो भवति ॥ द. उ. ११, १६ ॥

८४९. ऐहिकामुष्मिक फलराग रहितः तु मद् परायण इति न मद् सेवया सर्व जन्मस्वैहिकामुष्मिक फल सिद्धिः ॥ द. उ. ११, १७ ॥

८५०. अनेन तेजोवद् भगवद् आविर्भाव इत्युक्तम् ॥ द. उ. ११, २० ॥

८५१. प्रियाभ्याः प्रेमबन्धनम् इति । प्रेमैव बन्धनमिति भगवद् प्रेम्णैव सा बद्धा तिष्ठति ॥ द. उ. ११, २५॥

८५२ सन्तो हि निःसंदिग्धा भवन्ति, भगवद् वाक्य विश्वासेन प्रवर्तन्ते ॥ द. उ. ११, २८ ॥

८५.३ शब्दस्य त्रैधा वृत्तिः । मुख्या गौणि तात्पर्य वृत्तिः चेति ॥ द. उ. ११, २९ ॥

८५४. प्रेमरसः त्रिविधः भवति, सात्त्विकः राजसः तामसः च । सात्त्विकः तत्र पुत्रादि साधारणः । राजसः स्त्रियामेव धर्म सहितः । तामसः तु जार एव भवति ॥ द. उ. ११, ३० ॥

८५५. अनेन अन्ये मद् सेवका एव इति न ते अपि मद् समाः ॥ द. उ. ११, ३४.

८५६. भगवानलौकिकः भगवद्धर्माश्च । संसारस्य अन्यथैव सिद्धत्वात् तन् निवारकं तु अलौकिकम् एव । तस्माद् अलौकिके अपि बहवः प्रकारा सन्ति इति लोकवद् तदपि प्रसिद्धम् ॥ द. उ. ११, ३६ ॥

८५७. यो हि यद् अर्थम् एव उत्पद्यते, स तु तस्य प्रियः। अतः अन्योन्यं प्रियत्वात् निष्किञ्चना एव जनाः प्रियाः, न तु धनवन्तः, पुरुषार्थ अपेक्षा अभावात। द. उ. ११,३७।

८५८. अतः त्वद् अर्थम् एव ये सिद्धाः. तेषां तत्र च समाजः युक्त इत्याह॥ द. उ. ११, ३८॥

८५९. कथाः कर्णे साधारण्येन प्रविशन्ति सर्वेषाम् एवेति यादृशप्रवेशेन कार्यम् कुर्वन्ति तद् वक्तुम् आह कर्णमूल-मिति। अन्तः प्रवेशो मूलसम्बन्धः कथानाम्। तद् कथाः तद् रूपाः। ॥ द. उ. ११, ४४॥

८६०. ईक्षणेनैव चित् शक्त्याधानमुक्तम्। सम्बन्धः तु भगवता सह नित्य इति ईक्षणमेव विशेषः॥ द. उ. ११, ४६॥

८६१. मद् सम्बन्धिनः सर्वे एव सकामा निष्कामाः च व्यवहाराः निष्कामा एव। सिद्धवद् अनुवादेन अयं वरः दत्तः। या हि अनन्य भक्ता सा सर्वम् प्राप्नोति इति। एकान्ते वा भजते, सा अपि अपेक्षित काम सुखम् प्राप्नोति इति॥ द. उ. ११, ५० ॥

८६२. मद् स्पर्शेनैव जीवनस्य प्राप्तुत्वात। ॥ द. उ ११, ५१॥

८६३. ये केवलम् ऐहिक सम्पद एव प्रार्थयन्ति, ते मन्द भाग्याः। यथा मन्दभाग्यो निधिम् अपि प्राप्य, पाषाण इति पदा प्रक्षिपति, एतन् मन्द भाग्यस्य लक्षणम् पूर्णाद् अल्प प्रार्थनायां मन्द भाग्यत्वम्॥ द. उ. ११, ५३॥

८६४. अनुवृत्तिः नाम उदासीने अपि भगवति तद् अनुसरणम्॥ द. उ. ११, ५४॥

८६५. भगवद् व्यतिरिक्तानाम् अन्यधर्मैः प्रवर्तत इति स्नेह भङ्ग सम्भवः शक्तिः विभक्तेति॥द. उ. १२,३९।

८६६. यद्यपि पापादिना न तेषां भयम्, तथापि दैत्याः न व्यभिचारिणः भवन्ति इति। तेषां कुले व्यभि-चारः दूषणम्, यथा देवानाम् अनृतम्॥ द. उ. १३, २५॥

८६७. देहाभिमानिनां तावदेव तापः। यावद् ते अङ्घ्रिमूलं नासेवेरन्। ॥ द. उ. १३, २८॥

८६८. प्रमेयम् एव हि प्रमाणाद् बलिष्ठम् गूढं ब्रह्मणि वाङ्मय इति। वेदैः तथैव प्रतिपाद्यते, परं गुप्त प्रकारेण ॥ द. उ. १४, ३४॥

८६९. भगवता निरूद्धानां विस्मृत प्रप-ञ्चानां भगवद् आसक्तियुक्तानां कालादिभिः उपद्रवे राजसानाम् उद्वेगः भवति इति, फल निरूपणे

तद् अवश्यं वक्तव्यम् । पराजय सम्भवनायाम् एतत् स्मर्तव्यम् इति ॥ द. उ. १४, ५२ ॥

८७०. विधिः अत्र प्रमेये न नियामक इति न भगवतो विहितं निषिद्धं वा किञ्चिद् अस्ति ॥ द. उ. १५, ७ ॥

८७१. अन्तिम जन्मनि एव भगवद् साक्षात्कारात् ॥ द. उ. १५, २६ ॥

८७२. दुःखे असामर्थ्यम्, सुखे अन्यासक्तिः, उभय अभावे मोहादिरिति सर्वत्रैव स्मरणाभावस्तुल्यः । तथापि कृपयैव स्मरणम् इति स्थान विशेषस्य अप्रयोजकत्वात् ॥ द. उ. १५, २८ ॥

८७३. मदीयानां शापो न भवति इति ॥ द. उ. १५, ४१ ॥

८७४. अस्मद् वल्लभत्वे कदाचिद् अन्यथापि स्याद् इति भावः ॥ द. उ. १६, ९ ॥

८७५. जीवा भगवद् आविर्भावे अपि भगवन्तं न जानन्ति इति भगवान् चिह्नानि बिभर्ति ॥ द. उ. १७, ६ ॥

८७६. तामस स्थाने भगवद् आविर्भावः सहसा न भवति इति ॥ द. उ. १७, १० ॥

८७७. अग्निः अपि प्रसन्नः मद् कृपया ॥ द. उ. १७, ३० ॥

८७८. नीतिमार्ग अनुसारिणी साधन शक्तिः, पुष्टिमार्ग अनुसारिणी फलशक्तिः इति सिद्धांतः ॥ द. उ. १९, १४ ॥

८७९. अन्यत्र अवतारेषु अवतीर्णैव लक्ष्मीः तिष्ठति, न मूलरूपेणेति ॥ द. उ. २०, ७ ॥

८८०. बहिर्मुखानां संसारे सर्वतः भयम् ॥ द. उ. २१, २५ ॥

८८१. सर्वथा आज्ञा उल्लङ्घने महान्तं व्याध्यादिकम् उत्पादयति इति अर्थः । अपराधे विद्यमाने साधनैः अपि मोक्षो दुर्लभ इति ॥ द. उ. २१, २६ ॥

८८२. त्वद् स्मरणेन तद् सुखस्य सुलभता निरूपिता ॥ द. उ. २१, २८ ॥

८८३. क्षणमात्र विलम्बे अपि भगवान् भक्त दुःखे विलम्बं न सहत इति ॥ द. उ. २१, ३२ ॥

८८४. प्राकृत बुद्ध्या श्रवणादौ मर्यादा भक्तानां मते प्रमेयबल अभावात् न फलम् ॥ द. उ. २१ ४२ ॥

८८५. धर्म ब्राह्मणौ एव पुष्टिमार्गे बाधकौ ॥ द. उ. २२, १ ॥

८८६. वेषान्तरे समान शीलत्वं न उपपद्यत इति ॥ द. उ. २३, १६ ॥

८८७. दैत्य अंशत्वाद् दैत्यकृतिः एव हृदये समायाति ॥द. उ. २३,२४॥

८८८. यथा रूपम् अन्यथा तथा वाक् अपि भविष्यति ॥द. उ. २३,२९॥

८८९. न हि अनुग्रह संपादकः असूयार्हो भवति ॥ द. उ. २४, ९ ॥

८९०. आदरेण नमनं सर्वकार्य साधकम् इति सूचितम् ॥ द. उ. २४, १६ ।

८९१. श्लक्ष्णा वाणी श्रवणमात्रेण सुखदात्रीति ॥ द. उ. २४, १७ ॥

८९२. अत्यन्त स्नेह एव नित्यं स्मरणम् इति सिद्धान्तः ॥ द. उ. २४, १८ ।

८९३. निरन्तर स्मरण उपाय प्रार्थना विषयः ॥ द. उ. २४, १९ ॥

८९४. सहने साधनं मद्चित्ता इति 'कृष्णो अस्ति मम' ॥ द. उ. २४, २२ ॥

८९५. मद् स्मरणम् एव कर्तुं शक्यं कार्य साधकं च ततः च मद् प्राप्तिः एव भविष्यति ॥ द. उ. २४,२३ ॥

८९६. कृष्णशब्दः दुष्ट मुखात् निर्गतः मालिन्ययोगात् मलिनमेव वक्ति ॥ द. उ. २५, ३२ ॥

८९७. संबन्धेन श्रवण प्रोत्साहो निरूप्यते ॥ द. उ. २६, ३ ॥

८९८. पतिव्रतानां तु विलासा एव न भवन्ति सुतराम् अन्यैः सह ॥ द.

८९९. अत्रापि फलम् भगवद् अनुभवः साधनत्वेन मन्यते । तथा सर्व एव भगवद् सम्बन्धी पदार्थः । इदम् रहस्यम् सर्वदैव भगवदीयैः अनुसन्धेयम् ॥ द. उ. २७, १ ॥

९००. यस्य पाद सेवया ऊर्जिता आत्मविद्या भवति । ब्रह्मविद् चरण सेवया उत्पन्ना भगवद् चरण सेवया पुष्टा भवति । तथा गुरोः भगवतः सकाशात् च जायमान ज्ञान विशेषः ॥ द. उ. २८, ३२ ॥

९०१. साक्षाद् गुरोः सकाशाद् अध्ययन व्यापारे मननं बाधितं भवेत् ॥ द. उ. २९, २९ ॥

९०२. तत्र ये भगवद् योग्याः तेषां भगवदीयैव सामग्री तत्रैव वागादि व्यवहारः। भगवतः कथामात्रं कदाचिद् अन्योपि वदेत् । उत्कर्षाधायकानां तु तेन प्रकारेण नितरां भक्तिपूर्वकं उच्चारणं भगवद् कृतवाच एव इति ॥ द. उ. ३१, ३ ॥

९०३. अत्र अयं साधन क्रमोपि निरूपितः मार्गान्तर अनुसारेणैव गुणोत्कीर्तन पर्यन्तम् अधिकारे सिद्धे पश्चात् कीर्तनं भगवदीयानां प्रथमं साधनं, ततः सेवा रूच्या सेवा, ततो ज्ञान उदये सर्वत्र भगवद् अनु-

तत् साधक पुण्य कथा श्रवणम्, ततः सर्वत्र भगवद् साक्षात्कारः ॥ द. उ. ३१, ४ ॥

९०४. अयं च ब्रह्मणः संबन्धः ब्रह्म सम्बन्ध योग्यतां एव संपादयति न जीवसंबन्धमिति । अनेन एतादृश भावे यद् अदृष्टं भगवद् इच्छा वा तेनैव अस्य सख्यं जातम् इति उक्तं भवति ॥ द. उ. ३१, ६ ॥

९०५. सिद्ध दशैषा तव विषय भोगेपि न स्वरूप नाशः । किंच । भगवता स्वस्य रूपं त्वयि समर्पितम् । अतः भगवतः तव सखा भगवान् साक्षात् ॥ द. उ. ३१, ९ ॥

९०६. दाता जगति दुर्लभः । यः स्मरति तस्मै बहु प्रयच्छति । किं बहुना ब्रह्मानन्दं किं बहुना आत्मानन्दमपि ॥ द. उ. ३१, ११ ॥

९०७. एकस्मिन्नपि दिवसे वारं वारं भर्त्रे रोचत इति ॥ द. उ. ३१, १२ ॥

९०८. भगवान् हि लोकशिक्षार्थम् कर्माणि करोति । लोके यद्येतादृशेनापि सख्यं बोधयेत् तदा नीचैः अपि लोकाः सख्यं कुर्युः ॥ द. उ. ३१, २६ ॥

९०९. ज्ञान उदयात् शरीर अभ्यास अभावात् तत् प्रीतिकरे गृहे न प्रीतिः ॥ द. उ. ३१, २९ ॥

९१०. स्वभावविजयार्थम् कर्मणां करणं, स्वभावः हि दुर्जयः ॥ द. उ. ३१, ३० ॥

९११. गुरोः भक्तेः अनुभव पर्यवसायित्वात् स्वतुल्यता ॥ द. उ. ३१, ३१ ॥

९१२. ये मया गुरुणा वाचा वाङ्मात्रेणैव अज्ञः अनायासेन भवार्णवं तरन्ति तरिष्याम इति निश्चित्य गुरुम् एव भजन्ते त एव अर्थकोविदा इत्यर्थः । द. उ. ३१, ३३ ।

९१३. गुरु शुश्रूषायां तु स्नेह सेवया सेवकस्य आनन्दः गुरोः च इति । यद्यपि अंगभावेनैव सेवाया विनियोगः तथापि भक्त्या कृतः मद् प्रीति हेतुः अपि भवति, संयोग पृथक्त्व न्यायेन ॥ द. उ. ३१, ३४ ॥

९१४. स्वाभाविकाः कामादयः तद् उत्पन्नैः न शान्ता भवन्ति किंतु गुरुः अनुग्रहेणैव भगवता कृत स्मरणेन वा ॥ द. उ. ३१, ४३ ॥

९१५. न अपि गुरुप्रसादः मृग्यते यतो भवानेव जगद् गुरुः ॥ द. उ. ३१, ४४ ॥

९१६. अहम् इति पुरुषोत्तमः मदर्थम् संपाद्य स्व अधिकार अनुसारेण यत्र क्वचिद् निवेदयतु तत्रैव अहं भक्षयामि इति अर्थः । अन्तः

प्रवेशनं च भोजनम् । दान समये भक्त्यैव दानं ॥ द. उ. ३२, ४ ॥

९१७. तत्र हृदयस्य संबन्धः सौहार्देन भवति, सौहार्देनैव स्मरणम् । सख्यं प्राणस्य स हि सर्वत्र जीवम् उपयाति सखायम् एव अनुगच्छति । भगवानः चेत् मद् प्राणानां सखा भवेत् तदा तम् एव अनुगच्छेयुः इति तात्पर्यम् ॥ द. उ. ३२, ३६ ॥

९१८ अतः स्वार्थं सेवकानां समृद्धिं न करोति इति अर्थः । कदाचिद् विस्मरणे का गतिः इति चेत् तत्राह पश्यन्निपातं धनिनां मदोद्भवमिति ॥ द. उ. ३२, ३७ ॥

९१९. भगवद् भक्तेः सह साक्षात् परंपरया वा सर्वेषाम् आसक्तिः अस्ति इति सर्वे भगवदीया एवेति प्रमेयत्वं तेषाम् ॥ द. उ. ३३, १५ ॥

९२०. सगुणस्तु संबन्धो दुर्लभ इति स एव उक्तः ॥ द. उ. ३३, ३१ ॥

९२१. जीवधर्म अपेक्षया भगवद् धर्मा बलिष्ठा इति जीव भावं परित्यज्य भगवद् भावं प्राप्ता इति अर्थः । भगवद् प्रेक्षणे दृशिषु यः पक्ष्मकर्ता तं शपन्ति । द. उ. ३३, ४० ।

९२२. अस्मरणं तु भवतीनाम् एव दोष इति ॥ द. उ. ३३, ४२ ॥

९२३. अमूर्तत्वं महाभावः, पुरुषोत्तम भावो यद् भावः ॥ द. उ. ३३, ४५ ॥

९२४. अनुग्रहस्य स्थिरता सद् गुरुयैव हृदि भवेत् । गोपीनां स एव गुरुः गतिः फलं च । गोपिका उत्तम अधिकारिण्यः परं पुष्टिस्थाः ॥ द. उ. ३४, १ ॥

९२५. भगवद् चरणः स यदा भक्तिमार्गेण गृहीतो भवति तदा भगवद् भक्तानां कायवाङ्मनोभिः दृढं गृहीतः रसात्मकत्वाद् भक्तानाम् आनन्दरूपं स्रवति । स भक्तिरस इति उच्यते । सोपि शब्द ब्रह्मणि भागवत आदौ उद्धृतः घटो उद्धृत जलमिव महतां श्रवण स्मरण कीर्तनादिभिः इन्द्रिय आघातैः तद् छिद्र द्वारा स्वरसः हृत् हृदे विनिविशति । स तु भक्तिरस अपेक्षयापि पुनः भक्ते इन्द्रियैः पावितत्वात् निर्गलितः ततो अपि अधिकरसः ॥ द. उ. ३४, ३ ॥

९२६. ये संसाराद् आत्मनः पृथग्भावं जानान्ति कर्तुं च शक्नुवन्ति ते हंसाः ततो अपि ये जीवानां गतिम् भगवद् गतिम् च विवेचितुं जानन्ति ते परम हंसाः ॥ द. उ. ३४, ४ ॥

९२७. अज्ञानं तावद् एव यावद् भगवतः

सांनिध्यं न भवति। महता पापेनैव कन्यापितृत्वं भवति इति ॥ द. उ. ३४, १० ॥

९२८. स एव सख्यं प्राप्नोति यस्य जन्म प्रभृति जन्मान्तरेषु वा भगवत्येव चित्तं भवति ॥ द. उ. ३४, १७॥

९२९. आत्मीयानां निरोधं हि हरिः अत्र करोति हि । दृष्टा भगवद् कृतिः अदृष्टम् चरणरज इति ।। द. उ. ३५, १ ॥

९३०. अस्माकं तु साक्षात्संबन्धः प्रणय एव ॥ द. उ. ३५, १ ॥

९३१. यदा प्राणी म्रियते तदा पूर्वअनुभवः नश्यति, यदा अपि उत्पद्यते तदापि लोकान्तर अनुभवो नश्यति, ॥ द. उ. ३५, ३२. ॥

९३२. धर्मि दर्शन अनन्तरं हि तत्र प्रतिकर्तव्य संभावना ॥ द. उ. ३५, ६१ ॥

९३३. एवं वेद कालः उल्लङ्घनं न पुरुषोत्तमाद् अन्यस्य शक्यम् ॥ द. उ. ३६, १ ॥

९३४. आदौ आत्मा तत् सर्वम् व्याप्य स्थितः, पश्चात् जीवरूपेण प्राणरूपेण च जातः। प्राणशब्देन इन्द्रियाणि अपि संगृहीतानि ॥ द. उ. ३६, ५ ॥

९३५. एवं कार्येषु अपि कारण अतिरिक्त सामर्थ्यम् यत्र दृश्यते तद् भगवान् इति ज्ञातव्यम् ॥ द. उ. ३६, ७.

९३६. अनुभव एव ब्रह्मणः स्मृतिः जीवस्य, इन्द्रियद्वारा अनुभवः तु कृत्रिमः ॥ द. उ. ३६, १० ॥

९३७. एवं धर्म धर्मि व्यवहारः सद् विषयक एवेति सः अवश्यम् अंगीकर्तव्य इति ।। द. उ. ३६, १२ ॥

९३८. भोगेच्छा देहाभिमानः भगवति च अन्यथा बुद्धिः इति अचिकित्स्यत्रिदोषः ॥ द. उ. ३६, १९.

९३९. आकाशः हि सर्वं वस्तुभिः स्व आकारं करोति घटवत् पटवत् पुरुषवत् च इति ॥ द. उ. ३६, २०॥

९४०. न हि कश्चित् चिन्तामणिं प्राप्य पुनः अन्यत् साधनम् अंगीकरोति ॥ द. उ. ३६, २९ ॥

९४१. आत्मीयाः धनं देहः च इति त्रितय एव सर्व अनुप्रवेशः ॥ द. उ. ३६, ३७ ॥

९४२. ये उत्पद्यन्ते प्रवाहे तेषाम् उत्पत्ति विरोधित्वाद् भगवद् दर्शनं दुर्लभम् ॥ द. उ. ३६, ४० ॥

९४३. अनेन गृहे स्थितस्य शूद्रस्येव वेदोच्चारणमिव भगवद् अन्वेषणं निषिद्धम् इति ज्ञापितम् ॥ द. उ. ३६, ४५ ॥

९४४. भक्तः उपहासका इव आसुरीम् योनिम् प्राप्नुवन्ति। द. उ. ३६, ४८।

९४५ अमृतमयत्वम् भगवद् अर्थम् देवैः तत्र अमृतं स्थापितम् इति! पीत शेषं गदाभृत इति पानं तु पूर्वम् स्थापितम् ॥ द. उ. ३६, ५५॥

९४६. यदैव भगवन्तं स्मरति तद् अमृतम् भगवान् एव पिबति इति ॥ द. उ. ३६, ५५॥

९४७. श्रद्धया अनु गुरुः उच्चारणम् अनु यः शृणोति श्रावयेद् वा। अनेन सतां निरन्तरं सेव्यता निरुपिता। अतो य एव नित्यं कर्णे स्थापयति स एव सन्नित्यपि सूचितम् ॥ द. उ. ३६, ५९॥

९४८. कृष्णो वेदव्यासः। रामः परशुरामः। ॥ द. उ. ३७, १८॥

९४९. ततः भगवान् फलरूपेणापि भजने फल आन्तरं प्रयच्छन् ततो अपि अग्रे फल परंपरा सिद्ध्यर्थम् उपायं कृतवान् इति आह ॥ द. उ. ३७, २१॥

९५०. त्रिलोकस्य स एव गुरुः यत्र अन्तर्यामि प्रेरणया सर्वेषां सद्बुद्धिः उत्पद्यते। बहिः वाक्यं तु अप्रयोजकं व्यभिचारात्। दत्तं फलं सर्वदा एव स्थास्यति इति अपि ज्ञापयति॥ द. उ. ३७, २१॥

९५१. भगवद् दर्शनं तादृशम् येन भगवान् अनन्तः प्रविशति प्रविष्टः अति प्रीतिम् उत्पाद्य उत्फुल्लानि आननानि बहिः आशयान् च अन्तः करोति ॥ द. उ. ३७, २३॥

९५२. प्रियत्वं तदैव भवति यदि गत्वा दृश्यते। अतः प्रियत्वे अन्यथा अनुपपत्त्या भगवान् स्वयम् आगत्य दृष्टवान् इति अर्थः ॥ द. उ. ३७, ३३ ॥

९५३. एतत् साधनं अपि न क्लेशेन कृतवान् किन्तु अनायासेनैव सिद्धैव सामग्री। पूजा अनन्तरं तादृशम् अन्धः अन्नम् दत्तवान् ॥ द. उ. ३७, ४१ ॥

९५४. सर्वदा भगवद् नामोच्चारणं कर्तव्यमिति। विद्यमानो अपि मलिन दर्पण इव न प्रकाशसे ॥ द. उ. ३७, ४६ ॥

९५५. रूपस्य दृष्टिशोधकत्वं नाम्नो अन्तःकरण शोधकत्वं इति निर्णयः ॥ द. उ. ३७, ४६ ॥

९५६. यद्यपि अन्तःकरणादिषु भगवद् शक्तय एव भगवद् ग्राहिकाः सन्ति ताश्चेत्स्थिरा भवन्ति तदा भगवन्तं पश्यन्ति। कर्मविक्षेपे तु शक्तीनाम् अन्यत्र विनियोगात्

भगवद् दर्शनं बाधितं इति अर्थः ॥ द. उ. ३७, ४७ ॥

९५७. स्व आत्मनि एव ये विभक्ताः आत्मभेदम् कृत्वा स्थिताः तेषां मृत्युः। एक एव भगवान् नित्यम् अनित्यं च भगवद् रूपं शरीरं गृह्णाति। कालादयः नित्याः घटादयः अनित्या इति। उभयम् अपि भगवद् शरीरम् ॥ द. उ. ३७, ४८ ॥

९५८. अतः स्वार्थम् न अपेक्ष्यत इति दासत्वात् स्वामिकार्यम् एव कर्तव्यम् अत आज्ञापयेति अर्थः ॥ द. उ. ३७, ४९ ॥

९५९. एतादृशम् अपि भगवान् स्व सेवायां न प्रेरयति इति स्व सेवाया दुर्लभत्वं द्योतितम् ॥ द. उ. ३७, ५० ॥

९६०. प्रमेयबलम् मया क क अकटी कर्तव्यम् ॥ द. उ. ३७, ५४ ॥

९६१. तत्रापि मुख्यो गुरुः तद् अवज्ञाने न पूजा फलति ॥ द. उ. ३७, ५५ ॥

९६२. श्रुतयश्च भगवतः क्रियाशक्तिं ज्ञान-शक्तिं च प्रतिपादयन्ति नाना विधाम्। अतः सगुणाः श्रुतयः, पदानां संकेतः लौकिक एव इति, अलौकिके संकेत अभावात् ॥ द. उ. ३८, १ ॥

९६३. तत्र मूलभूतं सर्व व्यवहारातीतम् अपि स्वयम् एव स्व शक्ति रूपेण स्वधर्मरूपेण स्वकार्यरूपेण च जातं इति श्रुतिः प्रतिपादयति। स्वयम् एव च वक्ति। भगवान् आदौ बुद्धिम् उत्पादयति, तत इन्द्रियाणि, ततः मनः, ततः प्राणान् इति। बुद्ध्यैव भगवद् निष्ठा आत्म निष्ठाः च भवन्ति भगवद् सेवां च कुर्वन्ति। तथा भवार्थम् उद्भवार्थम् जन्मान्तर सिद्ध्यर्थम् वा इन्द्रियाणि कृतवान्। यथा बुद्धेः उद्भवो भवति तद् अर्थम् इन्द्रियाणि सृष्टवान्। इन्द्रियैः कर्मकरणे च तैः कर्मभिः उद्भवो जन्मान्तरम् च भवति। इन्द्रियैः एव भगवद् सेवा भवति। इन्द्रियाणां च प्रवृत्त्यर्थम् मनसः सृष्टिः। प्राणा हि कल्पनाम् दूरीकुर्वन्ति। अन्नेन प्राणाः प्राणैः बलम् इत्यत्र प्राणैः मनो मनसः च विज्ञानम् विज्ञानाद् आनन्दः ब्रह्मयोनिः इति निरूपितम् ॥ द. उ. ३८, २ ॥

९६४. एतादृशीम् श्रद्धया यः धारयेत स स्व किञ्चनः सन् क्षेमं गच्छेत् सर्व-सन्देह निवृत्त्या भगवन्तम् प्राप्नुयात् ॥ द. उ. ३८, ३ ॥

९६५. श्रुतयः सर्वत्र भ्रमणं कृत्वा अथ-

नार्थम् तत्र गच्छन्ति ॥ द. उ. ३८, १० ॥

९६६. यत एताः श्रुतयः श्रवणमात्ररूपाः, न तु प्रत्यक्ष दर्शिन्यः ॥ द. उ. ३८, १२ ॥

९६७. ताः पूर्ववृत्तान्तम् एव जानन्ति न अग्रिम वृत्तान्तम् इति । श्रुतयः च प्रथम निःश्वासः उद्गता इति केचित् ॥ द. उ. ३८, १३ ॥

९६८. ततः तां मूलतः नाशय येन सम्यक् प्रबोधः भवति इति भावः । दोषार्थम् एव स्वरूप अज्ञानार्थम् एव गृहीता गुणा यया । इयम् एव स्व शक्तिद्वारा जीवान् व्यामोहयति । स एव क्षुद्रादि सुखम् अपेक्षते निद्रा आलस्य प्रमादोत्थं यस्य स्वरूपानन्दः सात्त्विकानन्दो न संभवति । सुतरां ये ते स्थावर जङ्गमाः त्वदीयाः तेषां त्वम् एव बोधक ः ॥ द. उ. ३८ १४॥

९६९. न हि अग्निना जले आवर्त्यमाने सर्वशोषे किञ्चिद् अवशिष्यते । अविकाराद् हेतोः न हि विकृतम् स्थिरम् भवति, ततः कपालस्यापि विकृतत्वाद् अविकृता मृदेव अवशिष्यत इति अर्थः । तेन ब्रह्मविदो सर्वे व्यवहारा ब्रह्मपरा एवेति न केनापि कर्मणा तेषां लेप इति सिद्ध्यति भूमिं न व्यभिचरन्तीत्यर्थः । अतः मूलभूतस्य सत्यत्वाद् अन्यथा बुद्ध्यापि मनो वचन स्थापनम् ब्रह्मविषयम् एव भवति इति अर्थः ॥ द. उ. ३८, १५ ॥

९७०. अतः सूरयः परमानन्दरूपम् साधनम् गृहित्वा साधन दशायाम् एव कृतार्थाः सन्तः दुःख साधनेभ्यः निवर्तन्त इति । ननु विद्वांसो अपि साधनेषु प्रवर्तन्त इति चेत् तत्र आह तव सूरय इति त्वदीयास्तु न प्रवर्तन्त इत्यर्थः ॥ द. उ. ३८, १६ ॥

९७१. भगवद् संबन्धिनाम् अपहृत पाप्मत्वात् य एव कथादिषु संवध्यते तस्यैव पापं दूरी करोति इति । कथाया अमृतत्वम् तव कथा अमृतम् इति अत्र निरुपितम् । कथायास्तु अब्धित्वम् एकस्यां कथायां हृदिस्थितायां ततः भगवदीयाः कथाः सहस्रं भवन्ति । यथा एकस्य वाक्यस्य बुद्धिमतां सहस्र अर्थस्य स्फूर्तिः । एवं यस्य हृदये सहस्रशः भगवद् कथा स्फूर्तिः स समुद्रः विवक्षितः तत्र अवगाहनं निरंतरं येषां हृदये भगवद् कथा अनन्त्यं स्फुरति तयैव निर्वृत्या पूर्णाः क्लेशान् जहुः इति उक्तम् ॥

दशा एव गुरवः भवन्ति इति। अत्र तु कथामात्रम् इति समुद्र अवगाहन् उक्तिः न विरुद्धयते। अयं भगवद् परोक्षे स्थितस्य साधन विचार उक्तः। पुष्टि विचारेण कृतार्थाः मर्यादायाम् अकृतार्थाः उच्यन्ते। यथा भगवद् कृपया कालगुण अभावो निरूपितः तथा स्वस्फूर्त्यैव येषाम् आशय कालगुण निवृत्तिः ते मुख्या भगवद् सेवकाः। कथानत्योक्ति हृदयाः साधनानि न कुर्वते। साक्षाद् ते पाद संश्लिष्टाः ते किं वाच्या महाशयाः ॥ द. उ. ३८, १६ ॥

९७५. भगवद् आज्ञया महदादिभिः कृते ब्रह्माण्डे तत्र स्थित्वा तैरेव निष्पादितं शरीरं परिगृह्य तेषां तत् स्वामिनः वा ये अनुविधानं न कुर्वन्ति ते कृतघ्नाः। करणे अपि तेषाम् न स्वतः सामर्थ्यम् किन्तु यद् अनुग्रहाद् एव ॥ द. उ. ३८, १७ ॥

९७६. यथा भाण्डकर्तारः प्रथमतः आकृतिं कृत्वा पश्चात् धातून् पूरयन्ति अन्यथा पूरित भाण्ड निर्माणं न भवति, तादृशः देहः। अन्तः स्थितः हि आकार समर्पकः भवति। अतः यो अन्तःस्थितः आनन्दं संपादयति पुरुषत्वं चैतादृशम् ये न मन्यन्ते ते कृतघ्ना इति किं वक्तव्यम्। ये वा भजन्ते तेषां युक्तमिति वा किं वक्तव्यमित्यर्थः। अवशेष मात्रेण न कार्यम् सेत्स्यति तस्यापि कालान्तरे नाश संभवात् घृतादिवत् ॥ द. उ. ३८, १७ ॥

९७७. तत्र बहिः स्थितस्यैव प्रवेश आत्मसृष्टि विरोधः अद्वैत विरोधः च, निरवयवत्व शब्दकोपश्च। क्वचित् प्रविष्टस्य जीवब्रह्मभावः। भागवते अपि कारणस्य कार्ये प्रवेश उक्तः। भगवांस्तु अन्तर्यामी सर्वत्र एकविध एव जीव वैलक्षण्येन देवादि भेद इति। यथा अग्निः सर्वत्र काष्ठेषु स्थित एव पुनः तत्र प्रविशन् वर्णभेदं स्थूल सूक्ष्मभेदं दीर्घवक्रादिकं च तनुते न तु अन्येन तस्य वैलक्षण्यम् इति अर्थः। सर्वत्र भगवान् स्वकृतम् अनुकरोति। यथा शिक्षकः शिष्य विद्याम् अनु करोति। एवं जगद् रूपेण भगवान् क्रीडितुं सर्वत्र अनुप्रविष्टः तद् तद्रूपो जात इति उक्तम्। भगवांस्तु सम एव सर्वत्र प्रविष्टः। यत्र प्रविशति तद् समो भूत्वा तत्र प्रविशति। भगवद् कार्याणि च यो अन्तः

प्रविश्य मम वाचम् इमां प्रसुप्ताम् इति । यो हि यद् अभ्यासं करोति स तं पश्यति । रसस्तु अनुभव गम्यः सर्वत्रैव च तेषां रतिः समा । अन्यथा अनुभव विरोधे दृष्टिः समा न स्यात् । लोके रस वैलक्षण्य अभिज्ञाः विलक्षण रसेषु पदार्थेषु तुल्यरूपेषु अपि विषम दृष्टय एव भवन्ति ॥ द. उ. ३८, १९ ॥

९७८. जीवो नाम भगवतः चिद् अंशः, अत्यन्तं विरल आत्मा स सर्वेषु पुरेषु प्रविशन् अन्तः बहिः चैतन्य गुणपूर्ण एव तिष्ठति तेन स्वभावतः सो अपि अविषम् एव । तथा अपि अंशेन विषम भावापन्नेन तिरोहित आनन्देन कृत इति स्व आनन्द अपेक्षार्थम् पुरेषु प्रवर्तते । भगवांस्तु आनन्दपूर्णः कस्माद् अपि आनन्दम् न वाञ्छति । एवं जीव वैलक्षण्यं ये जानन्ति ते भगवन्तं भजन्ते न तु अन्य इति आह । आनन्दार्थमेव जीवस्य प्रवृत्तिः, आनन्दः च भगवति एव अस्ति न अन्यत्र । अतः वेदः उक्त्यापि भगवद् चरणारविन्दाद् अन्यत्र न आनन्द इति अर्थः ॥ द. उ. ३८, २० ॥

९७९. देहग्रहणम् अज्ञान कार्यम् भगवत-श्चेदमद्भुत चरित्रं अज्ञान कार्य सदृशं गृह्णन् प्रगटी कुर्वन् सर्वेषां ज्ञानं संपादयति इति । येषां तादृश चरित्र आलोडने सामर्थ्यम् भवति ते महारस पानमत्ता इव स्वयं प्राप्तं केनचिद् दीयमानं वा अपवर्गम् न गृह्णन्तीति किं वक्तव्यम् । बहुधा प्रार्थनायाम् अपि तेषाम् इच्छा अपि न उत्पद्यत इत्यर्थः । यथा लोके एकाकी यथा रस अनुभवं करोति इति तद् अपेक्षया सर्वैः योग्यैः सह रस अनुभवः सुखाधिक्यहेतुः भवति एवं परमानन्दो अपि । मोक्ष अपेक्षया अपि भगवद् कथा श्रवणरसः अधिकः निरूपितः। गृहस्य प्रतिबन्धकत्वात् भगवद् सेवकानां च संमतत्वभावात् त्यागः ॥ द. उ. ३८, २१ ॥

९८०. शरीरं हि सर्वदोष दुष्टम् असमर्थम् आलस्य युक्तं च । अतः भगवद् भजने इदम् प्रतिबन्धकं भविष्यति इति शंका निराक्रीयते तत्र अनुपथं अनुगुणं सेवकरूपं सर्व इन्द्रिययुक्तं च । प्रियः यथा स्नेहविषयो भवति एवं स्नेहपात्रम् । कदाचिद् भजनीयो भगवान् प्रतिबन्धं कुर्यात् तदा का गतिः इति । तत्राह तथो-

न्मुखे त्वयि हिते प्रिय आत्मनि चेति। ते पूर्वकृत पापाद् आत्महनो जाता यद् वशाद् असत्सङ्गः तेषां जात इति। उरुभये संसारे कुशरीरम् प्राप्य अनेक जन्मसु परिभ्रमन्ति ॥ द. उ. ३८, २२ ॥

९८१. अनेन भगवति प्रमेयबलम् एव मुख्यं न प्रमाण बलम् इति अपि सूचितम् ॥ द. उ. ३८, २३ ॥

९८२. अस्मिन् संसारे को वा भगवन्तम् जानाति यतः वयम् अपि न जानीमः। भगवान् प्रथमत एवं सृष्टिम् उत्पाद्य तिरोहित जातः, मध्ये सृष्टौ जीवा उत्पन्नाः श्रान्ताश्च, पश्चात् प्रलयार्थम् समायास्यति। यदि वा अयं प्रथमत एव स्थितः स्यात्, प्रलयपर्यन्तम् वा तिष्ठेत् तदा सृष्टेः व्यवधायकत्व अभावात् भगवन्तं जानीयात्। मन्त्र व्याख्याने उभयात्मकं मनो निरूपितम्। तथैव अग्नि रहस्ये उभयात्मकं मनो निरूपितम् ॥ द. उ. ३८, २४ ॥

९८३. भगवद् कृपादीनां नित्यत्वे भजनेन कृपा न स्यात्। कर्म कुर्वाणाः फलम् प्राप्नुवन्ति। दातारं तु न पश्यन्ति इति। अन्याधीने फले अवश्यं दातुः अपेक्षा। ज्ञानस्य अपि यो रसः परम अनुभवरूपः स एव आत्मा स्वरूप यस्येति। जीवस्य च भगवत्त्वे कामक्रोधादि सर्वे दोषाः भगवति भवन्ति ॥ द. उ. ३८, २५॥

९८३. जगत् तु जड उपादानकं जीवसामग्र्या पूरितं कथं भगवानिति चेत् तत्र आह स्वकृतम् अनुप्रविष्टम् इदम् इति। अतः जगत् तत्र स्थिता च सामग्री भगवान् इति ॥ द. उ. ३८, २६ ॥

९८४. अनेन भगवतो दानं तिष्ठतु सेवा मात्रेणैव मृत्योः जयो भवति इति उक्तम्। ये हि निरन्तरं सेवां कुर्वन्ति ते सेवार्थम् वैकुण्ठे अपि अपेक्ष्यन्त इति देहान्तरादि निर्माणे कदाचिद् संस्कार नाशो विलम्बश्च भवेदिति तदेव शरीरं गृहीत्वा ते सेवार्थम् द्रुतं गच्छन्ति तदा मध्ये प्रतिबन्धकत्वेन मृत्युः चेद् आयाति तदा तं दृष्ट्वा अभीता एव तस्य अवगणनां कृत्वा आरोहे निःश्रेणिकामिव तद् शिरस आक्रमणं कुर्वन्ति। मृत्योः शिरः महा साहसानि तेषां करणं पदा शिरसो अधिरोहणम् आधिभौतिक व्यवस्था एषा। आध्यात्मिके तु देह दैहिक वैदिकादि धर्मान् सर्वान् उल्लंघ्य विरुद्धान् अपि कृत्वा भगवद् सेवां कुर्वन्ति इति अर्थः ॥ द. उ. ३८, २७ ॥

९८५. बहिर्मुखानां सेवा निवारिता। यत्र स्व स्वामी मृत्योः अपि श्रेष्ठान् देवान् बध्नाति। तत्र तत् सेवकानां मृत्योः अवगणनायाम् का शंकेति अर्थः। गिरा भगवान् बध्नाति साक्षात्तु बन्धनं तत् सेवका एव कुर्वन्ति, यथा राज आज्ञया राजसेवकाः। यथा पशवः शकटादिषु योजनार्थम् निरूप्यन्ते तत्र सेवका एव निरुपकाः। तान् भगवद् सेवायां योजयन्ति। अतः सेवां प्राप्य कृतार्था एव ते भविष्यन्ति इति न तेषां कों अपि मनः क्लेशः। दोषाणाम् अवधिः भगवद् अवज्ञा ॥ द. उ. ३८, २७ ॥

९८६. अत ईश्वरस्य इन्द्रियाणि तन् नियतानि नित्यानि। जीवानाम् अदृष्टैः वा कृतानि सर्वथा तानि इन्द्रियाणि भगवदीयानि भगवद् अर्थमेव कृतानि प्रतिनियतानि इति मन्तव्यम्। ततः तैः सह स्वाभाविको वा, आध्यासिको वा संबन्धो वक्तव्यः। ते सार्वभौमस्य सेवां कुर्वन्ति स्व निर्वाहार्थम्, तथा एकैक इन्द्रिय स्वामिनः सर्व संघात् अधिपतेः सेवां कुर्वन्ति ॥ द. उ. ३८, २८ ॥

९८७. तथा भगवान् अपि केवल एव विहरति। तथा प्रबल अग्नौ उद्गते विस्फुलिङ्गा इव जीवा अपि निःसरन्ति। ततः कालेन क्षुब्धा गुणाः साक्षात् परंपरया च सर्वमेव कार्यजातम् उत्पादयन्ति। यथा विस्फुलिङ्गा अग्नेः निर्गताः वायुम् आलिङ्गय तेन यतः कुतः चिन् नीयमानाः तृणादिषु पतिता उद्गत्वं प्राप्नुवन्ति। जलेपतिताः निर्वीर्या भवन्ति। भूमौ पतिताः मध्यभावेन तिष्ठन्ति। न तु अत्र मूलभूतः वह्निः कम् अपि विस्फुलिंगं कचिद् योजयति। यदा उद्गता ईक्षा भवति तथा सहितः च विहारः ज्ञानपूर्विका क्रीडा इति अर्थः। तत्र अन्तरङ्गः सामग्री संपादकः प्रेरको वा भवति। यस्तु केवल एव आनन्दः सर्व संबन्ध रहितो भवति तं कथं कश्चित् प्रेरको भवेत। तत्र भगवतः सामग्री अभावम् आह। सर्वभावनिर्मुक्तः पूर्णः क्रीडार्थम् उद्गतः। निमित्तं तं समाश्रित्य जायन्ते जीव राशयः ॥ द. उ, ३८, २९ ॥

९८८. दासस्वामिवत् नियम्य नियामक भावः। न च ईश्वर व्यतिरेकेण कश्चिद् अन्यः नियामकः अस्ति येन प्रतिनियत भोग दर्शनस्य

नियमः सिद्धयेत्। ईश्वरे तु नियामके अङ्गीक्रियमाणे एक एव भुङ्क्तां न अन्य इति ईश्वर नियमनात् नियमः संगच्छते। तथा अदृष्टे अपि। अतः अवश्यं भोग नियमार्थम् ईश्वरो नियामको वक्तव्यः। ब्रह्मविदः समदृश इति ॥ द. उ. ३८, ३०॥

९८९. तदात्मकता तदा घटते यद् यद् रूपेण आविर्भवितुम् अर्हति। जीवाः तु विस्फुलिंग न्यायेन भवन्ति इति तदा आत्मकता युक्ता। संघातस्तु न प्रकृत्यात्मकः। तर्हि कथं संघातः उत्पत्तिः इति चेत्। उभय योगेन प्रकृति पुरुष संबन्धेनासुभृतः संघाता देवतिर्यगादयो भवन्ति। न केवलं जलेन वायुना वा बुद्बुदा जायन्ते उभय योगेन तु जायन्त इति तथा प्रकृति पुरुष संयोगेन संघाता जायन्त इति।

तादृशयोः संयोगः अघटमानः सन् भगवद् रूपः वा भगवता वा सिद्धो भवति। अद्भुतकर्मा भगवानेव भवति इति, अतः भगवद् आत्मकता एव सर्वेषां संघातानाम् अतो भगवति एव ते सर्वे पर्यवसिता भवन्ति न अन्यत्र इति निर्णयः। अतः सच्चिदात्मके भगवति एव प्रतिष्ठिता भवितुम् अर्हन्ति न अन्यत्र इति अर्थः। यस्य यस्य भगवद् साक्षात्कारो भवति तस्य तस्य अनुभवे विश्व स्फुर्तिः स्यात्। अयम् अमुक पुष्पस्य रसः अयम् अमुक पुष्पस्य रस इति, किन्तु एकताम् आपन्ना मधुत्वेन एव प्रतीयन्ते तथा भगवति अपि सर्वे सूक्ष्मरूपेण तिष्ठन्ति न तु भिन्नतया प्रतीयन्त इति अर्थः॥ द. उ. ३८, ३१॥

९९०. भगवान् सृष्टयादौ कालं मायां च सृष्टवान्। ये मायया मुग्धा भविष्यन्ति तान् कालो ग्रसिष्यति। ये तु लोकान् भगवन् माया ग्रस्तान् ततः कालेन ग्रस्तान् आलोक्य माया अपगमे निस्तारे च भगवद् भजनम् एव गतिः इति ये भगवन्तं सेवन्ते तेषां पुनः माया मोहः सर्वथा न संगच्छते। यदि कथंचिद् भक्तिमार्गे विषयाणां विद्यमानत्वात् कदाचित् मोहः स्याद् अपि तदापि कालग्रासो न भवेत्॥ द. उ. ३८, ३२॥

९९१. स च गुरुः भगवान् एव भगवान एव वा गुरुः। भिन्न गुरु पक्षे अपि भगवदीयत्वात् न तस्यापि भवः। प्रकृष्टो भवः बुद्धि सहित जन्म यदेव भगवति सद्बुद्धिः

भवति । तत आरभ्यैव भगवति भावः कर्तव्य इति अर्थः । संवत्सरात्मकः प्रत्यक्ष एव कालः ॥ द. उ. ३८, ३२ ॥

९९२. गुरुद्वारा भजनं निरूपितम् । तदेव फल पर्यवसायि । आदौ व्यसन अपगमे गुरुः एव एकम् साधनम् 'एतत् सर्वम् गुरौ भक्त्या' इति वाक्यात् सम्यक् त्यागः साधनत्वेन अपि गुरुसेवायां तु तेनैव कृतार्थत्वाद् योगो व्यर्थ इति भावः ॥ द. उ. ३८, ३३ ॥

९९३. स्वजनानां प्रयोजनम् आवश्यकं तद् अर्थम् स्वजनानाम् अपेक्षा कर्तव्यैव । यदि साधनपुरःसरम् अपेक्ष्यते तदा हि अलौकिकानि साधनानि अपि प्रयच्छति इति भावः । ननु विषयांश्चेद् भगवानपि दद्यात् तद् उपस्थित परित्यागे किं कारणम् इतिचेत् तत्र आह सर्वरस इति । सर्वेरसाः कीर्त्यादयो भगवति एव भवन्ति । एते च रसाः प्रकटा एव न तु मधुनि इव अव्यक्ताः । तत्र आवश्यकत्वाद् लाघवाद् भार्यादिभिः सहैव भगवद् भजनं कर्तव्यं न तु सर्व परित्यागेनेति चेत् । भगवांस्तु निर्दोष आनन्द संपादक इति ॥ द. उ. ३८, ३४ ॥

९९४. स्वजनानां तु सुखजनित वार्ता अपि दूरे । साधनान्तरेण अपि भगवता अपि तेषां सुखं न भवति इति अर्थः । अस्माभिः सर्वम् अन्विष्टं तादृशस्य क्वापि न सुखदाता उपलब्धः ॥ द. उ. ३८, ३४ ॥

९९५. भूमिः हि भगवद् चरणारविन्दरूपा । ततः तीर्थ आश्रयणं कर्तव्यं विशेषतः चरणारविन्द स्फूर्ति अर्थम् । न केवलं तानि एव तीर्थानि सेव्यानि किन्तु गुरुरूपाणि अपि इति आह तीर्थ सदनानि इति । तीर्थानां गुरूणां सदनानि गृहाणि भुवि वर्तन्ते । अतः तानि सेव्यानि इति अर्थः । तद् उद्धारक अलौकिक प्रकारं जानन्ति अतः तेषु गत्वा मन्त्र आदि अलौकिकं भगवद् भजन साधनं शिक्षणीयम् इति अर्थः । ये गुरु उपदेशादिना त्वयि सकृद् अपि मनो दधति । यथा कामिनां स्त्री विशेषे सकृद् चित्तम् तत्र सर्वथा अननुभूय न निवर्तते । तथा स्नेहे जाते भगवद् रस अभिनिवेशे यदा भगवति चित्तं भवति । तादृशः कदाचिद् अपि गृहम् न सेवते । अदृष्टपूर्वः सेवेतापि दृष्ट पूर्वस्तु न सेवत एव इति अर्थः ॥ द. उ. ३८, ३५, ॥

९९६. असद् सेवया पूर्वम नाशः निरूपितः। सत् सेवया कृतार्थता च। यः यादृशात् उत्पद्यते स तादृश एव भवति। मनो दोषेण जगद् अन्यथा प्रतीयत इति। ननु वेद अनुरोधात् जगतः सत्वम् अङ्गीक्रियते तत्राह भ्रमयति भारति इति। भारती वेदरूपा त्वदीया वाणी उक्थजडान् कर्मपरान् भ्रामयति ॥ द. उ. ३८, ३६ ॥

९९७. न हि सत् कदाचिद् असद् भवति अन्यथा कदाचिद् घटो अपि पटः स्यात् तस्माद् आन्तर अलिकत्वाद् असद् जगत्। वह्निस्तु व्याप्ति आदौ सर्वत्र एक जातिः एव। ॥ द. उ. ३८, ३७ ॥

९९८. चित् सेव्येति पक्षे अपि भगवानेव सेव्यो न तु जीवाः। स्वरूपस्थितः हि सेव्यः जीवाः तु स्वरूपात् प्रच्युताः। एवम् अविद्या संबन्धाद् आनन्द अंश चिद् अंशो अपि अप गच्छति केवलं जडताम् आपद्यते। कालो हि जडान् गुणान् क्षोभयति अन्नप्रायांश्च भक्षयति। एवम् लोष्टप्रायो मृत्युग्रस्तः च यो जातः स कथम् सेव्यो भवेद् इति अर्थः। भगवान् एव सेव्यो हि न तु जीवाः कदाचन ॥ द. उ. ३८, ३८ ॥

९९९. नहि काष्ठे वह्निः अस्ति इति शांत निवृत्ति अर्थम् होमार्थम् वा काष्ठम् सेव्यते। तस्माद् अप्रकट भगवद् स्वरूपः सर्वथा एव न सेव्याः। अस्मृत्या भगवांश्च दुःखम् प्रयच्छति। तेन जीवनदशायाम् अपि दुःखम्। भगवद् पदम् तैः न आरुढम् इति चिन्ता आकुलाः क्लिश्यन्ति इति अर्थः। लौकिका आनन्दा अपि न सेव्याः किन्तु भगवद् आनन्द एव सेव्य इति। द. उ. ३८, ३९।

१०००. यथा परम स्निग्धे जारे तदर्थम् क्लिष्टापि कामिनी न क्लेशं बुध्यते। यथा वा राजसेवकः कस्तूर्यादिना राजोद्वर्तने स्वयं लिप्तोपि न सुखं मन्यते। एवं भगवतो महावैभवं सह सेवकत्वेन अनुभवं कुर्वन् अपि तत् सुखं न मन्यते। स्पष्ट एव भगवद् संबन्धे एव सुखम् न अन्यथा इति स्पष्टम् ॥ द. उ. ३८, ४० ॥

१००१. भगवद् गुण अनुश्रवणं नित्य कर्म। अतः भगवतः गुणगीत परंपरा गुणानां यानि गीतानि व्यासादिभिः कृतानि तेषां परंपरया तत् श्रवणद्वारा भगवान् श्रवणे भृतः,

तेन अन्यं निषेधादिकं न शृणोति भगवतैव श्रवणस्य पूरितत्व त् नित्य कर्मणा भगवता च सर्व पापक्षयान् न दुःख जनकम् अपकीर्त्यादिकं प्राप्नोति। भगवद् सेवका भगवद् ऐश्वर्यं प्राप्ता इति न कोऽपि निन्दां करिष्यति इति। अतः भगवत् सेवक एव निर्दोष सुखभोक्ता न तु अन्य इति निरूपितम् ॥ द. उ. ३८, ४० ॥

१००२. यथा अनन्त वृक्षा भूमौ फलन्ति तत उच्च स्थितानि अपि फलानि भूमौ एव पतन्ति, एवं सर्वे वेदाः स्व स्व रीत्या स्व शक्यं माहात्म्यं भगवतो वदन्ति। तानि ज्ञानानि फलानि उच्यन्ते। तेषां क्वापि पर्यवसान अभावाद् भगवति एव पतन्ति पर्यवसिता भवन्ति। अत्र सर्वत्र श्रुतयः मूलभूताः स्वयं द्रष्टव्याः ॥ द. उ. ३८, ४१ ॥

१००३. अर्थः स्थलत्रये गूढः पुराणः उपनिषद् श्रुतौ। सर्वतः सारम् एतद् हि समुद्धृतम् इहोच्यते। अशेषाः सर्वे एव वेदाः पुराणानि उपनिषदः च तेषां निर्मंथनेन अयम् अर्थः निर्गलित इति रसः ॥ द. उ. ३८, ४३ ॥

१००४. यस्तु ब्रह्मणि दायभाक् तस्य हृदये अयम् अर्थः स्फुरति ॥ द. उ. ३८, ४४ ॥

१००५. नारायणस्य स्वरूपं कृष्णः, कृष्ण एव नारायण रूपेण अवतीर्ण इति कृष्णः मूलं भवति। यद्यपि लोके नारायणस्य एव अंशः कृष्ण इति प्रसिद्धः तथापि श्रुतिगीता शिक्षया विपरीतं ज्ञातवान्। तादृश्यः कृष्ण एव भवन्ति गोपिका आद्याः, न अन्य अवतारेषु इति स एव भजनीयः श्रुतिगीतासु निरूपित इति ज्ञातवान्। स एतद् रूपेण अस्मद् उद्धारार्थम् समागतः तथा सति अयं मूलभूतं न भवति इति तस्यैव च अयम् उपकार इति स एव नमस्कृत इति अर्थः ॥ द. उ. ३८, ४६ ॥

१००६. यथा निर्गुणे मनः प्रविशति तथा कर्तव्यम्। भगवता चेत् तादृशी बुद्धिः त्वयि कृता तदा तया मनः प्रवेक्ष्यति इति भावः ॥ द. उ. ३८, ४८ ॥

१००७. अन्तर्भगवन्तं स्थापयित्वा तत्र सेवां कुर्याद् इति अर्थः ॥ द. उ. ३८, ५० ॥

१००८. कृष्णम् एव ततः वाञ्छेत् नाश्रियं बुद्धिमान् क्वचित् ॥ द. उ. ३९, १ ॥

१००९. यस्य हि यद् रोचते स स्वभक्ताय तत् प्रयच्छति, प्रकृते तु तद् अभाव इति अर्थः। द. उ. ३९, २ ॥

१०१०. दोषरूप पक्ष स्थापनार्थम् भगवता शिवरूपम् एव कृतम् इति न अत्र पुनः तत् पूर्वपक्षाः समायान्ति। गुणार्थम् तदेवं रूपं जातमिति तेनैव रूपेण तत्कार्यम् सिद्ध्यति इति स्वयं गुणातीतः स्थितः। किं च अस्य तादृशी कापि शक्तिः न अस्ति यद् अनुरोधात् तां परिगृह्य सगुणो भवेत्। ततः यदैव यद् विना कार्यम् न भवति इति जानाति तदैव तत् प्रयच्छति इति भावः। अत एवैतादृशं परमविचक्षणं भजन् स्वयम् अपि निर्गुण एव भवेद् गुण प्रयोजन अभावात्। भगवांश्च तेनैव रूपेण प्रकट इति न भक्तः अपेक्षते नापि भगवान् प्रयच्छति इति अर्थः॥ द. उ. ३९, ५ ॥

१०११. केवलं यम् अनुगृह्णामि तं तु ततो अन्यत्र नीत्वा भक्तैः संयोज्य कृतार्थम् एव मुख्यं करोमि। न तत्र हरणादि प्रयासः। यस्य तु संबन्धिनः सर्वान् एव अनुगृह्णामि सर्वे उपकारित्वात् तस्य धनं हरिष्ये। तत्र अपि शनैः यदि अल्पे ह्रियमाणे विवेकः भवेत् तदा न हरिष्याम् इति ज्ञापयन्। अतः अधनं तस्य जनाः सम्बन्धिनः त्यजन्ति। अधनत्वे अपि समर्थः चेत् न त्यजन्ति तदीया दुःखिताः तेभ्यो अपि अयम् अत्यन्तं दुःखित इति तेभ्यः चेद् अन्नादिकम् वाञ्छति इति अर्थः॥ द. उ. ३९, ८ ॥

१०१२. यदा स त्यक्त बन्धुः तदा धनम् उपार्ज्य बन्धून् वशीकरिष्याम् इति निश्चित्य धनार्थम् यतते ततः तस्य धनवत् धनकारणम् अपि नाशयामि इति। तदा केवलधनेहया उपायरहितया क्लिष्टः सन् निर्विण्णो भवति विरक्तः भवति। तदा तदा योग्यं योग्येन संबध्यत इति यत् परैः कृतमैत्रो भवति। तदा मत् मत्त एव स्वत एव अहं अनुग्रहम् करिष्ये॥ ॥ द. उ. ३९, ९ ॥

१०१३. मम अनुग्रहः ब्रह्मभावः पश्चात् मत् सेवया सर्वं सुखम् इति। अत्र अयं क्रमः, प्रथमतः सेवकैः सहमैत्र्या सेवक समान शील व्यसनत्वे सेवक तुल्यता। ततः तैः मया अन्येन वा तस्य ज्ञान उदयः, ततः ज्ञानपूर्णः केवलं एव मां भजते। स्वयं न प्रयच्छति, स्थितम् अपि हरति।

अन्यथा मद् भक्ता नानाविधाः दुष्टाः शिष्टा अपि भवेयुः इति तद् व्यावृत्त्यर्थम् तथाकरणम् इति अर्थः ॥ द. उ. ३९, १० ॥

१०१४. स्मरन्ति एव न। अथ यदि प्रसादात् स्वयम् एव स्मृतिपथ आरूढा भवेयुः वरदान् तदा अपि अपज्ञानते। तस्माद् अग्रे अनर्थः पर्यवस्यति इति भगवान् प्रथमत एव निवर्तत इति अर्थः। आस्तां धनादिवार्ता शापप्रसादौ एव भगवान् न करोति आत्मत्वात्। दानवार्ता दूर इति ॥ द. उ. ३९, ११ ॥

१११५. अत्यन्त अपराधे अपि कृते भगवान् शापं न प्रयच्छति। अत्यन्त सेवायाम् वरम् अपि न प्रयच्छति। ॥ द. उ. ३९, १२ ॥

१११६. स शिवः अल्पाभ्याम् एव गुणदोषाभ्याम् अल्पेन गुणेन तुष्यति, अल्पेन अपि दोषेण कुप्यति। ॥ द. उ. ३९, १५ ॥

१११७. परदुःखं दृष्ट्वा यो दुःखितो भवति स कारुणिक इति। भगवांस्तु परमकारुणिकः दुःख उत्पत्ति संभावनायाम् अपि दुःखितो भवति। ॥ द. उ. ३९, १९ ॥

१११८. इदम् वैकुण्ठस्थानं बदर्याम् नारायण पर्वत पश्चिम भागस्थं प्रसिद्धम् एव। तत्र तस्यापि मूलवैकुण्ठ धर्म संबन्धम् आह ॥ द. उ. ३९, २५ ॥

१०१९. नित्य सिद्धा भगवति लक्ष्मीः आधिदैविकी। इयं च आधिभौतिकी सापि नित्या ॥ द. उ. ४०, १२ ॥

१०२०. फलरूपता तु साधारणानाम् अपि भक्त मुख श्रवणाद् एव भवति इति ॥ द. उ. ४०, २१ ॥

१०२१. एवं सर्व पुरुषार्थरूपाः स्त्रियः भगवद् अर्थम् निरूपिताः ॥ द. उ. ४१, २ ॥

१०२२. एकस्यां पङ्क्तौ एक जातीया एव विहगाः प्रविशन्ति इति ज्ञापितम्। अन्यथा विजातीय शब्द साङ्कर्ये कोलाहलः स्यात् ॥ द. उ. ४१, ४ ॥

१०२३. यावत्यः स्त्रियः तावन्ति रूपाणि कृत्वा रेमे। तासां कामना पूर्ति अर्थम् एव; तानि रूपाणि जातानि इति एकस्याः कामः अष्टगुणः अपि एकेन पूर्यते तद् अर्थम् एव प्राकट्यात् ॥ द. उ. ४१, ५ ॥

१०२४. गीतताल अनुसारेण ये नृत्यन्ति ते नटाः केवल नृत्येन रस अभिनयकर्त्र्यः नर्तक्यः। द. उ. ४१, १२॥

१०२५. अत एव सर्वासाम् भगवान् एव एकः पतिः इति। अतो या काचिद्

दुःखम् प्राप्नोति तत्र भगवद् विरह एव हेतुः। यद् अंगेषु समस्तेषु तापः अनिवृत्तिः एव वा । तद् एकत्र जनः स्थातुं न शक्नोति कथंचन । ईश्वरः लीलयापि सुप्तो बोधितुम् अशक्यः । क्रीडायाम् आसक्तः न कस्यापि सुखम् विचारयति ॥ द. उ. ४१, १५ ॥

१०२६. ततः दिनान्त सेवां कृत्वा यथा वयं दास्यः जाताः तथा इयम् अपि सेवा फलम् वाञ्छति तत् च फलम् प्रसाद् रूपम्, प्रसादः च स्वचरण समर्पित मालाम् चेत् प्रयच्छति तदा भगवान् सेवां स्वीकृतवान् इति निश्चित्य तां भक्तिरूपां मालां शिरसि स्थापयित्वा कृतार्थताम् आपद्यते ॥ द. उ. ४१, १६ ॥

१०२७. तव अपि न स्वास्थ्यम् मित्रं हि मित्रं तस्मिन् प्राप्ते दृष्टे, वा तस्य सुखम् । प्रेम्णा अंतःकरणे बद्धो विस्मर्तुम् अशक्य इतिः अर्थः । पुनः पुनः स्मरणम् च अति दुःखदम् । जगति च को अपि एतादृशो न दृश्यते यो भगवद् संबन्धं प्राप्य क्षणं वा स्वस्थो भवति ॥ द. उ. ४१, २० ॥

१०२८. तद् उच्चारिते वाक्यार्थो न अवगम्यत इति न तद् उच्चारितस्य वाच्यत्वम्, किन्तु भगवद् उक्तपदानि स्मारयन्ति इति साहाय्यात् पदत्वम्, तर्हि एतादृश वाण्याः एव उपयोग इति चेत् तत्र आहुः- मृत संजीविकया न या गिरेति । पूर्वम् भगवद् विरहेण मृतप्राया जाताः । यदि क्षणम् अयम् शब्दो न श्रुतः स्यात् तदा मृता एव भवाम इति। इयं वाणी मृत संजीविका । परम् त्वया एतादृशः शब्दः पुनः पुनः वाच्य इति अभिप्रायेण आहुः वल्गित कण्ठेति ॥ द.उ ४१,२१॥

१०२९. तस्य बुद्धिः एवं विचारयति किं नाम उच्चारणेन आश्रय मात्रमेव कृतार्थम् भविष्यति ॥ द. उ. ४१, २२ ॥

१०३०. सजातीयस्य सजातियो भर्ता भवति ॥ द. उ. ४१ २३ ॥

१०३१. स्वस्य च हितं भगवद् सम्बन्धाद् एव, स च सम्बन्धः मानवतीनां मानापनोदव्यतिरेकेण स्वतः न भवति । न हि सर्वदा को अपि कमपि स्मरति । सौहार्दे सति स्मरणं भगवांश्च चल सौहृदः । ननु सा परम भक्ता भगवद् एक परायणा कथं सह न गीयत इति चेत् तत्र आहुः सैवैकनिष्ठा स्त्रिय इति ॥ द. उ. ४१, २४ ॥

१०३२. भगवान् स्त्रीणाम् एव अर्थे प्रादुर्भूत इति उक्तम् । अतः तदर्थम् एव अवतारात् तत् कार्यम् आवश्यकम् इति संबन्ध मात्रम् अपेक्षते। तत्र श्रवणमात्रम् अति सुलभः सम्बन्धः इति स एव उक्तः। प्रमेय बलम् एव अत्र मुखम् इति स्वयम, प्रसह्य मनः आकर्षते, सर्वतः आकृष्य स्वस्मिन् एव स्थापयति इति अर्थः। उरुगायो भगवान् उरुगीतो याभिः। तेषाम् अपि मनः प्रसह्य आकर्षत इति अर्थः ॥ द. उ. ४१, २६ ॥

१०३३. साक्षाद् देह संबन्धः सर्वभावेन यासां तत्र अपि प्रेम्णेति आन्तरः सम्बन्धः। पाद संवाहनादिभिः इति बाह्यः ॥ द. उ. ४१, २७॥

१०३४. यतः तेषां प्रभुः जातो भगवान् अतः ज्ञायते ते देवा इति। न हि अन्येषां भगवान् प्रभुः भवति प्रभु-सेवकयोः सजातीयत्व अपेक्षणात्। अत एव ते सर्वे सपरिकराः निरोधे निरूपिताः ॥ द. उ. ४१, ४५ ॥

१०३५. तस्मात् कृष्ण अवतारे यः कश्चन धर्मः मोक्षं दास्यति इति निरूपितम्। अतः स्वामिसेवकेभ्य एव दास्यति न अन्येभ्य इति आनायासेन अपि ऐहिक सिद्धिः ॥ द. उ. ४१, ४७॥

१. भगवद् अनुग्रह व्यतिरेकेण भगवद् वाक्ये श्रध्धा न भवति इति। १०-३-१

२. सर्वे हि दोषाः भूमौभवंति न स्वर्गे नापि पाताले । १०-२-४८

३. आत्मातुत्वदीय एव इन्द्रियाणि चेद् अन्य पराणि भवेयुः । १०-३-३६

४. एवं प्रेमकला बध्धा नानाविध स्नेह प्रकारैः वशीकृताः वंदति। १०-४-३८

५. आत्मा तु देहस्य हितं एव वांछंति। १०-५-४५

६. महान् अपि भक्तो अपि विषयासंगात् प्राकृतो जातः । अत स्तत् संबंधात् तदीया अपि प्राकृता एव जाताः । २०-०७-२०

७. न हि सर्वेषां एव जीवानां समान कर्मणा समान फलं उपलभ्यते। १०-३०-३५

८. यथा भगवान पूजितः एव भगवद् भक्ताः अपि पूजिताः ।१०-९-६

९. मूढा अपि वैष्णवा एव विष्णुगतिं जानंति। न तु अत्यंत निपुणा अपि अवैष्णवाः । १०-२७-४०

१०. पूर्वम् तासां भगवद् स्पर्श एव स्थितं न तु भगवता ताः स्पृष्टा इति।१०-३०-२३

११. प्रकाशनार्थम् आगतो दीपः गृहेण स्पष्टः

चेत् दहयेव । १०-३०-३०

१२. न हि वणिजाम् इव प्रभो: नियमो अस्ति सर्वकर्मसु । १०-३०-३०

१३. अनेन यमुनाया: तस्याश्च भेद: प्रद्यार्शित: । पर्वत भावापन्न आदि धर्म आधिदैविकी कालिंदी इति एव नामना विश्रुता । उत्पन्नातु यमम् उपाद्य पश्चात् तद् दोष परिहारार्थ यमुत्वादितवान् । उभयो: एकयात् आधिदैविका आधिभोतिक वालोके अमेदेन प्रयोग: । न अपि तपवत् ज्ञापात् नदीत्वं । पूर्वम् एव नदीरूपस्य विद्यमानत्वात् । १०-९-२२

१४. भगवद् कार्य व्यतिरेकेणैव भगवद् अवयवैरेव सर्वे मनोरथा पूरिता:। १०-३०-१

१५. तदा हि इक्षुरसवद् भक्तिरसवद् कामरस: उत्पद्यते । १०-३०-२

१६. गोपिकानां रस योग्यताम् आह । ननु अयं रस: अलौकिक: न लौकिकेपु उत्पद्यते अतो व्यर्थ आरंभ: । न हि सिकता समूहात् तैलम् उत्पद्यत इति। १०-३०-२

१७. एक रसत्वाय च मेलनं । अनेन रसप्रकटनार्थम् शुल्कदासिका भगवते दत्ता । ननु एते जीवा: भगवद् आनंदमय कथम् वैषम्याद रस्ते उत्पत्ति चेत् तत्रा प्रीतिरिति। १०-३०-२

१८. औषध हि रोग निवृत्ते न पुरूप व्यापारम् अपेक्षते, अन्त: प्रवेशना अतिरिक्तं । अत्र च अन्त: प्रवेश: श्रवणद्वारा । १०-१-३

१९. तृष्णा भावेन धन अर्पण दोष: । १०-१-३

२०. भक्तानां भगवद समिपगमनं निवेदनार्थम् स्तोत्रं ततो भगवद् वाक्य निवेदनं शब्दत: ।१०-१-१३

२१. न हि भगवद् भक्तानां अन्य निष्ठा अपि उचिता । १०-१-६१

२२. सर्वथा रोग अभावस्तु भगवत् सान्निध्यात् इति । १०-५-२६

२३. कृपयैव स्मरणमिति । १०-१५-२८

२४. यो भगवद् धर्मान् प्रतिक्षते तस्य न अन्ये धर्मा बाधका भवन्ति । १०-१५-२५

२५. महाभाग्य व्यतिरेकेण कथं भगवत् समिप गमनं । महाभाग्येति प्रातिवृत्येन तद् भाग्यम् प्रादुर्भूतम् पश्यंति । १०-३१-१०

२६. अत: सर्वलोक हितार्थम् परिभ्रमणम् इति अर्थ: । १०-२१-३५

२७. तत्र ये भगवद योग्याः तेषां भगवदीय सामग्री तत्रैव वागादि व्यवहारः ।१०-३१-३

२८. ब्रह्मसंबंध योग्यताम् एव संपादयति न जीवसंबंधम् इति । १०-३१-६

२९. प्रेम तु सिद्धार्थमेव मत् सन्निधौ समायाति । तस्या देहो न अन्यार्थम् एव विनिर्युक्त इति लिंग शरीरम् च तनैव । १०-३२-३

३०. स्वकीयं उपाधिरूपम् लिंग शरीरम् परित्यज्य तम एव अध्यगन् भगवद्रूपा जाताः । यथा भगवान तेन अंतः पूर्णो भगवान एव जातः । १०-३३-४७

३१. पीत रोपम् गदाभृत इति । पानं तु पूर्वम् स्थापितम् । यदैव भगवतं स्मरति तदा अमृतं भगवान एव पिवति इति । १०-३६-५५

३२. भगवद् उच्छिष्ट पानं अमृतपानं । १०-३६-५५

३३. भगवद् संबंधे तस्य षडगुणा निरूपिताः । १०-३७-१३

३४. विचार व्यतिरेकेन उच्चारण मात्रेण भगवान हृदयारूढे भवति ।

३५. जगत् पक्षे अपि भगवद् सेवकः यत्र कचिद् अपि सेवमानो वैकुंठे एव सेवते न तु जगति । इति ज्ञातव्यं । १०-३८-३४

३६. पिवंतो अक्षैरिति । मुखाम्बुजम् सुधां पिवंत । १०-४२-१९

३७. ननु अस्माकं पक्षिणाम् नित्यं क्षुधितानां तन् निवृत्यर्थम् उपायः कर्तव्यः । पियपय इति । १०-४१-२४

३८. यथा पान समये जलम् अन्तर वहि व्याप्तम् तिष्ठति तथा भगवान जात इत्यर्थः । १०-४०-२१

३९. लीलया कस्यापि संतोषो न जात इति । लोकानां प्रीति अर्थम् तथा कृतवन्तौ । १०-४१-२८

४०. भगवदीय शरीर उत्पत्ति अर्थम् पिचकर्ष यत्र यत्र अंतिरेणवः तत्र संबंधम् कृतवान् । १०-४१-३९

४१. एवं जगद् रूपेण भगवान् क्रिडितं सर्वत्र अनुप्रविष्टः तद् तद्रूपेण जाता । १०-३८-१९

४२. रसस्तु अनुभवगम्यः । १०-३८-१९

४३. आनन्दाधर्म् एव जीवस्य प्रवृत्तिः आनंदश्च भगवति एव अस्ति न अन्यत्र ।१०-३८-२०

४४. यथा लोके एकाकी यथा रस अनुभवं करोति तद अपेक्षया सर्वै योग्यैः

सहरसानुभवःसुखाधिक्य हेतुः भवति । १०-३८-२०

४५. मोक्ष अपेक्षया अपि भगवद् कथा श्रवणा रस अधिको निरूपितः । १०-३८-२६

४६. जीवस्य च भगवत्वे काम क्रोध आदि सर्वे दोषाः भगवति भवंति । १०-३८-२६

४७. मनसे एव ते दोषाः न तु जीवस्य । १०-३८-२६

४८. सेवा मात्रेणैव मृत्यो : जयो भवति । १०-३८-३७

४९. गीरा भगवान् वध्नाति । साक्षात् तु बंधनं तत् सेवका एव कुर्वन्ति ।१०-३८-३७

५०. तान् भगवद् सेवायां योजयंति । अतः सेवां प्राण्य कृतार्था एव भविष्यति इतिन तेषां मनः क्लेशः। १०-३८-२७

५१. स च गुरूः भगवान् एव । भगवान एव वा गुरूः । १०-३८-१९

५२. योगिनो अपि संसार एव परिभ्रमन्ति न कृतार्था भवंति इति निरूप्यन्ते । १०-३८-३३

५३. ननु यागमार्गः कथं कृत इति चेद उच्यते । अणिमादि सुखार्थम् एव । अत्यंतम् वहिर्मुखाः केलशमार्ग रताये च तदर्थम् योग उच्यते । १०-३८-३३

५४. परंपरा साधन वा फलार्थम् वा निरूपिताः । योग साक्षात् न मोक्षाय निषेधात् व्यास सूत्रताः । १०-३८-३३

५५. उत्पन्नस्य प्राणीनो विक्षिप्त मनसः प्रतिक्षणे अनेकानि व्यसनानि भवंति । अदौ व्यसन अपगमे गुरूः एव एक साधनं । १०-३८-३३

५६. ननु विषयांश्चेद भगवान् अपि दद्यात तदा उपस्थित परित्यागे किं कारणम् इति चेत् तत्र आह । सर्वरस इति । सर्वे रसः कीर्त्यादयो भगवति एव भवंति । एते च रसाः प्रकटा एव न तु मधुनिका व्यक्ताः । १०-३८-३४

५७. मनोदोषेण जगद अन्यथा प्रतीयत इति । अन्यथा जगत् सच्चिदानंदरूपेण कथं न भासते । १०-३८-३६

५८. इदं जगत् सर्वम् वितथमेव मिथ्याभूतम् एव । वितथ मनो विलापम् इति । १०-३८-३७

५९. स्पष्ट एव भगवद संबंध एव सुखं न अन्यथेति स्पष्टम् । १०-३८-४०

६०. सर्वे इन्द्रिय निरोधन सर्व आहार परिवर्जनेन वाक्यादि निरोधे विहिते शरीरे संताप जननात् तपो भवति । परम उत्कृष्टम् भगवद् विषयकत्वाद्

एवं तस्मिन् जन्मनि कार्यम् उक्तम् । १०-१३-३२

६१. आत्मानां जीवीनाम् अनुसासनम् उपदेशः । भगवान एव सेव्य इति च । १०-३८-४३

६२. तस्मात् भगवद् सेवा एव परम पुरूषार्थरूप इति । १०-३९-१३

६३. इदं वैकुंठ स्थानम् बदर्याम् नारायण पर्वत पश्चिम भागस्थं प्रसिद्धमेव । १०-३९-२५

६४. तत्र तस्यापि मूल वैकुंठधर्म संवंधम् आह । तद् किम् वैकुंठ स्थानम् इति आकांक्षायाम् आह यत्र नारायणः साक्षाद् इति । नारायणो बदरिनाथः । १०-३९-२६

६५. द्वादशविंध आलिंगनानि अष्ट विधानिवा । १०-४१-१३

६६. भगवद् व्यतिरिक्तं सर्वम् जगत् स्त्रीरूपम् एव इति । अस्मत् दुःखं भगवते निवेदयंति इति चेत् तत्राहुः । तथा इयं अपि सेवा फलं वांछति । तद्दच फलं प्रसादरूपं । प्रसादश्च स्वचरण समर्पित मालाचेत् प्रयच्छति । तथा भगवान् सेवाम् स्वीकृतवान् इति निश्चित्य तांभक्तिरूपां माला शिरसि स्थापयित्वा कृतार्थतां आपद्यते । १०-४१-१५

६७. प्रेम वध्ध इति । प्रेम्ला अन्तःकरणे वध्धो विस्मर्तुम् अशक्य इति अर्थः । १०-४१-२०

६८. जगति च कोपि एतादशो न दश्यते या भगवद् संबंधम् प्राप्य क्षणंवा स्वस्थो भवति । १०-४१-२०

६९. भगवद् उक्ता पदानि स्मारयन्ति इति सादश्यात् पदत्वं । तर्हि : एतादश वाण्याः क्व उपयोग इति चेत् तत्राहुः मृत संजीविकया नया गिरेति । इयं वाणी मृत संजीवकि। १०-४१-२२

७०. ननु अस्माकं प्रक्षिणां नित्यम् क्षुधितानां तान् निवृत्यर्थम् उपाय कर्तव्यः ।तत्राहु पिवपय इति । १०-४१-२४

७१. चल सौहृद इति । न हि को अपि सर्वदा कमपि स्मरति । सौहार्दे सति स्मरणम् भगवान् च चलसौहृदः । सर्वथा स्मरति समागंतव्य इति ।१०-४१-२४

७२. साक्षात् देह संवंधः सर्वभावे न यासां तत्रापि प्रेम्णेति आंतर संवंधः । १०-४१-२७

७३. भक्ति मार्गे भक्तेन कृता इति भगवता कृता इति । १०-३६-१

७४. अहं त्वां सर्वपापेभ्योः मोक्षयिष्यामि इति

प्रमेयबलम् एव उक्तवान्। १०-३६-२२

७५. भगवदीय शरीरं तेनैव भवति इति । भगवदीयत्वेन परिसमाप्त सर्व अर्थाः इति । १०-३४-४३

७६. प्रणयः स्नेह एव अनुबंधो यासां । भगवद् पत्निनाम् तु विवाहदिरूपा बाह्य अपि संबंधो अस्ति अस्माकंतु साक्षात् संबंधः प्रमेय एव । १०-३५-१

७७. भगवश्च देवा इति एते सर्वे भगवद् बुध्या पूजिताः । पापक्षयमेव कुर्वन्ति न तु अधिकं । १०-३५-१२

७८. भगवद् गुणा अपि भगवन एवेति ।१०-३६-३६

७९. जलस्य देवत्व श्रुयते गंगात्वम् । १०-३६-८

८०. अनुभव एव ब्रह्मणः स्मृतिः जीवस्य । इन्दियद्धारा अनुभवस्तु कृत्रिमः । अत एवं इन्द्रियद्धारा नयतो अनुभवः आत्मार्थम् संस्कारमेव जनयति । १०३६-१०

८१. एवं पुरूषार्थ साधनीभूतम् दुर्लभं शरीरं प्राप्य स्वार्थे ज्ञाने भक्तौ यः प्रमतः विध्नैः अत्र अन्तः उभय विरोधि वशं गत इत्यर्थः । १०-३६-१६

८२. आकाशे हि सर्व वस्तुभिः स्व आकारम् करोति धटवत् पटवत् पुरूपवतुश्चेति । १०-३६-२०

८३. पानं तु पूर्वम् स्थापितम् । ददैव भगवंतं स्मरति तदा अमृतम् भगवान एव पिबंतिति । १०-३६-२०

८७. यथा भूतो उपासकाः भूत सायुज्यं प्राप्नुवंति । १०-३७-१० चरनोदक प्राप्तैव सर्वे मनोरथः प्राप्ता इति । १०-३७-४०

८८. ननु एकस्य सर्वत्र कथम् अनुप्रवेशः संभवंति । सूर्यकिरणवद् अनुप्रवेशो वाकथम् अन्या अन्यात् संभवंति । सूर्यकिरण वद् अनुप्रवेशो कथम् अन्यो अन्यन् अनुसंधानं ।१०-३७-४४

८९. सर्वदा भगवद नामः उच्चारणं कर्तव्यम् इति। १०-३७-४६

९०. रूपस्य दष्टि शेधकम् नाम्नो अन्तःकरण शोधकत्वम् इति निर्णयः।१०-३७-४६

९१. कर्म विक्षेपे तु शक्तिनाम् अन्यत्र विनियोगात् भगवद दर्शनम् बाधितम् इति अर्थः ।१०-३७-४७

९२. एक एव भगवान् नित्यम् अनित्यम् च जगद् रूपम् शरीरम् गृहणाति । कालादयो नित्यः धरादयो अनित्या

इति उभयम् अपि भगवद् शरीरम् । १०-३७-४८

९३. प्रमेय बलं मया क क प्रकटी कर्तव्यम् । १०-३७-५४

९४. तत्रापि मद् इक्षया ममा इक्षा भगवद साक्षात्कारः भगवंतं स्थाप यित्वा भगवद् रूपाणि अपि स्थापयति । आदौ मद् साक्षात्कारे जात स्व आत्मनि यत् मां पश्यत्ति। १०-३७-५६

९५. लौकिक भाषायाम् अश्लील वचनं न दोषाया । १०-६-३१

९६. नित्यम् च आत्मानम् बुध्या मारयति इति मर्त्यपदेन वध दोषोपि सुचितः । १०-२-४८

९७. भगवान् न अन्यत्र रमते भक्तौ यथा रमत इति सर्वेभ्यो विशेष उक्तः। १०-९-५५

९८. एवं रमणे भक्तकृपा एव हेतु रिति आह । १०-९-५५

९९. अन्येषु अवतारेषु अवतार प्रयोजन मात्रं करोति न अधिकं। १०-१०-१

१००. स्मितमेव सुधा महादेवेने दग्धम् अपि कामं जीवयति इति । १०-११-९

१०१. प्रेमैव बंधन इति । भगवत् प्रेमणैव सा बध्धा तिष्ठति तद् अभावे ज्ञात एव पतितेति । १०-११-२३

१०२. प्रियायाः प्रेमबंधनं इति सापि भगवतः प्रिया भक्तत्वात् । १०-११-२४

१०३. परिहासार्थम् एव गाली उत्पन्नाः तादशया सह रसो उत्पत्ति अर्थम् वक्त व्यय् इति । १०-११-१९

१०४. प्रेमरस त्रिविधो भवति । सात्विक राजस तामसश्च । सात्विकः तत्र पुत्रादि साधारणः । १०-११-१९ राजस स्त्रियाम् एव धर्म सहितः । तापस स्तु जार एव भवति । सहजः स्वभाव कदाचिद् अत्र दष्टव्य इति तद् उत्पानार्थम् वचनं प्रेम्णायः क्रोधसंरंभः । १०-११-३०

१०५. वरदान सामर्थ्यम् भगवद् शब्देन उक्तं । १०-१३-५

१०६. कालो अपि नदीरूपः भगवंतं जीव समुद्रं च ।

१०७. स्मरणं सहितः स्नेहः। प्रवेशनं च भोजनं । १०-३२-४

१०८. अवसुध्यमिति तंदुला आश्रितेव भक्तिः आगता । अतो भक्तिसह भावः पदार्थानाम् निरूपते । १०-३२-३

१०९. बहिर्मुखाः मृत्युमेव प्राप्नुवंति । अन्तर्मुखा स्तु अमृतमेव । एवम् एव भगवद् कथायाम् परस्पर अर्चनम् शास्त्र

सिद्धं । १०-१-१४

११०. दुःकर्म करणात् आयुः क्षयेणेव । १०-१-२१

१११. स लावण्यरसः केवलं भगवति एव सिद्धः । अत तादश अमृतपानं तपसाविना न भवति इति अवश्यम् तपः स्तासु सिद्धं । किच दगभिः पिवंति दूराद् अपि पातुं शक्यते । दशा तत्रापि नानाविधैः कटाक्षैः अलसवलितादित्रिः पानम् अनेन सर्वोपि रमणप्रकार स्तासां सूचितः चर्वित चर्पणत व्यावृत्यर्थम् आहु :। अनुसवं प्रतिक्षणं नूतनमेव भवति । पूर्व अनुभूत रसाद उत्कृष्टं नापि तत् सर्व सुलभम् इति आह दुरादअपि सर्वेषां एव दुःखेन अपि प्राप्तम् । १०-४१-१४

११२. वेणुनादं करोति तेन तद् भावाः सर्व भगवद् विषयका आविर्भवन्ति अन्येतु तिरोभवंति । सस्मितं मुखं पश्यंति आन्तरू आनन्दम् आविर्भावाद ताद्दशः प्रेमानंदमेव प्रयच्छति । मोक्षाद अपि अधिक फलत्वम् उक्तं । १०-४१-१६

११३. यतो भगवान् दयया पश्यति कृतार्थ एताः कर्तव्या इति दयया दोष निवृत्तिः अवलोकनेन सर्वस्य दानं इति द्वयम् उक्तम् । १०-४१-१६

११४. वार्धकये वहिः शरीर कांति अन्तरवलम् च गच्छति । अलौकिक समर्थ्यात् पिवंतो अक्षैः इति । मुखांवुजम् सुधां पिवंत एव तथा जाताः । १०-४१-१४

११५. भगवान एव भगवतः सखा भवति । ब्रह्मसंवंध योग्यतामेव संपादयति न जीव संवंधमिति । १०-३१-६

११६. प्रेम अन्तः करण धर्मः । प्रेम्ला समानितम् रदयानितम् भवति । १०-३२-३

११७. प्रेम तु साधारणमेव मत् सन्निध्यो सामयाति । तस्य देह अन्यार्थम् एव विनियुक्त इति लिंग शरीरम् च तेनैव अवयवम् इति तंदुलादि आश्रितैव भक्ति अत्र आगत्यम् । १०-३२-३

११८. तत् प्राप्य पश्चात् सेवारसम् अनुभूयत तत् परित्यागो न उपपद्यते । १०-११-३५

११९. अन्तः प्रवेशनं च भोजनम् । १०-३२-४

१२०. न हि भगवदीयान् भगवांन् त्यज्यति त्यक्ताश्च न भगवदीयाः।१०-४४-१२

१२१. भगवान् अनुग्रह व्यतिरेकेण भगवद् वाक्ये श्रद्धा न भवति । १०-३-१

१२२. देश दोषेण नष्ट मतिः । १०-३-९

१२३. दर्पस्तु भगवदीय : । १०-११-३०

१२४. सेवया इश्वरः परितुष्यति।१०-११-७

१२५. प्रेमैव बंधनं इति भगवत् प्रेम्णैव सा बध्धा निष्ठति । १०-११-२५

१२६. कर्माणि हि इषणद्वारैव वन्धन्ति । १०-३५-३८

१२७. रसस्तु अनुभव गम्य: । १०-३८-१९

१२८. भगवान एव भगवतः सखा भवति । ब्रह्म संवंध योग्यतामेव संपादयति न जीव संवंधमिति । १०-३८-१९

१२९. भयम् हि जडस्य भवति। १०-११-३०

१३०. सर्वथा स्नेहभग्ने भक्तिमार्गो नश्यति। १०-१२-३९

१३१. प्रेमकलावद्धा नानाविध स्नेह प्रकारैः वशीकृता वदंति। १०-४-३८

१३२. जीवस्य च भगवत्वेकाम क्रोधादि सर्वे दोषाः भगवति भवंति । १०-३८-२६

१३३. कर्म कुर्वाणा फल प्राप्नुवन्ति दातारं तु न पश्यन्तिति । १०-३८-२५

१३४. आनन्दार्थम् एव जीवस्य प्रवृत्तिः । आनन्दश्च भगवति एव अस्ति न अन्यत्र ।१०-३८-२०

१३५. वितथ मनो विलासमिति।१०-३८-३७

१३६. स्पष्ट एव भगवद् संबंध एव सुखं न अन्यथापि स्पष्टाम् । १०-३८-४०

१३७. सामग्री भेदात् कर्माणि सर्वत्र विलक्षणानि भवंति । १०-२७-२७

१३८. सर्व देवतात्मको भगवान इति वक्तुम सर्व अवयवाः देवतात्वेन निरूप्यन्ते । यो अग्निः स ते मुखम् । या अवनिः भूमिः ते आंधि : । य : सूर्यः स ते इक्षणम् चक्षुः नमस्तु आकाशः । १०-३७-१३

१३९. नित्यम् च आत्मानम् वुद्धि मारयति इति । १०-२-४८

१४०. प्रेम अन्तःकरण धर्मः । प्रेम्ला सम्मानितम् रदयानीतं भवति । प्रेम तु असीधारम् एव मत् संन्निधौ समायाति स्याद देहो अन्या धर्म् विनियुक्त इति लींग शरीरम् च तेनैव अवरूध्येत् इति तंदुला आश्रितैव भक्तिः अत्र आगताः । अतो भक्ति सहभावः पदार्थानाम् निरूप्यते । १०-३२-३

१४१. स्तनपान अनंतरं तेषाम् विवेकादि उत्पत्या स्व लोकगतिम् आह । पित्वा अमृतम् इति पानं तु पूर्वम् स्थापितम् । यदैव भगवतं स्मरति तदा अमृतम् भगवान एव पिवतिति । भगवद् अच्छिष्टं पानम् अमृतपानाम् । १०-३६-५५

१४२. स हि गोपिका द्वारा कृष्णे समागतः। ते हि प्रथमं पुरूपरूपा : स्थिताः पश्चाद स्त्रित्वे जाते तत्र प्रवेशम् अलभमानः तद द्वारा भगवति प्रविष्टः तासां स्वभावतः पुरूपत्वात् तत् उत्पत्तिम् अलभमानः। १०-३६-१

१४३. देवांतर प्रसाद अपेक्षया भगवद् अपराधो महान इति। १०-७-३९

१४४. भगवद् प्रसादे हि भगवान एव प्राप्स्येत। १०-९-३७

१४५. सर्वेपु एव देहेपु यथा भगवद् संबंधो भवति तदर्थम् भृग्यम् एव। १०-९-३७

१४६. ननु सर्वेपु अवतारेपु अवतार धर्मा प्रवर्तन्ते। १०-२८-३०

१४७. मनोरथ एव महान अर्णवः। १०-२६-२९

१४८. फलम् भगवद् अनुभवः साधनत्वेन मन्यते। तथा सर्व एव भगवद् संबंधि पदार्थ : इदं रहस्य सर्वदेव भगवदीयाः अनुसंधेयम्। १०-२७-१

१४९. क्रीडार्थम् नर शरीरम् अंगीकृतम्। १०-२७-१

१५०. शब्दो अपि पंचमो विपयो निरूपितः। १०-२४-२७

१५१. भगवद् ध्यानेन भगवद्रूपो भूत्वा भगवति सायुज्यम् प्राप्तवान्। १०-२५-४८

१५२. अनेन असिधारामृतम् कृतम् इति अन्यत्र प्रसिद्धम्। सर्वा अलंकारोपेता भार्यै एक शयने यदा शेते संवत्सरम् पुर्णम् स्वयम् पुष्ट स्तथाविधः। मनसापि न तां वाच्छेत् स्पृशन्नपि शिलामिव असिधारावृतम् इदम् विष्णु प्रीतिकरम् भहद् इति। १०-

१५३. कालो अपि नदीरूपः भगवतम् जीव समूहम् च आंतरा प्रवहति विषयमाया जलात्मा। नत्र तीर स्थान् कदाचिद् मध्ये पातचित्वा उत्तर कुले नयेत् अनेन कालवशाद अपि मोक्षः सिध्यति। स संबंधो अनेकारित इति। १०-३५-७

१५४. हरिरिति सर्वदुःख हर्ता संबंध मात्रम् अपेक्षते। १०-३५-६

१५५. लोके जीवानाम् परसपरम् पंच संबंधा भवंति। १०-३५-२२

१५६. दैत्य अंशानाम् द्विष्टा नाम् साक्षात् मोक्षो नास्ति इति निरोधरूप एव मोक्षो निरूप्यते। १०-१७-१

१५७. दैत्य अंशानाम् द्विष्टानां साक्षात् मोक्षो नास्ति इति। निरोधरूप एव मोक्षो निरूप्यते। १०-उ-१७-१

१५८. भगवद् परिपालितानां रसो भगवदतैव भोक्तव्या इति । १०-७३-३४

१५९. अतः मन् सेवा रूचिः भगवद् स्वरूप ज्ञानेच्छा । भगवद् शास्त्र परत्वं च अंतिम जन्म ज्ञापक । १०-३७-२८

१६०. रसं आत्म स्वरूपम् । १०-३९-१

१६१. एवं जन्मादयोपि देहधर्माः यतो विक्रियाः । १०-उ-५-४६

१६२. भगवतो वीर्यम् अत्र कियाशक्तिः न तु अन्नमयम् । १०-उ-६-६९

१६३ भक्तिमार्ग अनुसारिणि साधन शक्तिः । पुष्टिमार्ग अनुसारिणि फल शक्तिः इति सिद्धम् । १०-उ-१९-१५

१६४. दैत्य अंशानां क्लिष्टानां साक्षात् मोक्षो नास्ति इति निराधस्य एव मोक्ष निरूप्यते । १०-उ-१७-१

१६५. मदीयानां ज्ञापो न भवति । १०-उ-१५-४१

१६६. अमृते मथने उत्पन्न सा आधिष्ठाता देवता सर्व वृक्षेपु तिष्ठति सा दैत्य राजा अधिना तत एव मधुधारा । १०-उ-१७-१८

१६७. सर्वेपु देहेसु यदा भगवद संबंधो भवति तदर्थम् गृग्यमेव । १०-उ-९-३७

१६८. अहं त्वां सर्व पापेभ्यो मोक्षयिष्यामि इति प्रमेय बलम् उक्तवान । १०-३६-२१

१६९. सर्वथा आज्ञा उलंधने महान्तं व्याध्यादिकम् उत्पाददति । अपराधे विद्यमाने साधने रपि मोक्षो दुर्लभ इति । १०-२१-२६

१७०. अतः सत् सेवा रूचिः भगवद् स्वरूप ज्ञानेच्छा भगवद् शास्त्र परत्वम् च अंतिम जन्म ज्ञापकः । १०-३७-२८

१७१. भगवदो वीर्यम् अत्र क्रिया शक्तिः न तु अन्नमयम् । लौकीक भापायाम् अस्लिल वचनं न दोपाय । १०-उ-६-३९

१७२. स एव सख्यम् प्राप्नोति यस्य अन्य प्रवृत्ति जन्मान्तरेपु वा भगवति एव चित्तं भवति । १०-उ-३४-१७

१७३. स्तोत्रेण सर्वेपां अपराधाः परिहृताः । १०-उ-१०-३१

१७४. तेपा गर्व लक्षण सन्निपात निवृत्त्यर्थम् त्वम् आनीतेति अहं तेजो हरण दोपाय तासां उद्धारार्थम् आगतः कथं वारयेत्। प्रेमे च वंधनम् इति। सर्वस्तु भगवदीयतया दृष्टिश्च सात्विकी तदैव

रसाला तदेव मंत्र मुग्ध रसालाः ।
१०-उ-११-३१

१७५. मत् संबंधित सर्व एव सकामा निःष्कामाश्च व्यवहाराः निःष्कामा एव सिद्धवर अनुवादेन अयं सोचतः । १०-उ-११-५०

१७६. जीवस्य च भगवत्वे काम क्रोधादि सर्वे दोषः भगवति भवंति। १०-उ-३८-२६

१७७. आनंदार्थम् एव जीवस्य प्रवृतिः । आनंदश्च भगवति एव अस्ति न अन्यत्र । १०-उ-३८-२०

१७८. भगवत् स्पर्शात् विष्णुः तेजो दैत्य नाशकं । १०-उ-२३-१२

१७९. प्रत्येकं भगवता तेन समार्वतम् सर्वत्र ब्रह्म दृष्टिनां कः परः शत्रु सर्वस्यैव आत्मात्वात् । १०-उ-२३-१९

१८०. चक्षुपादि रूपलावण्यामृतं पीयते दर्शनम् वहिस्थितावेव पानम् अंतः प्रवेशनम् इति विशेषः । १०-उ-२४-४

१८१. शब्दोऽपि पचयो विषयो निरूपितः । १०-उ-१४-१०

१८२. अत्यंत स्नेह एव नित्य संस्मरणमिति सिद्धांत : । १०-उ-१४-१०

१८३. सरवे अवतारेषु अवतार धर्म : प्रवर्तते । १०-उ-१८-३०

१८४. ब्रह्म विचरण सेवया उत्पन्ना भगवदचरण सेवाया पुष्टा भवन्ति । १०-उ-२८-३२

१८५. अतः प्रवेशनम् च भोजनम् ।

१०-उ-३२-४

१८६. जीवधर्म अपेक्षाया भगवद धर्मा उत्कृष्टा इति जीव धर्मा परित्यज्य भगवद् भाव प्राप्त इत्यर्थः । १०-उ-३३-३९

१८७. मदीयानां ज्ञापो न भवति । १०-उ-१९-४१

१८८. प्रत्येकं भगवता तेजः समर्पितम् । १०-उ-२३-१२

१८९. शब्दो अपि पंचमो विषयो निरूपितः । १०-उ-२४-१७

१९०. भगवद भक्तानां कायवांग मनोभिः द्रवं ग्रहीतः रसात्मकत्वात् भक्तानां आनंदेरूपे स्रवति । स भक्तिरस इति उच्यते । १०-उ-३४-३

१९१. दर्शन रसान् अनअविज्ञो जउ एवेति । १०-उ-३३-३९

१९२. अत्यंतं स्नेह एव नित्यं संस्मरणमिति

सिद्धांतः । १०-उ-२४-१८

१९३. स एव सख्यं प्राप्नोति यस्य जन्म प्रवृत्ति जन्मातरेषु वा भगवति एव चित्तं भवति । १०-उ-३४-१७

१९४. आनंदार्थम् एव जीवस्य प्रवृतिः आनंदश्च भगवति एव अस्ति न अन्यत्र । १०-उ-३८-२०

१९५. जीवस्य भगवत्वे काम क्रोधादि सर्वे दोषाः भगवति भवंति । १०-उ-३८-२६

*****

एकादश

१०३६. अधिकारश्च मार्गश्च न ईश्वरेण विचार्यंते। अन्तः स्थितं यदा ब्रह्म तदा योग उदार्यते । रूपप्रपञ्चे न आलोचना अपेक्षा, नाम्नि तु विशेष-माह ताः स्मरताम् इति। यदि एके-नैवच्छेदनं कुर्यात् नाम प्रपञ्चात् छेदनं न भवेत् सजातीय प्रती-तिजननात् ॥ ११, १, ७॥

१०३७. साक्षाद् उपयोग पर्यन्तम् हि विनियोगः वक्तव्यः॥११, १,२२॥

१०३८. आवेशे गते तु पश्चात्तापो व्याधस्य ॥ ११, १, २३ ॥

१०३९. गुरोः केवल वाक्यात् शास्त्रीयं प्रमाजनकम् इति सिद्धम् ॥ ११, २, १४ ॥

१०४०. प्राप्तः निधिः अज्ञानाद् अश-क्त्या च गच्छेद् इति अज्ञानं। ॥ ११ २, २१ ॥

१०४१. मानुष देहो नौकावत् साधनं परं सन्तो नाविका इव यदि भवन्ति तदा फलम् सिध्यति । चतुर-शीति लक्षयोनिषु एका मनुष्य योनिः इति । मानुष देह प्राप्तिः स्वस्य दुर्लभा, दुर्लभेपि दुर्लभा-भगवद् प्रियप्राप्तिः तद् अभावे प्राप्तापि व्यर्थ अनर्थ हेतुः च इति । लब्धो हि दुर्लभो देहः संगश्च स ये न उपायेन निरयो भवेव

स वक्तव्य इति अर्थः। स्वव्यतिरिक्तानि क्षुद्राणि फलानि दातुम् न बहुकाल स्थितिः अपेक्ष्यते, निधिप्राप्तौ दारिद्र्यमिव ज्ञानदानेन संसार दुःख निवृत्तिः इति अर्थः ॥ ११, २, ३० ॥

१०४२. समस्तैः भगवतैव च प्रोक्ता 'मन्मना भवे'ति ते भागवताः ॥ ११, २, ३४ ॥

१०४३. त्वरायां साधन परित्यागे शास्त्र-गुरु उल्लङ्घने फलविलम्बः फलभावो वा न भवति इति अर्थः ॥ ११, २, ३५ ॥

१०४४. आत्मनिवेदन एव सर्वस्य समर्पणेपि पूर्वस्वभाव अनुवृत्त्या भगवन्तम् आत्मनिवेदनं च विस्मृत्य लौकिक कर्तृत्वेन करोति तस्यैव समर्पणम् इति विशेषः। विहित निषिद्धानां लौकिक अलौकिकानां च कृतानि तुभ्यं समर्पयामि इति न किन्तु तुल्यमेव कृतानीति स्वभावात् भिन्नतया कृतम् अपि इति एवं समर्पयेव॥ ११,२,३६॥

१०४५. परिभ्रमणदशायां यत्रैव भगवद् कथा तद् श्रुत्वा निर्लज्जो लौकिक गीतानि गायन् न सङ्गो विचरेद् इति अर्थः॥ ११, २, ३९ ॥.

१०४.६ सर्व कर्मसु मङ्गलाचरणम् इव अनुवृत्त्या अच्युत अङ्घ्रि भजनम् जगन्नाथ आदि स्थानेषु मध्ये मध्ये कर्तव्यम् ॥ ११, २, ४३ ॥

१०४७. येषां भगवद् भक्ताः तद् अन्वया वा। स तापः अर्कतापः हि दिवसे न रात्रौ तथा भगवद् विमुखे तापः। हरिः इति उद्धारकः अग्निः इव भस्मना न छन्नः पाप समूहस्य पूर्वम् एव नष्टत्वात्, पुष्टिस्थः भगवान् भक्तिमार्ग विरोधात् कथं तिष्ठति इति आह प्रणयेति, रशनया साधन भक्त्या संवलिता तथा स्थिरीभूतः चरणो मस्तके रज्जुनिर्मिताधारवत् ॥११,२,५५॥

१०४८. बीज संस्कार कृपया न अन्यो अन्याश्रयणं मतम् ॥११, ३, १६।

१०४९. मन्त्रशास्त्रे अपि उक्ता मन्त्रा गुरु मुखव्यतिरेकेण न फलन्ति इति तत्र शिक्षा, गुरु सन्तोष उपायमाह निष्कपट अनुवृत्तिभिः ॥ ११, ३, २२ ॥

१०५०. स्मरणं निन्दाद्वारा हि सम्भवनि सापि न कर्तव्या ॥ ११,३,२७ ॥

१०५१. ततः कियत् कालं सेवया परिचये जात आत्म समर्पणम् कर्तव्यम् इति॥ ११, ३, २८ ॥

१०५२. भक्तानां परस्परम् संवादो यत्र भगवद् उक्तम् अर्थम् परस्परम् अनु-

वदन्ति यस्मिन् यशसि, तच् छिक्षेद् इति संबन्धः, स्नानादि आसक्ति निवारणाय पावनम् इति उक्तम् ॥ ११, ३, ३० ॥

१०५३. तेषाम् अवान्तर फलमाह स्मरन्त इति, रति आदि मताम् अपि अन्य चित्त गमनवद् विस्मरणं सम्भवति तत आह स्मरन्त इति। अन्योन्यं दृष्ट्वा स्वत एव स्मरणम् वचनेन स्मारणं एक देश-बोधनान् न श्रवणं, विस्मरणे निषेधानां किङ्करत्वात् पाप सम्पत्तौ प्रायश्चित्तं कृत्वा स्मर्तव्यम् इति अत आह। पापं दूरीकृत्य दुःख दूरी करोति, विषयत्वेन सभागत एव स्मरणात् पूर्वमेव पाप समूहान् दूरीकरोति, अन्यथा स्मरणस्य तत् फलत्वं स्यात्, एवम् अछिद्रतया श्रवण कीर्तनादि सम्पत्तौ सर्वतः क्षरण जलमिव प्रेमभक्तिः उत्पद्यते। तथा व्यापिका भक्तिः उद्गच्छति यया शरीरं पूर्यते ततः शरीरस्य गाढत्वादउत्पुलकत्वम् ॥ ११, ३, ३१ ॥

१०५४. अग्निरूपो वागधिपतिः इति। ॥ ११, ३, ३५ ॥

१०५५. भोक्ता जीवः कर्ता प्राणः। ॥ ११, ३, ३९ ॥

१०५६. विशुध्धत्वं मार्जनेन तेजः सम्पादने तदर्थम् च प्रेमैव स्फुरितम् वा प्रतिबिम्बे वा इति सन्देह आह साक्षाद् इति। प्रत्यक्षत्वम् स्फुरण मात्रत्वेन पुरुषव्यापार इति। स्वत एव उद्गतस्य प्रकाश इति स्फुरणम्। ॥ ११, ३, ४० ॥

१०५७. वेदस्तु ईश्वरः स्व आत्मानं वदति ॥ ११, ३, ४३ ॥

१०५८. रोचनार्थम् रुचि उत्पादनार्थम् बहूनि फलानि वेदे बोधितानि ॥ ११, ३, ४६ ॥

१०५९. प्रवाह मर्यादा सहितो भक्तः पुष्टो भवति तत्र उभयत्र अधिकृता देवाः स इष्ट्योः स्वसेवा परित्यागेन भगवद् सेवापराणां प्रवाह मर्यादयोः विघ्नम् कुर्वन्ति ॥ ११, ४, १० ॥

॥ समाप्त ॥

वल्लभम् मधुरम् अधरम् मधुरम् अमृतम् मधुरम् स्पर्शनम् मधुरम् ।
पुष्टिस्थम् मधुरम् उत्थानम् मधुरम् वागधीशपतेरखिलम् मधुरम् ।।१।।
ज्ञानम् मधुरम् सोमम् मधुरम् यज्ञम् मधुरम् फलं मधुरम् ।
रसालं मधुरं प्रकटनं मधुरम् वागधीशपतेरखिलम् मधुरम् ।।२।।
भूमौ मधुरौ चरणौ चंपौ मधुरौ अरण्यौ मधुरम् ।
सिञ्चनं मधुरं प्राकट्यं मधुरम् वागधीशपतेरखिलम् मधुरम् ।।३।।
दानि मधुरा लीला मधुरा ब्रह्मम् मधुरम् सम्बन्धम् मधुरम् ।
गुप्तम् मधुरम् शास्त्रम् मधुरम् वागधीशपतेरखिलम् मधुरम् ।।४।।
भाष्यम् मधुरम् निबन्धम् मधुरम् षोडशम् मधुरम् भागवतम् मधुरम् ।
सुबोधनम् मधुरम् शसम् मधुरम् वागधीशपतेरखिलम् मधुरम् ।।५।।
वरणम् मधुरम् वरेण्यम् मधुरं सख्यं मधुरं निवेदनम् मधुरम् ।
सुधाः मधुराः सेवकाः मधुरामवागधीशपतेरखिलम् मधुरम् ।।६।।
पुष्टिर्मधुरा भक्तिर्मधुरा [illegible] मधुरं पानं मधुरं ।
प्रहसितं मधुरं विहरणं मधुरं वागधीशपतेरखिलं मधुरम् ।।७।।
संयोग मधुरोवियोग मधुरोअनुग्रह मधुरोविप्रयोग मधुरो।
सर्वोद्धार मधुरोआचार मधुरोवागधीशपतेरखिलं मधुरम् ।।८।।
निष्ठा मधुरा शिक्षा मधुरा प्रीति मधुरी रीति मधुरी।
स्वादनं मधुरं आस्वादनं मधुरं वागधीशपतेरखिलं मधुरम् ।।९।।
शुद्धं मधुरं अद्वैतं मधुरं ब्रह्मम् मधुरं वादम् मधुरम् ।
स्वरूपम् मधुरं प्रतिपादनम् मधुरं वागधीशपतेरखिलं मधुरम् ।।१०।।
अग्निनम् मधुरं सन्यासं मधुरं जलं मधुरं प्रवेशनं मधुरम् ।
तेजपुज मधुरो काशीधाट मधुरो वागधीशपतेरखिलं मधुरम् ।।११।।